Barcode : 99999990064796
Title -
Author -
Language - sanskrit
Pages - 106
Publication Year - 1928
Barcode EAN.UCC-13



THE

CHOWKHAMBÂ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 382

याज्ञवल्क्यस्मृतिः।

श्रीमित्रमिश्रकृत'वीरमित्रोदय'टीकया श्रीविज्ञानेश्वरकृत-
'मिताक्षरा'टीकया च सहिता।
साहित्याचार्य-खिस्ते नारायणशास्त्रिणा
साहित्योपाध्याय-होशिङ्ग जगन्नाथशास्त्रिणा च संशोधिता।

YĀJŇAVALKYA SMṚTI

With the Commentary of Mitra Mis'ra's
Vīramitrodaya and Vijnānes'vara's Mitāksarā.

Edited by

Pt. Nārāyaṇa S'āstrī Khisto Sāhityāchārya, Assistant Librarian, and
Pt. Jagannātha S'āstrī Hos'iṅga Sāhityopādhyāya, Sādholāl Scholar,
Sarasvatī Bhavana, Benares.

FASCICULUS IX-९.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE.
Vidya Vilas Press, North of Gopal Mandir, Benares.

1928.

Registered under Act XXV of 1867. (All Rights Reserved.)

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—३८२

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares,

Agents.

1 Otto Harrassowitz, Leipzig

GERMANY.

2 The Oriental Book-supplying Agency,

POONA.

ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम् ॥
सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥ २८ ॥
दाने विवाहे यज्ञे च सङ्ग्रामे देशविप्लवे ॥
आपद्यपि च(१) कष्टायां सद्यः शौचं विधीयते ॥ २९ ॥

महीपतीनामाभिषिक्तक्षात्रियाणां रोषादिना विद्युदभिमुखगमने विद्युद्धतानां गो(२)ब्राह्मणार्थे सङ्ग्रामेऽन्यरोषादात्मघातार्थिनां हतानां यस्याऽशौचाभावमिच्छति राजा तस्य सम्बन्ध्यशौचं न भवति । अत्राऽऽद्यन्त्ययोराश्रयत्वं मध्यमानां समतत्त्वं सम्बन्धो व्यवच्छिद्यते । अयं चाऽशौचाभाव आद्यन्तयोः, ऋत्विगादीनां च कर्मविशेष एव । तदाह विष्णुः—'नाऽसौ राज्ञां राजकर्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारूणां स्वकर्मणि न राज्ञामाज्ञाकारिणां न देवप्रतिष्ठाविवाहयोः सम्भृतयोः' । शेषव्यतिरेकेण विद्युद्धतादित्रयस्य चाऽशौचं सद्यः शौचरूपं प्रागभिहितम् । ऋत्विजां वृतानां, दीक्षितानां दीक्षणीयेष्टिसंस्कृतानां च यज्ञसम्बन्धिकर्मकरणारम्भविशिष्टानां, तथाऽन्नसत्रदानप्रवृत्तानामारब्धचान्द्रायणादिव्रतानां ब्रह्मचारिणां, प्रत्यहं गवादिदानशीलानां ब्रह्मविदां यतीनां, तथा पूर्वसङ्कल्पितद्रव्यस्य दाने, विवाहे प्रक्रान्ते, यज्ञे वृषोत्सर्गदेवप्रतिष्ठादौ दीक्षणीयेष्टिपूर्वे सोमयागादौ च प्रकान्ते, सङ्ग्रामे आरब्धे, परचक्रादिना देशोपप्लवे, कष्टायामापदि मारकोपसर्गादिपीडायामावश्यकतत्कर्मसु सद्य एव अशौचाभावो विधीयते मन्वादिभिः ॥ २७-२९ ॥

(मिता०) सपिण्डाशौचे क्वचिदपवादमाह—

महीपतीनामिति । यद्यपि महीशब्देन कृत्स्नं भूगोलकमभिधीयते तथाप्यत्र सकलायाः क्षितेरेकभर्तृकत्वानुपपत्तेः महीपतीनामिति बहुवचनानुरोधाच्च तदेकदेशभूतानि मण्डलानि लक्ष्यन्ते । तत्पालनाधिकृतानां क्षत्रियादीनामभिषिक्तानां नाशौचम्, तैराशौचं न कार्यमित्यर्थः । तथा विद्युद्धतानां गोब्राह्मणरक्षणार्थं विपन्नानां च सम्बन्धिनो ये सपिण्डास्तैरप्याशौचं न कार्यम् । यस्य च मन्त्रिपुरोहितादेर्भूमिपोऽनन्यसाध्यमन्त्राभिचारादिकर्मसिद्ध्यर्थमाशौ-

(१) हि—इति मु० पु० पाठः ।
(२) गोब्राह्मण—इत्यारभ्य हतानां—इतीयानंशो नास्ति ख. पुस्तके ।

चाभावमिच्छति तेनापि न कार्यम् । अत्र च महीपतीनां यदसाधारणत्वेन विहितं प्रजापरिरक्षणं तद्येन दानमानसत्कारव्यवहारदर्शनादिना विना न सम्भवति तत्रैवाशौचाभावो न पुनः पञ्चमहायज्ञादिष्वपि । तथा च मनुः (५।९५)—'राज्ञो माहात्मिके स्थाने सद्यः शौचं विधीयते । प्रजानां परिरक्षा(१)र्थमासनं चात्र कारणम्' ॥ इति । गौतमेनाप्युक्तम्—'राज्ञां च कार्यविघातार्थम्' इति राजभृत्यादेरप्याशौचं न भवति । यथाह प्रचेताः—'कारवः शिल्पिनो वै(२)द्या दासीदासास्तथैव च । राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः' ॥ इति । कारवः सूपकारादयः । शिल्पिनश्चित्रकरचैलनिर्णेजकादयः । अयं चाशौचाभावः किंविषय इत्यपेक्षायां कर्मनिमित्तैः शब्दैस्तत्तदसाधारणस्य कर्मणो बुद्धिस्थत्वात्तत्रैव द्रष्टव्यः । अत एव विष्णुः—'न राज्ञां राजकर्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारूणां कारुकर्मणि' इति प्रतिनियतविषयमेवाशौचाभावं दर्शयति । शातातपीयेऽप्युक्तम्—'मूल्यकर्मकराः शूद्राः दासीदासास्तथैव च । स्नाने शरीरसंस्कारे गृहकर्मण्यदूषिताः' ॥ इति । इयं च दासादिशुद्धिरपरिहरणीयतया प्राप्तस्पर्शविषयेत्यनुसन्धेयम् । अत एव स्मृत्यन्तरम्—'सद्यः स्पृश्यो गर्भदासो भक्तदासस्त्र्यहाच्छुचिः' । तथा—'चिकित्सको यत्कुरुते तदन्येन न शक्यते ॥ तस्माच्चिकित्सकः स्पर्शे शुद्धो भवति नित्यशः' ॥ इति ॥ २७ ॥

(मिता०) किञ्च—

ऋत्विजामित्यादि । ऋत्वि(३)जो वरणसम्भृता वैतानोपासनाकर्तृविशेषाः । दीक्षणीयासंस्कृता दीक्षितास्तेषां यज्ञियं यज्ञे भवं च कर्म कुर्वतां सद्यः शौचं विधीयत इति सर्वत्रानुषङ्गः । दीक्षितस्य 'वैतानौपासनाः कार्या' इत्यनेन सिद्धेऽप्यधिकारे पुनर्वचनं (४)यजमाने स्वयंकर्तृत्वविधानार्थं सद्यः (५)स्नानेन विशुद्ध्यर्थं च । सत्रिग्रहणेन सन्ततानुष्ठानतुल्यतयान्नसत्रप्रवृत्ता लक्ष्यन्ते । मुख्यानां तु सत्रिणां दीक्षितग्रहणेनैव सिद्धेः । व्रतिशब्देन कृच्छ्रचान्द्रायणादिप्रवृत्ताः स्नातकव्रतप्रायश्चित्तप्रवृत्ताश्चोच्यन्ते । तथा ब्रह्मचारि-

(१) रक्षार्थं शासनं ग. । (२) भृत्या वैद्या दासास्तथैव च घ. ।
(३) वरणकरणसङ्गता ग. वरणाभरणसम्भृता ङ. । (४) याजमानेषु ख. ।
(५) स्नानविध्यर्थं ख. स्नानविशुध्यर्थं ग. ।

ग्रहणेन ब्रह्मचर्यादिव्रतयोगिनः श्राद्धकर्तुर्भोक्तुश्च ग्रहणम् । तथा च स्मृत्यन्तरम्–'नित्यमन्नप्रदस्यापि कृच्छ्रचान्द्रायणादिषु । निर्वृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने ॥ गृहीतनियमस्यापि न(१) स्यादन्यस्य कस्यचित् । निमन्त्रितेषु विप्रेषु (२)प्रारब्धे श्राद्धकर्मणि ॥ निमन्त्रितस्य विप्रस्य स्वाध्यायादिरतस्य च । देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥ प्रायश्चित्तप्रवृत्तानां दातृब्रह्मविदां तथा' ॥ इति । सत्रिणां व्रतिनां च सत्रे व्रते च शुद्धिर्न कर्ममात्रे संव्यवहारे वा । तथा च विष्णुः—'न व्रतिनां व्रते न सत्रिणां सत्रे' इति । ब्रह्मचार्युपकुर्वाणको नैष्ठिकश्च । यस्तु नित्यं दातैव न प्रतिग्रहीता स वैखानसो दातृशब्देनोच्यते । ब्रह्मविद्यतिः । एतेषां च त्रयाणामाश्रमिणां सर्वत्र शुद्धिः विशेषे प्रमाणाभावात् । दाने च पूर्वसंकल्पितद्रव्यस्य नाशौचम् । 'पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यति' इति क्रतुस्मरणात् । स्मृत्यन्तरे चात्र विशेष उक्तः—'विवाहोत्सवयज्ञादिष्वन्तरा मृतसूतके । शेषमन्नं परैर्देयं दातॄन्भोक्तॄंश्च न स्पृशेत्' ॥ इति । यज्ञे वृषोत्सर्गादौ विवाहे च पूर्वसम्भृतसम्भारे । तथा च स्मृत्यन्तरम्—'यज्ञे सम्भृतसम्भारे विवाहे श्राद्धकर्मणि' इति । सद्यः शौचमत्र प्रकृतम् । विवाहग्रहणं पूर्वप्रवृत्तचौलोपनयनादिसंस्कारकर्मोपलक्षणम् । यज्ञग्रहणं च पूर्वप्रवृत्तदेवप्रतिष्ठारामाद्युत्सवमात्रो(३)पलक्षणम् । 'न देवप्रतिष्ठोत्सर्गविवाहेषु न देशविभ्रमे नापद्यपि च कष्टायामाशौचम्' इति विष्णुस्मरणात् । सङ्ग्रामे युद्धे । 'संग्रामे समुपोढे राजानं संनाहयेत्' इत्याश्वलायनाद्युक्तसंनहनविधौ प्रास्थानिकशान्तिहोमादौ च सद्यः शुद्धिः । देशस्य विस्फोटादिभिरुपसर्गे राजभयाद्वा विप्लवे तदुपशमनार्थे शान्तिकर्मणि सद्यः शौचम् । विप्लवाभावेऽपि क्वचिद्देशविशेषेण पैठीनसिना शुद्धिरुक्ता—'विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि । न तत्र सूतकं तद्वत्कर्म यज्ञादि कारयेत्' ॥ इति । तथा कष्टायामप्यापदि व्याध्याद्यभिभवेन मुमूर्षावस्थायां दुरितशमनार्थं दाने । तथा संकुचितवृत्तेश्च क्षुत्परिश्रान्तमातापित्रादिबहुकुटुम्बस्य तद्भरणोपयोगिनि प्रतिग्रहे सद्यः शुद्धिः । इयं च शुद्धिर्यस्य सद्यः शौचं विनार्त्युपशमो न भवति अश्वस्तनिकस्य तद्विषया । यस्त्वेकाहपर्याप्तसंचितधनस्तस्यैकाहः,

(१) तस्मादन्यस्य ख. । (२) प्रवृत्त ग. । (३) श्रोपलक्षणम् ग. ङ. ।

यस्त्र्यहोपयोगिसंचयी तस्य त्र्यहः, यस्तु चतुरहार्थमापादितद्रव्यः कुम्भीधान्यस्तस्य चतुरहः, कुसूलधान्यकस्य दशाह इत्येवं यस्य यावत्कालमार्त्यभावस्तस्य तावत्कालमाशौचम् । आपद्युपाधिकत्वादाशौचसंकोचस्य । अत एव मनुना (४।७)—'कुसूलधान्यको वा स्यात्कुम्भीधान्यक एव वा । त्र्याहिको वापि च भवेदश्वस्तनिक एव वा' ॥ इत्यत्र प्रतिपादितचतुर्विधगृहस्थाभिप्रायेण—'दशाहं शावमाशौचं सपिण्डेषु विधीयते । अर्वाक्संचयनादस्थ्नां त्र्यहमेकाहमेव वा' ॥ इति कल्पचतुष्टयं प्रतिपादितम् । समानोदकविषयाश्च संकुचिताशौचकल्पाः । पक्षिण्येकाहः । सद्यः शौचरूपाः स्मृत्यन्तरे दृष्टाः वृत्तिसंकोचोपाधिकतयैव योज्याः । अयं चाशौचसंकोचो येनैव प्रतिग्रहादिना विनार्त्तिस्तद्विषयो न सर्वत्रेत्यवगन्तव्यम् । मनुः—'एकाहाद्ब्राह्मणः शुध्येद्योऽग्निवेदसमन्वितः । त्र्यहात्केवलवेदस्तु विहीनो दशभिर्दिनैः' ॥ इत्यादिस्मृत्यन्तरवचनपर्यालोचनयाध्ययनज्ञानानुष्ठानयोगिनां त्र्येकाहादिभिः सर्वात्मना शुद्धिरित्येवं कस्मान्नेष्यते । उच्यते—'दशाहं शावमाशौचं सपिण्डेषु विधीयते' इति सामान्यप्राप्तदशाहबाधपुरःसरमेव ह्येकाहाद्ब्राह्मणः शुद्ध्येदित्यादि विधायकं भवति । बाधकस्य चानुपपत्तिनिबन्धनत्वात् यावत्यबाधितेऽनुपपत्तिप्रशमो न भवति तावद्बाधनीयम् । अतः कियदनेन बाध्यमित्यपेक्षायामपेक्षितविशेषसमर्पणक्षमस्याग्निवेदसमान्वित इति वाक्यविशेषस्य दर्शनादग्निवेदविषयेऽग्निहोत्रादौ कर्मणि स्वाध्याये च व्यवतिष्ठते न पुनर्दानादावपि । एवं चाग्निवेदपदयोः कार्यान्वयित्वं भवति । इतरथा येनाग्निवेदसाध्यं कर्म कृतं तस्यैकाहाच्छुद्धिरिति पुरुषविशेषोपलक्षणत्वमेव स्यात् । न चैतद्युक्तम् । एवं च सति—'प्रत्यूहेन्नाग्निषु क्रियाः । वैतानोपासनाः कार्याः क्रियाश्च श्रुति(१)चोदिताः' ॥ इति । तथा ब्राह्मणस्य च स्वाध्यायादिनिवृत्त्यर्थं सद्यः शौचमित्येवमादिभिर्मन्वादिवचनैरेकवाक्यता भवति । तथा च—'उभयत्र दशाहानि कुलस्यान्नं न भुज्यते' इति दशाहपर्यन्तं भोजनादिकं प्रतिषेधयद्भिर्यमादिवचनैरविरोधोऽपि सिध्यति, अतः (२)क्वचित्कमेवेदमाशौचसंकोचविधानं न पुनः सर्वसंव्यवहारादिगोचरमित्यलमतिप्रपञ्चेन ।

(१) श्रुतिचोदनात् घ. । (२) क्वचित्कर्मविशेषे इदं ख. ।

इदं च स्वाध्यायविषये सद्यः शौचविधानं बहुवेदस्य (१)ब्रह्मोज्झत्वकृतायामार्तौ द्रष्टव्यम् । इतरस्य तु—'दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते' इति प्रतिषेध एव । ब्राह्मणादिमध्ये यस्य यावत्कालमाशौचमुक्तं स तस्यानन्तरं स्नात्वा शुध्येत् न तत्कालातिक्रममात्रात् । यथाह मनुः (५।९९)—'विप्रः शुद्ध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम् । वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः' ॥ इति । अयमर्थः—कृतक्रिय इति प्रत्येकमभिसम्बध्यते । विप्रोऽनुभूताशौचकालः कृताक्रियः कृतस्नानो हस्तेनापः स्पृष्ट्वा शुध्यति । स्पृष्ट्वेति स्पर्शनक्रियैवोच्यते न स्नानमाचमनं वा । वाहनादिषु तस्यैवानुषङ्गात् । अथवा कृताक्रियो यावदाशौचं कृतोदकादिक्रियः तदनन्तरं विप्रादिरुदकादि स्पृष्ट्वा (२)शुध्यतीत्याशौचकालानन्तरभाविस्नानप्रतिनिधित्वेनोच्यत इति । क्षत्रियादिर्वाहनादिकं स्पृष्ट्वा शुध्येदिति ॥ २८–२९ ॥

(वी०मि०) मरणजन्यसद्यःशौचप्रसङ्गेन स्नानाद्यपनेयं स्पर्शजन्याशौचमाह—

उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत् ॥
अब्लिङ्गानि जपेच्चैव सावित्रीं मनसा सकृत् ॥ ३० ॥

उदक्या रजस्वलाऽशुचयश्चाण्डालपतितादयस्तैः साक्षात्संस्पृष्टः स्नायात् । तैर्दण्डादिपरम्परया स्पृष्टः 'आपोहिष्ठे'त्यादिऋचं गायत्रीं सकृत् मनसा जपेदेवं शुद्ध्यति । एवकार उपस्पर्शनसाहित्यबोधनार्थः । मिताक्षरायां तैरुदक्याशुचिसंस्पृष्टैः संस्पृष्ट उपस्पृशेदित्यर्थमाह । अत्र (३)मलस्पर्शमैथुननिमित्तकाशौचान्याचमननिवर्त्यानि स्मृत्यन्तरोक्तानि चकारेणैव समुच्चितानि । तानि च तत्रतत्राऽवगन्तव्यानि ॥ ३० ॥

(मिता०) कुलव्यापिनीं शुद्धिमभिधायेदानीं प्रसङ्गात्प्रतिपुरुषव्यापिनीं शुद्धिमाह—

उदक्येति । उदक्या रजस्वला, अशुचयः शवचाण्डालपतितसूतिकाः शावाशौचिनश्च एतैः संस्पृष्टः स्नायात् । तैः पुनरुदक्याशु-

(१) ब्रह्मानध्ययनकृतायां ग । (२) शुध्येदिति । इत्या ख. ।
(३) मन्त्रं—इति ख.पुस्तके पाठः ।

चिसंस्पृष्टादिभिः संस्पृष्ट उपस्पृशेत् आचामेत्। आचम्याङ्गिलङ्गानि 'आपोहिष्ठे'त्येवमादीनि त्रीणि मन्त्रवाक्यानि जपेत् । त्रिष्वेव बहुवचनस्य चरितार्थत्वात् । तथा गायत्रीं च सकृन्मनसा जपेत् । ननु उदक्या संस्पृष्टः स्नायादित्येकवचननिर्दिष्टस्य कथं तैरिति बहु(१)वचनपरामर्शः । सत्यमेवम् । किंत्वत्र उदक्यादिसंस्पृष्टव्यतिरिक्तस्नानार्हमात्रस्पर्शेष्वाचमनविधानार्थं तैरिति बहुवचननिर्देश इत्यविरोधः । ते च स्नातार्हाः स्मृत्यन्तरेऽवगन्तव्याः । यथाह पराशरः—'दुःस्वप्ने मैथुने वान्ते विरिक्ते क्षुरकर्मणि । चितिपू(२)यश्मशानास्थां स्पर्शने स्नानमाचरेत्' ॥ इति । तथा च मनुः (५।१४४)—'वान्तो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत् । आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतम्' ॥ इति । मैथुनिनः स्नानमृतुकालविषयम् । 'अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत्' । इति बृहस्पतिस्मरणात् । अनृतावपि कालविशेषे स्मृत्यन्तरे स्नानमुक्तम्—'अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनम् । कृत्वा सचैलं स्नात्वा च वारुणीभिश्च मार्जयेत्' ॥ इति । तथा च यमः—'अजीर्णेऽभ्युदिते वान्ते तथाप्यस्तमिते रवौ । दुःस्वप्नं दुर्जनस्पर्शे स्नानमात्रं विधीयते' ॥ इति । तथा च बृहस्पतिः—'मैथुने कटधूमे च सद्यः स्नानं विधीयते' इत्येतदसचैलस्पर्शविषयम् । सचैलेन तु चित्यादिस्पर्शे सचैलमेव स्नानम् । यथाह च्यवनः—'श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजकं सोमविक्रयिणं पू(२)यं चितिं चितिकाष्ठं च मद्यं मद्यभाण्डं सस्नेहं मानुषास्थि श(३)वस्पृष्टं रजस्वलां महापातकिनं शवं स्पृष्ट्वा सचैलमम्भोऽवगाह्योत्तीर्याग्निमुपस्पृश्य गा(४)यत्रीमष्टशतं जपेत् । घृतं प्राश्य पुनः स्नात्वा त्रिराचामेत्' इति । एतच्च बुद्धिपूर्वविषयम् । अन्यत्र स्नानमात्रम् । 'श(५)वस्पृष्टं दिवाकीर्तिं चितिं पू(६)यं रजस्वलाम् । स्पृष्ट्वा त्वकामतो विप्रः स्नानं कृत्वा विशुध्यति' ॥ इति बृहस्पतिस्मरणात् । एवमन्यत्रापि वक्ष्यमाणेषु विषयसमीकरणमूहनीयम् । तथाह कश्यपः—'उदयास्तमययोः स्कन्दयित्वा अक्षिस्पन्दने कर्णाक्रोशने चित्यारोहरणे पू(६)यसंस्पर्शने च सचैलं स्नानं पुनर्मन इति जपेन्महाव्या-

(१) बहुवचनादरः । (२) अस्पृश्यवर्गे पूयमित्यत्र यूपमित्येव बहुत्र पुस्तकेषूपलभ्यते ।
(३) शवस्पृशं घ. । (४) गायत्रीमष्टवारं जपेत् ख० । (५) शवस्पृशं ग० । (६) यूपं इति पाठः ।

'हृतिभिः सप्ताज्याहुतीर्जुहुयात्' इति । तथा च स्मृत्यन्तरेऽपि-'चितिं च चितिकाष्ठं च यूपं चाण्डालमेव च । स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत् ॥ देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम् । असौ देवलको नाम हव्यकव्येषु गर्हितः' ॥ तथा ब्रह्माण्डपुराणे—'शैवान्पाशुपतान्स्पृष्ट्वा लोकायतिकनास्तिकान् । विकर्मस्थान्द्विजान्शूद्रान्सवासा जलमाविशेत्' ॥ इति । तथा—'अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसम्पर्कदूषिता' । इति लिङ्गाच्च शूद्रस्पर्शने निषेधः । तथाङ्गिराः—'यस्तु छायां श्वपाकस्य ब्राह्मणो ह्यधिरोहति । तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुध्यति' ॥ तथा व्याघ्रपादः—'चण्डालं पतितं चैव दूरतः परिवर्जयेत् । गोवालव्यजनादर्वाक्सवासा जलमाविशेत्' ॥ इति । एतदतिसंकटस्थलविषयम् । अन्यत्र तु बृहस्पतिनोक्तम्—'युगं च द्वियुगं चैव त्रियुगं च चतुर्युगम् । चण्डालसूतिकोदक्यापतितानामधः क्रमात्' ॥ इति । तथा पैठीनसिः—'काकोलूकस्पर्शने सचैलस्नानं महाव्याहृतिहोमश्च' । अनुदकमूत्रपुरीषकरणे इत्येतच्चिरकालमूत्रपुरीषाशौचाकरणपरम् । तथाऽङ्गिराः—'भासवायसमार्जारखरोष्ट्रं च श्वशूकरान् । अमेध्यानि च संस्पृश्य सचैलो जलमाविशेत्' ॥ इति । मार्जारस्पर्शनिमित्तं स्नानमुच्छिष्टसमयेऽनुष्ठानसमये च वेदितव्यं समाचारात् । अन्यदा तु—'मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः' इति स्नानाभावः । श्वस्पर्शे तु स्नानं नाभेरूर्ध्वं वेदितव्यम् । अधस्तात्तु क्षालनमेव । 'नाभेरूर्ध्वं करौ मुक्त्वा शुना यद्युपहन्यते । तत्र स्नानमधस्ताच्चेत्प्रक्षाल्याचम्य शुध्यति' ॥ इति तेनैवोक्तत्वात् । तथा पक्षिस्पर्शे विशेषो जातूकर्ण्येनोक्तः-'ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गं संस्पृशेत्खगः । स्नानं तत्र प्रकुर्वीत शेषं प्रक्षाल्य शुध्यति' ॥ इति । अमेध्यस्पर्शेऽपि विशेषो दर्शितः—'नाभेरधस्तात्प्रवाहेषु च कायिकैर्मलैः सुराभिर्मद्यैर्वोपहतो मृत्तोयैस्तदङ्गं प्रक्षाल्याचान्तः शुध्येत् । अन्यत्रापहतो मृत्तोयैस्तदङ्गं प्रक्षाल्य स्नायात् । तैरिन्द्रियेषूपहतस्तूपोष्य स्नात्वा पञ्चगव्येन दशनच्छदोपहतश्च' इति । एतच्च परकीयामेध्यस्पर्शविषयम् । आत्मीयमलस्पर्शे तु ऊर्ध्वमपि नाभेः क्षालनमेव । यथाह देवलः—'मानुषास्थि वसां विष्ठामर्तवं मूत्ररेतसी । मज्जानं शोणितं वापि परस्य यदि संस्पृशेत् ॥ स्नात्वा प्रमृज्य लेपादीनाचम्य स

शुचिर्भवेत्। तान्येव स्वानि संस्पृश्य पूतः स्यात्परिमार्जनात्' ॥ इति। तथा च शङ्खः—'रथ्याकर्दमतोयेन ष्ठीवनाद्येन वा तथा। नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यति' ॥ इति। यमेनाप्यत्र विशेष उक्तः—'सकर्दमं तु वर्षासु प्रविश्य ग्रामसंकरम्। जङ्घयोर्मृत्तिकास्तिस्रः पादयोर्द्विगुणास्ततः' ॥ इति। ग्रामसंकरं ग्रामसलिलप्रवाहप्रदेशं सकर्दमं प्रविश्येत्यर्थः। मारुतशोषिते तु कर्दमादौ न दोषः। 'रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः। मारुतेनैव शुध्यन्ति पक्केष्टकचितानि च' ॥ इति प्रागुक्तत्वात्। अस्थनि मनुना विशेष उक्तः (५।८७)—'नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुद्ध्यति। आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविम्' ॥ इति। इदं द्विजातास्थिविषयम्। अन्यत्र वसिष्ठोक्तम्—'मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचमस्निग्धे त्वहोरात्रम्' इति। आमनुषे तु विष्णूक्तम्—'भक्ष्यवर्ज्यं पञ्चनखशवं तदस्थि च सस्नेहं स्पृष्ट्वा स्नातः पूर्ववस्त्रं प्रक्षालितं बिभृयात्' इति। एवमन्येऽपि स्नानार्हाः स्मृत्यन्तरतोऽवबोद्धव्याः। एवं स्नानार्हाणां बहुत्वात्तदभिप्रायं तैरिति बहुवचनमविरुद्धम्। उदक्याशुचिभिः स्नायादित्ये(१)तच्च दण्डाद्यचेतनव्यवधानस्पर्शे वेदितव्यम्। चेतनव्यवधाने तु मानवम् (म० ५। ८५)—'दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा। शवं तत्स्पृ(२)ष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति' ॥ इति। तृतीयस्य त्वाचमनमेव। 'तत्स्पृष्टिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते। ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा' ॥ इति संवर्तस्मरणात्। एतच्चाबुद्धिपूर्वकविषयम्। मतिपूर्वे तु तृतीयस्यापि स्नानमेव। यथाह गौतमः—'पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्टस्पर्शने सचैलमुदकोपस्पर्शनाच्छुध्येत्' इति। चतुर्थस्य त्वाचमनम्—'उपस्पृश्याशुचिस्पृष्टं तृतीयं वापि मानवः। हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यति' ॥ इति देवलस्मरणात्। अ(३)शुचीनां पुनरुदक्यादिस्पर्शे देवलेन विशेष उक्तः—'श्वपाकं पतितं व्यङ्गमुन्मत्तं (४)शवहारकम्। सूतिकां साविकां नारीं रजसा च परिप्लुताम् ॥ श्वकुक्कुटवराहांश्च ग्राम्यान्संस्पृश्य मानवः। सचैलः

(१) च्चाण्डालाद्यचेतन ख०। (२) तमेव तु स्पृशेत् ख०।
(३) अशुचिना पुनः ख०। (४) शवदाहकं ङ०।

साशिरः स्नात्वा तदानीमेव शुध्यति' ॥ इति । 'अशुद्धान्स्वय-मप्येतानशुद्धस्तु यदि स्पृशेत् । विशुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः' ॥ इति । सावित्रिका प्रसवस्य कारयित्री । कृच्छ्रः श्वपाका-दिविषयः । श्वादिषु तूपवास इति व्यवस्था ॥ ३० ॥

(वी०मि०) अशौचान्यभिधाय सपदि तदपगमहेतूनाह—

कालोऽग्निः कर्म मृद्वार्युर्मनो ज्ञानं तपो बलम् ॥
पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥ ३१ ॥
अकार्यकारिणां दानं वेगो नद्याश्च शुद्धिकृत् ॥
संशोध्यस्य (१)च मृत्तोयैः संन्यासो हि(२) द्विजन्मनाम्॥३२॥
तपो वेदविदां क्षान्तिर्विदुषां वर्ष्मणां जलम् ॥
जपः प्रच्छन्नपापानां मनसः सत्यमुच्यते ॥ ३३ ॥
भूतात्मनस्तपोविद्ये बुद्धेर्ज्ञानं विशोधनम् ॥
क्षेत्रज्ञस्येश्वरज्ञानाच्छु(३)द्धिस्तु परमा मता ॥ ३३ ॥

कालो दशरात्रत्रिरात्रादिर्जननादौ ज्ञात्यादीनाम् । अग्निर्मृन्म-यभाण्डादेरुपघाते । कर्म अश्वमेधादि ब्रह्महत्यादिमतः । मृज्जले गोघ्रातान्नादेः । वायुर्मार्गादेः । मनो विचिकित्साविषयस्य 'मनः-पूतं समाचरे'दिति वचनात् । ज्ञानं ब्रह्मविषयकं बुद्धितत्त्वस्य आ-त्मनश्च । तपश्चान्द्रायणादिमतः । जलं वस्त्रादेः । पश्चात्पापकरणा-नन्तरं तापः परिदेवनं कृतपापानाम् । निराहारः उपवास एका-दशीव्रतादि । पापसामान्येऽमी सर्वे शुद्धिहेतवः । अकार्यकारिणं निषिद्धाचरणशीलानां पात्रे पर्याप्तधनदानं, नद्या अमेध्याद्युपहताया वेगो वर्षाम्बुप्रवाहः शुद्धिकृत् । अमेध्यस्य उच्छिष्टाद्युपहतस्य मृत्तोयं च गन्धलेपापकर्षकं, द्विजन्मनां ब्राह्मणानां च मानसपापवतां संन्यासः प्रव्रज्या शुद्धिकृत् । आद्यचकारेण नदीतीरभूमेः समुच्चयः । मध्यमान्त्यचकारौ मृत्तोययोः परस्परसाहित्यं सूचयतः । हिशब्दः पादपूरणे । वेदविदामज्ञानकृतपापवतां तपो वेदाभ्यसनं, विदुषां वेदान्तार्थश्रवणवतां क्षान्तिरपकारिण्यप्रहर्तव्यबुद्धिविरहः,

(१) शोध्यस्य मृच्च तोयं च—इति मु. पु. पाठः । (२) वै—इति मु० पु० पाठः ।
(३) ज्ञानाद्विशुद्धिः पर०—इति मु० पु० पाठः ।

वर्ष्मणां शरीराणां स्वेदाद्यशुद्धानां जले, प्रच्छन्नपापानामघमर्षणादिजपः, मनसो निषिद्धचिन्तादुष्टस्य सत्यं साधुसङ्कल्परूपं शुद्धिकृत् उच्यते। ज्ञानस्य शुद्धिहेतुत्वं प्रागुक्तं विवृणोति—भूतात्मनो भूतेषु शरीरात्मकेष्वात्मनो बुद्धिमतस्तपोविद्ये भ्रमनिवृत्त्यात्मकशुद्धिहेतू। तपःपदेन ब्रह्मज्ञानोपयोगि अनशनादि, विद्यापदेन चौपनिषदं ज्ञानमभिहितम्। बुद्धेः संशयविपर्ययवतो बुद्धितत्त्वस्य प्रमारूपं ज्ञानं विशोधनम्। क्षेत्रज्ञस्य तपोविद्याविशुद्धस्य साक्षात्काररूपादीश्वरज्ञानात्तु परमा शुद्धिः संसारलेपाभावरूपा धर्मशास्त्रकारैरनुमता ॥ ३१–३४ ॥

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलश्रीमन्महाराजाधिराजमधुकरसाहिसूनुश्रीमन्महाराजचतुरुदधिवसुन्धराहृदयपुण्डरीकविकासादिनकरश्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्मजश्रीपरशुरामामिश्रसूरिसूनुसकलविद्यापारावारपारीणधुरीणश्रीमन्मित्रमिश्रकृते वीरमित्रोदयाख्याने श्रीयाज्ञवल्क्यव्याख्याने आशौचप्रकरणम् ॥

(मिता०) अधुना कालशुद्धौ दृष्टान्तत्वेन द्रव्यशुद्धिप्रकरणोक्तांस्तथैवात्र प्रकरणे वक्ष्यमाणांश्च शुद्धिहेतूननुक्रामति—

काल इति। यथाग्न्यादयोऽमी सर्वे स्वविषये शुद्धिहेतवस्तथा कालोऽपि दशरात्रादिकः। शास्त्रगम्यत्वाच्छुद्धिहेतुत्वस्य। अग्निस्तावच्छुद्धिहेतुः। यथाभ्यधायि 'पुनः पाकान्महीमयम्' इति। कर्म च शुद्धिनिमित्तं, यथा वक्ष्यति तथा "अश्वमेधावभृथस्नानात्" इति। तथा मृदपि शुद्धिकारणं, यथा कथितम्—'सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये' इति। वायुरपि शुद्धिहेतुः, यथोदीरितं 'मारुतेनैव शुध्यन्ति' इति। मनोऽपि वाचः शुद्धिसाधनं, यथा-

म्नायि 'मनसा वा इषिता वाग्वदति' इत्यादि । ज्ञानं चाध्यात्मिकं बुद्धिशुद्धौ निदानं, यथाभिधास्यति 'क्षेत्रज्ञस्येश्वरज्ञानात्' इति । तपश्च कृच्छ्रादि, यथा वदिष्यति 'प्राजापत्यं चरेत्कृच्छ्रं समा वा गुरुतल्पगः' इत्यादि । तथा जलमपि शरीरादेः, यथा जल्पिष्यति 'वर्ष्मणो जलम्' इति । पश्चात्तापोऽपि शुद्धिजनकः, यथा गदितं 'ख्यापनेनानुतापेन' इति । निराहारोऽपि शुद्ध्युपादानं, यथा व्याहरिष्यति 'त्रिरात्रोपोषितो ज(१)प्त्वा' इत्यादि ॥ ३१ ॥

(मिता०) किञ्च—

अकार्येत्यादि । अकार्यकारिणां निषिद्धसेविनां दानमेव मुख्यं शुद्धिकारणं, यथा व्याख्यास्यति 'पात्रे धनं वा पर्याप्तं दत्त्वा' इति । नद्याः निदाघादावल्पतोयतया अमेध्योपहततीरायाः कूलङ्कषवर्षाम्बुप्रवाहवेगः शुद्धिकृत् । शोधनीयस्य द्रव्यस्य मृच्च तोयं च शुद्धिकृत्, यथेह भणितम् 'अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धापकर्षणात्' इति । संन्यासः प्रव्रज्या द्विजन्मनां मानसापचारे शुद्धिकृत् । तपो वेदाभ्यासो वेदविदां शुद्धिकारणम् । कृच्छ्रादि तु सर्वसाधारणं न-वेदविदामेव । क्षान्तिरुपशमो विदुषां वेदार्थविदाम् । वर्ष्मणः शरीरस्य जलम् । प्रच्छन्नपापानामविख्यातदोषाणां अघमर्षणादिसूक्तजपः शुद्धिकारणं शुद्धिसाधनम । मनः सदसत्सङ्कल्पात्मकं तस्या-सत्सङ्कल्पत्वादशुद्धस्य सत्यं साधुसङ्कल्पः शो(२)धकम् । भूतशब्देन तद्विकारभूतो देहेन्द्रिय(३)सङ्घो लक्ष्यते । तत्र स्थूलोऽहं काणोऽहं बधिरोऽहमित्येवं तदभिमानित्वेन योऽयमात्मा वर्तते । स भूतात्मा तस्य तपोविद्ये शुद्धिनिमित्ते । तपःशब्देनानेकजन्मस्वेकस्मिन्नपि वा जन्मनि (४)जागरस्वप्नसुषुप्त्यवस्थास्वात्मनो योऽयमन्वयः, शरीरादेश्च व्यतिरेकः सोऽभिधीयते । यथा 'तपसा ब्रह्म विजिज्ञासस्व' इति पञ्चकोशव्यतिरेकप्रतिपादनपरे वाक्ये । विद्याशब्देन चौपनिषदं 'अस्थूलमनण्वह्रस्वमसङ्गो ह्ययमात्मा' इत्यादि त्वंपदार्थनिरूपणविषयवाक्यजन्यं ज्ञानमुच्यते । एताभ्यामस्य शुद्धिः। शरीरादिव्यतिरेकबुद्धेः संशयविपर्ययरूपत्वेनाशुद्धायाः प्रमाणरूपं

---

(१) जले इत्यादि । (२) शोधनम् ङ. ।
(३) न्द्रियसम्बन्धो ङ. । (४) जाग्रत्स्वप्न ख. ।

ज्ञानं विशोधनम् । क्षेत्रज्ञस्य तपोविद्याविशुद्धस्य त्वंपदार्थभूतस्य तत्त्व(१)मस्यादिवाक्यजन्यात्साक्षात्काररूपादीश्वरज्ञानात् (२)परमा विशुद्धिर्मुक्तिलक्षणा । यथैताः शुद्धयः परमपुरुषार्थास्तद्वद्युक्ततरा कालशुद्धिरपीत्येवं प्रशंसार्थं भूतात्मादिविशुद्ध्यभिधानम् ॥३२-३३-३४॥

इत्याशौचप्रकरणम् ।

(वी०मि०) 'आपद्यपि च कष्टायां सद्यः शौचं विधीयते' इत्यापदि मुख्याशौचापवादेन सद्यः शौचमनुकल्प्य तत्प्रसङ्गेनापदि मुख्यवृत्तिसम्भवानुकल्परूपं वृत्त्यन्तरमाह नवभिः श्लोकैः—

क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः ॥
निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्पथि ॥ ३५ ॥
फलोपलक्षौमसोममनुष्यापूपवीरुधः ॥
तिलौदनरसक्षारान् दधि क्षीरं घृतं जलम् ॥ ३६ ॥
शस्त्रासवमधूच्छिष्टं मधु लाक्षा च बर्हिषः ॥
मृच्चर्मपुष्पकुतुपकेशतक्रविषक्षितीः ॥ ३७ ॥
कौशेयनीलवणमांसैकशफसीसकान् ॥
शाकाद्यौषधिपिण्याकपशुगन्धांस्तथैव च ॥ ३८ ॥
वैश्यवृत्त्यापि जीवन्तो विक्रीणीत कदाचन ॥
धर्मार्थं विक्रयस्तेषां(३) तिला धान्येन तत्समाः ॥ ३९ ॥
लाक्षालवणमांसानि पतनीयानि विक्रये ॥
पयो दधि च मद्यं च हीनवर्णकराणि च ॥ ४० ॥
आपद्गतः सम्प्रगृह्णन् भुञ्जानोऽपि यतस्ततः ॥
(४)न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि सः ॥४१॥

आपदि अवलानां मुख्यवृत्त्या भरणासम्भवे द्विजो ब्राह्मणः

---

(१) तत्त्वमसीत्यादि ख. । (२) परमात्मशुद्धिः ख. ।
(३) धर्मार्थं विक्रयं नेयास्तिला-इति मु. पु. पाठः ।
(४) न लुप्यो ब्राह्मणः किन्तु-इति क. पु. पाठः ।

क्षत्रियसम्बन्धिना कर्मणा जीवनोपायेन शस्त्रग्रहणादिना तदसम्भवे विशां कर्मणा वाणिज्यादिना जीवेत् न तु शूद्रवृत्त्या । अथ परकीयवृत्त्याश्रयणानन्तरं निस्तीर्य प्रायश्चित्तेनाऽऽत्मानं पावयित्वा पथि स्वकीयजीवनोपाये न्यसेत् अथवा भुक्तावशिष्टमापत्कालार्जितं धनं पथि न्यसेत् त्यजेदित्यर्थः । अपिकारेण क्षत्रियो वैश्यवृत्त्या वैश्यः शूद्रवृत्त्या जीवेदापदीति समुच्चीयते । 'अजीवन्तः स्वधर्मेणाऽनन्तरां पापियसीं वृत्तिमातिष्ठेरन्न तु कदाचिज्ज्यायसी'मिति वसिष्ठस्मरणात् । शूद्रस्य तु वणिग्वृत्त्या जीवनमापदि प्रथमाध्याये ग्रन्थकृताऽभिहितम् । वैश्यवृत्त्या जीवन्नपि ब्राह्मणः फलादीनि न विक्रीणीतेत्युत्सर्गः । यतो लाक्षादीनि विक्रये कृते तस्य पातकराणि, पयःप्रभृतीनि च शूद्रत्वकराणि विक्रये सति भवन्ति । अत्राऽपवादः—फलादीनां धर्मसाधनीभूतद्रव्यसम्पादनार्थं विक्रयोऽपापः । तत्रैव तिला धान्येनैव विक्रेया न तु रजतादिना तत्समा धान्यपरिमाणा न तु न्यूनाधिकपरिमाणाः । यदि तु क्षत्रियवृत्त्या वैश्यवृत्त्या वा जीवनं न सम्भवति तदा विप्र आपद्गतः सन् यतस्ततो हीनहीनतरेभ्यः पतितभिन्नेभ्यः सम्यक् वृत्त्युपयोग्यधिकधनवैमुख्ये प्रगृह्णन् धनान्नादिकं 'भुञ्जानो वान्नं नैनसा पापेन लिप्यते । हि यतः स विप्रोऽग्निसूर्यवद्धीनसङ्करोऽप्यदुष्ट एव तिष्ठति । फलं बदरेङ्गुदव्यतिरिक्तं 'फलानां बदरेङ्गुदे' इति विक्रय्यमुपक्रम्य नारदवचनात् । उपलं मण्यादिकमश्ममात्रं, क्षौममतसीसूत्रनिर्मितं वस्त्रं, सोमो लताविशेषो यज्ञसाधनं, वीरुधो गुडूच्यादिलताः, रसा इक्षुगुडादयः, (१)क्षारा यवक्षारादयः, आसवो मद्यं, मधूच्छिष्टं सिक्थं, बर्हिषः कुशाः, कुतप ऊर्णासूत्रनिर्मितकम्बलः, कौशेयं कृमिकोशोत्थं पट्टवस्त्रादि, एकशफा अश्वादयः, सीसं लोहमात्रोपलक्षकम्, आर्द्रा ओषधयो धान्यस्तम्बादयः, पिण्याकस्तिलकल्कः, पशुर्गवादिः, गन्धः कुङ्कुमादिः । शेषाः प्रसिद्धाः । तथाशब्दचकाराभ्यां रक्तवस्त्रतैलादीनां समुच्चयः । तदाह मनुः—

सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च ।
अपि चेत्स्युररक्तानि फलमूले तथौषधीः ॥

---

(१) क्षारा—इत्यारभ्य अश्वादयः—इत्यन्तो भागः ख० पुस्तके नास्ति ।

तथा—

अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्वशः ।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं (१)कुशान् ॥

इत्यादि । एवकारो धर्मार्थमित्यत्राऽन्वितः । मद्यं चेति चकारेण कथितपट्काऽतिरिक्तफलादिग्रहणम् । तद्विक्रये वैश्यत्वापादानं ब्राह्मणस्येति चरमचकारेण समुच्चीयते । तदाह मनुः—

सद्यः पतति मांसेन लाक्षया लवणेन च ।
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ॥
इतरेषामपण्यानां विक्रयादिह कामतः ।
ब्राह्मणः सप्तरात्रेण वैश्यभावं निगच्छति ॥

अत्र ब्राह्मण इत्यभिधानान्न क्षत्रियादेः फलादिविक्रये दोष इति दिक् ॥ ३५—४१ ॥

(मिता०) 'आपद्यपि च कष्टायां सद्यः शौचं विधीयते' इत्यापदि मुख्याशौचकल्पानामनुष्ठानासम्भवेन सद्यःशौचाद्यनुकल्पमुक्त्वेदानीं तत्प्रसङ्गादापदि 'प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा' इत्याद्युक्तयाजनादिमुख्यवृत्त्यसम्भवेन वृत्त्यन्तरमाह—

क्षात्रेणेति । द्विजो विप्रो बहुकुटुम्बतया स्ववृत्त्या जीवितुमसमर्थः क्षेत्रसम्बन्धिना कर्मणा शस्त्रग्रहणादिना आपदि जीवेत् । तेनापि जीवितुमशक्नुवन् वैश्यसम्बन्धिना कर्मणा वाणिज्यादिना जीवेत् न शूद्रवृत्त्या । तथा च मनुः (१०।८२)—'उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् । कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम्' ॥ इति । तथा आपद्यपि न हीनवर्णेन ब्राह्मी वृत्तिराश्रयणीया किन्तु ब्राह्मणेन क्षात्री, क्षत्रियेण वैश्यसम्बन्धिनी, वैश्येन च शौद्रीत्येवं स्वानन्तरहीनवर्णवृत्तिरेव । 'अजीवन्तः स्वधर्मेणानन्तरां पापीयसीं वृत्तिमातिष्ठेरन्नतु कदाचिज्ज्यायसीम्' इति वसिष्ठस्मरणात् । ज्यायसी च ब्राह्मी वृत्तिः । तथा च स्मृत्यन्तरम्—'उत्कृष्टं वापकृष्टं वा तयोः कर्म न विद्यते । मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते' ॥ इति । शूद्रस्योत्कृष्टं ब्राह्मं कर्म न विद्यते । तथा ब्राह्मणस्यापकृष्टं शौद्रं कर्म । मध्यमे क्षत्रवैश्यकर्मणी

(१) गुडेक्षुजान्—इति क० पु० पाठः ।

पुनरापद्गतसर्ववर्णसाधार(१)ण इति । शूद्रश्चापद्गतो वैश्यवृत्त्या शिल्पैर्वा जीवेत् । 'शूद्रस्य द्विजशुश्रूषा तयाऽजीवन्वणिग्भवेत् । शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन्' ॥ इति प्रागुक्तत्वात् । मनुना चात्र विशेषो दर्शितः (१०।१००)—यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः । तानि कारुककर्माणि शिल्पानि विविधानि च' ॥ इति । अनेनैव न्यायेनानुलोमोत्पन्नानामपि स्वानन्तरा वृत्तिरूहनीया । एवं स्वानन्तरहीनवर्णवृत्त्या आपदं निस्तीर्य प्रायश्चित्ताचरणेनात्मानं पावयित्वा पथि न्यसेत् स्ववृत्तावात्मानं स्थापयेदित्यर्थः । यद्वायमर्थः गर्हितवृत्त्यार्जितं धनं पथि न्यसेदुत्सृजेदिति । तथा च मनुः (१०।१११)—'जपहोमैरपैत्येनो याजनाध्यापनैः कृतम् । प्रतिग्रहनिमित्तं तु त्यागेन तपसैव तु' ॥ इति ॥ ३५ ॥

(मिता०) वैश्यवृत्त्यापि जीवतो ब्राह्मणस्य यदपगनीयं तदाह—

फलोपलेत्यादि । नो विक्रीणीतेति प्रत्येकमभिसम्बध्यते । फलानि कदलीफलादीनि बदरेङ्गुदव्यतिरिक्तानि । यथाह नारदः—"स्वयं शीर्णानि पर्णानि फलानां बदरेङ्गुदे । रज्जुः कार्पासिकं सूत्रं तच्चेदविकृतं भवेत्' ॥ इति । उ(२)पलं मणिमाणिक्याद्यश्ममात्रम् । क्षौममतसीसूत्रमयं वस्त्रम् । क्षौमग्रहणं तान्तवादेरुपलक्षणम् । यथाह मनुः (१०।८७)—'सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च । अपि चेत्स्युररक्तानि फलमूले तथौषधीः' इति । सोमो लताविशेषः । मनुष्यपदेनाविशेषात्स्त्रीपुंनपुंसकानां ग्रहणम् । अपूपं मण्डकादि भक्ष्यमात्रम् । वीरुधो वेत्रामृतादिलताः । तिलाः प्रसिद्धाः । ओदनग्रहणं भोज्यमात्रोपलक्षणम् । रसा गुडेक्षुरसशर्करादयः । तथा च मनुः (१०।८८)—'क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान्' इति । क्षारा यवक्षारादयः । दधिक्षीरयोर्ग्रहणं मस्तुपिण्डकिलाटकूर्चिकादीनां तद्विकाराणामुपलक्षणम् । 'क्षीरं सविकारम्' इति गौतमस्मरणात् । घृतग्रहणं तैलादिस्नेहमात्रोपलक्षणम् । जलं प्रसिद्धम् । शस्त्रं खड्गादि । आसवग्रहणं मद्यमात्रोपलक्षणम् । मधूच्छिष्टं सिक्थकम् । मधु क्षौद्रम् । लाक्षा जतु । बर्हिषः कुशाः । मृत् प्रसिद्धा । चर्माऽजिनम् । पुष्पं प्रसिद्धम् । (३)अजलोमकृतः

---

(१) साधारणे हि ते इति ख. । (२) उपलं माणिक्यादि ख. । (३) अजोर्णलोमकृतः ङ ।

कम्बलः कुतपः । केशाश्चमर्यादिसम्बद्धाः । तक्रमुदश्वित् । विषं शृङ्ग्यादि । क्षितिर्भूमिः । 'नित्यं भूमिव्रीहियवाजाव्यृषभधेन्वनड्वहश्चैके' इति सु(२)मन्तुस्मरणात् । कौशेयं कोशप्रभवं वसनम् । नीलं नीलीरसम् । लवणग्रहणेनैव विडसौवर्चलसैन्धवसामुद्रसोमककृत्रिमाण्यविशेषेण गृह्यन्ते । मांसं प्रसिद्धम् । एकशफा हयादयः । सीसग्रहणं लोहमात्रोपलक्षणम् । शाकं सर्वमविशेषात् । ओषधयः फलपाकान्ताः । आद्र्रौषधय इति विशेषोपादानाच्छुष्केषु न दोषः । पिण्याकः प्रसिद्धः । पशव आरण्याः (१०।८९) — 'आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च' इति मनुस्मरणात् । गन्धाश्चन्दनागुरुप्रभृतयः । सर्वानेतान्वैश्यवृत्त्या जीवन्ब्राह्मणः कदाचिदपि न विक्रीणीत । क्षत्रियादेस्तु न दोषः । अत एव नारदेन—'वैश्यवृत्तावविक्रेयं ब्राह्मणस्य पयो दधि' इति ब्राह्मणग्रहणं कृतम् ॥ ३६-३७-३८ ॥

(मिता०) प्रतिप्रसवमाह—

धर्मार्थमिति । यद्यावश्यकाः पाकयज्ञादिधर्माः स्वसाधनव्रीह्यादिधान्याभावे न निष्पद्यन्ते तर्हि धान्येन तिला विक्रयं नेयाः । तत्समाः द्रोणपरिमिता, द्रोणपरिमितेनेत्येवं तेन धान्येन समाः । तथा च मनुः (१०।९०)—'काममुत्पाद्य (२)कृष्यान्तु स्वयमेव कृषीवलः । विक्रीणीत तिलान्शुद्धान्धर्मार्थमचिरास्थितान्' ॥ इति । धर्मग्रहणमावश्यकभेषजाद्युपलक्षणम् । अत एव नारदः—'अशक्तौ भेषजस्यार्थे यज्ञहेतोस्तथैव च । यद्यवश्यं तु विक्रेयास्तिला धान्येन तत्समाः' ॥ इति । यद्यन्यथा विक्रीणीते तर्हि दोषः (१०।९१)—'भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः । कृमिर्भूत्वा श्वविष्ठायां पितृभिः सह मज्जति' ॥ इति मनुस्मरणात् । सजातीयैः पुनर्विनिमयो भवत्येव (मनुः १०।९४)—'रसा रसैर्निमातव्या (३)नत्वेव लवणं रसैः । कृतान्नं च कृतान्नेन तिला धान्येन तत्समाः' ॥ इति । कृतान्नं सिद्धान्नं तच्च कृतान्नेन परिवर्तनी(४)यम् । 'कृतान्नं चाकृतान्नेन' इति पाठे तु सिद्धमन्नमकृतान्नेन तण्डुलादिना परिवर्तनीयमिति ॥ ३९ ॥

---

(१) गौतमस्मरणाद् क. ङ. । (२) कृष्यां तु क. ख. ।
(३) नत्वेवं लवणं ख. । (४) नीयमिति यावत् क. ख. ।

(मिता०) पूर्वोक्तनिषिद्धातिक्रमे दोषमाह—

लाक्षेति । लाक्षालवणमांसानि विक्रीयमाणानि सद्यःपतनीयानि द्विजातिकर्महानिकराणि । पयःप्रभृतीनि तु हीनवर्णकराणि शूद्रतुल्यत्वापादकानि । एतद्व्यतिरिक्तापण्यविक्रये वैश्यतुल्यता । यथाह मनुः (१० । ९२-९३)—'सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ॥ इतरेषामपण्यानां विक्रयादिह कामतः । ब्राह्मणः सप्तरात्रेण वैश्यभावं (१)च गच्छति' ॥ इति ॥ ४० ॥

(मिता०) किञ्च—

आपद्गत इति । यस्त्वधनोऽवसन्नकुटुम्बतया आपद्गतोऽपि क्षत्रवृत्तिं वैश्यवृत्तिं वा न प्रविविक्षति स यतस्ततो (२)हीनहीनतमेभ्यः प्रतिगृह्णंस्तदन्नं भुञ्जानोऽपि (३)वा एनसा पापेन न लिप्यते । यतस्तस्यामापदवस्थायामसत्प्रतिग्रहादावधिकारित्वेन ज्वलनार्कसमः, यथा ज्वलनोऽर्कश्च हीनसङ्करेऽपि न दुष्यति तथायमापद्गतोऽपि न दुष्यतीत्येतावता तत्साम्यम् । एवं च वदता आपद्गतस्य परधर्माश्रयणाद्विगुणमपि स्वधर्मानुष्ठानमेव मुख्यामिति दर्शितं भवति । तथा च मनुः (१०।९७)—'वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः । परधर्माश्रयाद्विप्रः सद्यः पतति जातितः' ॥ इति ॥४१॥

कृषिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः ॥
सेवाऽनूपं नृपो भैक्षमापत्तौ जीवनानि (४)च ॥ ४२ ॥

(वी० मि०) कृष्यादीनां मध्ये अनापदि यस्य या वृत्तिः प्रतिषिद्धा तस्याऽपत्तौ विपत्काले मासं जीवनोपाय इत्यर्थः । पूर्वं वैश्यवृत्तिशब्देन वाणिज्यमात्रमभिहितमतः कृषिरिहाऽभिहिता । शिल्पं चित्रादिककर्म, भृतिः व्यवस्थापितवेतनेन परप्रैष्यत्वं, विद्या गारुडादि, कुसीदं वृद्ध्यर्थं द्रव्यप्रयोगः, शकटं परकीयभारोद्वहनकारि, गिरिर्विक्रयार्थाहरणीयतृणादेराधारः, सेवा वेतनव्यवस्थां विना परचित्तानुवर्तनम्, अनूपं प्रचुरतृणजलवृक्षमयोगवादिपालनोपयोगी देशः, नृपः निन्दितप्रतिग्रहदानदाता, भैक्षं भिक्षासमूहः क्षत्रि-

---

(१) निगच्छति ख. । (२) हीनतरस्ततो ख. । (३) वा नैवैनसा ख. ।
(४) तु—इति मु० पु० पाठः ।

यादेरपि । चकारेण शाकिन्यादिसमुच्चयः । तदाह छागलेयः—

शकटः शाकिनी भावो जालमस्यन्दनं वनम् ।
अनूपं पर्वतो राजा दुर्भिक्षे नव वृत्तयः ॥

शाकिनी शाकाद्युत्पत्तिहेतुर्वाटिका । अस्यन्दनं स्वस्थानापरित्यागः ॥ ४२ ॥

(मिता०) किञ्च—

कृषिरिति । आपत्तौ जीवनानीति विशेषणात्कृष्यादीनां मध्ये अनापदवस्थायां यस्य या वृत्तिः प्रतिषिद्धा तस्य सा वृत्तिरनेनाभ्यनुज्ञायते । यथापदि वैश्यवृत्तिः स्वयंकृता कृषिर्विप्रक्षत्रिययोरभ्यनुज्ञायते । एवं शिल्पादीन्य(१)प्यभ्यनुज्ञायन्ते । शिल्पं सूप(२)करणादि । भृतिः प्रेष्यत्वम् । विद्या भृतकाध्यापकत्वाद्या । कुसीदं वृद्ध्यर्थं द्रव्यप्रयोगः । तत् स्वयंकृतमभ्यनुज्ञायते । शकटं भाटकेन धान्यादिवहनद्वारेण जीवनहेतुः । गिरिस्तद्गततृणेन्धनद्वारेण जीवनम् । सेवा परचित्तानुवर्तनम् । अनूपं प्रचुरतृणवृक्षजलप्रायः प्रदेशः । तथा नृपो नृपयाचनम् । भैक्षं स्नातकस्यापि । एतान्यापत्तौ जीवनानि । तथा च मनुः (१०।११६)—'विद्याः शिल्पं भृतिः सेवा गोरक्षा विपणिः कृषिः । गिरिर्भैक्षं कुसीदं च दश जीवनहेतवः' ॥ इति । ४२ ॥

बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत् ॥
प्रतिगृह्य तदाख्येयमुभियुक्तेन धर्मतः ॥ ४३ ॥

(वी० मि०) कृष्यादीनामाप(३)वृत्तीनामप्यसम्भवेन त्र्यहं बुभुक्षितः स्थित्वा ब्राह्मणभिन्नात्खलक्षेत्रादिस्थं धान्यमेकाहपर्याप्तं चौर्येण हरेत् । प्रतिगृह्य च तद्धान्यं धर्मतः स(४)म्यानुसारेणाऽऽख्येयं 'क्षुधा पीडितेन मया अमुकस्य धान्यं गृहीत'मिति । यदि राजादिनाऽभियोगः क्रियते, तदाह मनुः—

तथैव सप्तमे भक्ते भक्तानि पञ्चसप्तता ।
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ॥

इति ॥ ४३ ॥

(मिता०) यदा कृष्यादीनामपि जीवनहेतूनामसम्भवस्तदा कथं

---

(१) न्यंप्यस्याभ्यनुज्ञायन्ते । (२) रूपकरणादि ङ ।
आपदुक्ताना०—इति ख० पु० पाठः । (४) शक्त्यनु०—इति ख० पु० पाठः ।

जीवनमित्यत आह—

बुभुक्षित इति । धान्याभावेन त्रिरात्रं बुभुक्षितोऽनश्नन् स्थित्वा अब्राह्मणाच्छूद्रात्तदभावे वैश्यात् तदभावे क्षत्रियाद्वा हीनकर्मण एकाहपर्याप्तं (१)धान्यमाहरेत् । यथाह मनुः (६-११७)—'तथैव सप्तमे भक्ते भक्तानि षडनश्नता । अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः' ॥ इति । तथा च प्रतिग्रहोत्तरकालं यदपहृतं तद्धर्मतो यथावृत्तमाख्येयम् । यदि (२)नास्तिकेन स्वामिना त्वयेदं किं (३)नामापहृतमित्यभियुज्यते । यथाह मनुः—'खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते । आख्यातव्यं तु तत्तस्मै पृच्छते यदि पृच्छति' ॥ इति ॥ ४३ ॥

(वी० मि०) एवं चोरयितुरदण्डनीयत्वं सूचयन्नेव तादृशापद्ग्रस्ते राजकृत्यमाह—

तस्य वृत्तं कुलं शीलं श्रुतमध्ययनं सु(४)तान् ॥
ज्ञात्वा राजा कुटुम्बा(५)र्थं धर्म्यां वृत्तिं प्रकल्पयेत् ॥४४॥

तस्य त्र्यहोपवासानन्तरं धान्यचौर्यकर्तुर्विप्रादिकं ज्ञात्वा साधुत्वेन तं निश्चित्य सुतान् भृत्यवर्गान् तदीयान् ज्ञात्वा तत्कुटुम्बभरणार्थं धर्मादनपेतां वृत्तिं राजा कल्पयेत् । अन्यथा त्वाह मनुः—

यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ।
तस्य सीदति तद्राष्ट्रं दुर्भिक्षव्याधिपीडितम् ॥

इति । श्रुताध्ययनयोः शब्दग्रहणार्थकतया भेदः ॥ ४४ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने आपद्धर्मप्रकरणम् ।

(मिता०) इदमपरमापत्प्रसङ्गाद्राज्ञो विधीयते—

तस्येति । योऽश(६)नायापरीतोऽवसीदति तस्य वृत्तमाचारं, कुलमाभिजात्यं, शीलमात्मगुणं, श्रुतं शास्त्रश्रवणं, अध्ययनं वेदाध्ययनं, तपः कृच्छ्रादि च परीक्ष्य राजा धर्मादनपेतां वृत्तिं प्रकल्पयेत् । अन्यथा तस्य(७) दोषः । तथा च मनुः [७।१३४]—'यस्य

---

(१) धान्यं हरेत् । (२) नास्तिकेन । (३) ममापहृतमिति ख. ।
(४) तंपः—इति मु० पु० पाठः । (५) कुटुम्बं च—इति मु० पु० पाठः ।
(६) योऽशनया ख. । (७) राज्ञो दोषः ङ. ।

राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा । तस्य सीदति तद्राष्ट्रं दुर्भिक्षव्याधिपीडितम्' ॥ इति ॥ ४४ ॥

इत्यापद्धर्मप्रकरणम् ।

(वी० मि०) चतुर्णामाश्रमिणां मध्ये ब्रह्मचारिगृहस्थयोर्धर्मा अभिहिताः, इदानीं वानप्रस्थधर्मानाह सम्पूर्णप्रकरणेन—

सुतविन्यस्तपत्नीकस्तया (१)चाऽनुगतो वनम् ॥
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ॥ ४५ ॥

वने प्रकर्षेण नियमविशिष्टेन तिष्ठतीति वनप्रस्थः, वनप्रस्थ एव वानप्रस्थः इति भाविनी संज्ञा । सुते भरणार्थं समर्पितपत्नीकः, पत्न्याः पतिपरिचर्याभिलाषित्वे तया पत्न्याऽनुगतो ब्रह्मचारी मैथुननिवृत्तः साग्निः त्रेताग्निसहितः सोपासनो गृह्याग्निसहितश्च वनं व्रजेत् । प्रस्थानसमय एव पत्नी पतिकर्तृकाग्निहोत्रमनुमन्यत इति सुतविन्यासपक्षेऽग्नेर्नयनं घटते ॥ ४५ ॥

(मिता०) चतुर्णामाश्रमिणां मध्ये ब्रह्मचारिगृहस्थयोर्धर्माः प्रतिपादिताः । साम्प्रतमवसरप्राप्तान्वानप्रस्थधर्मान्प्रतिपादयितुमाह—

सुतेति । वने प्रकर्षेण नियमेन च तिष्ठति चरतीति वनप्रस्थः वनप्रस्थ एव वानप्रस्थः । संज्ञायां दैर्घ्यम् । भाविनीं वृत्तिमाश्रित्य वनं प्रतिष्ठासुरिति यावत् । असौ सुतविन्यस्तपत्नीकः त्वयेवं भरणीयेत्येवं सुते विन्यस्ता विक्षिप्ता पत्नी येन स तथोक्तः । यदि सा पतिपरिचर्याभिलाषेण स्वयमपि वनं जिगमिषति तदा तयानुगतो वा सहितः तथा ब्रह्मचारी ऊर्ध्वरेताः साग्निर्वैतानाग्निसहितः तथा सोपासनो गृह्याग्निसहितश्च वनं व्रजेत् । सुतविन्यस्तपत्नीक इति वदता कृतगार्हस्थ्यो (२)वनवासेऽधिक्रियत इति दर्शितम् । एतच्चाश्रमसमुच्चयपक्षमङ्गीकृत्योक्तम् । इतरथा 'अविप्लुतब्रह्मचर्यो यमिच्छेत्तु तमावसेत्' इत्यकृतगार्हस्थ्योऽपि वनवासेऽधिक्रियत एव । अयं च वनप्रवेशो जराजर्जरकलेवरस्य जातपौत्रस्य वा । यथाह मनुः (६।२)—'गृहस्थस्तु यदा पश्येद्व-

---

(१) चाऽनुगतो—इति मु० पु० पाठः । (२) वानप्रस्थो वनवासे ख. ।

लीपलितमात्मनः । अपत्यस्यैव वाऽपत्यं तदारण्यं समाश्रयेत्' ॥ इति । अयं च पुत्रेषु पत्नीनिक्षेपो विद्यमानभार्यस्य । मृतभार्यस्याप्यापस्तम्बादिभिः वनवासस्मरणात् । अतो 'यत् दाहयित्वाऽग्निहोत्रेणे'ति पुनराधानविधानं तदपरिपक्वकषायविषयम् । साग्निः सोपासन इत्यत्रापि (१)यदार्धाधानं कृतं तदा श्रौताग्निभिर्गृह्येण च सहितो वनं व्रजेत् । सर्वाधानं तु श्रौतैरेव केवलम् । यदि कथञ्चिज्ज्येष्ठभ्रातुरनाहिताग्नित्वादिना श्रौताग्नयोऽनाहिताःस्तर्हि केवलं सोपासनो व्रजेदित्येवं विवेचनीयम् । अग्निनयनं च तान्निर्वर्त्याग्निहोत्रादिकर्मसिद्ध्यर्थम् । अत एव मनुः (६।९)--'वैतानिकं च जुहुयादग्निहोत्रं यथाविधि । (२)दर्शमस्कन्दयन्पर्व पौर्णमासं च शक्तितः' ॥ इति । ननु च पुत्रनिक्षिप्तपत्नीकस्य तद्विरहिणः कथमग्निहोत्रादिकर्मानुष्ठानं घटते । पत्न्या सह यष्टव्यमिति सहाधिकारनियमात् । सत्यमेवं, किन्त्वत्र पत्नीनिक्षेपविधिबलादेव(३)तन्नरपेक्ष्येणाधिकारः कल्प्यते । यथा हि रजस्वलायां 'यस्य (४)व्रत्येऽहनि पत्न्याना(५)लम्भुका स्यात्तामप(६)रुध्य यजेते'त्यपरोधविधिबलात्तन्निरपेक्षता । यद्वा वनं प्रतिष्ठमानमेव पतिं पत्न्यनुमन्यत इति न विरोधः । न च यथा ब्रह्मचारिणा विधुरस्य वा वनं प्रस्थितस्याग्निहोत्रादिपरिलोपस्तथा निक्षिप्तपत्नीकस्याप्यग्निहोत्राद्यभाव इति शङ्कनीयम् । अपाक्षिकत्वेन श्रवणात् । न च ब्रह्मचारिविधुरयोरप्यग्निसाध्यकर्मस्वनधिकारः । पञ्चममासादूर्ध्वमाहितश्रावणिकाग्नेस्तदधिकारदर्शनात् । 'वानप्रस्थो जटिलश्चीराजिनवासा नखलोमकृष्टमधितिष्ठेत् अकृष्टं मूलफलं सञ्चिन्वीत ऊर्ध्वरेताः क्ष्माशयो दद्यादेव न प्रतिगृह्णीयादूर्ध्वं पञ्चभ्यो मासेभ्यः श्रावणिके(७)नाग्निनाधायाहितार्ग्निर्वृक्षमूलको दद्याद्देवपितृमनुष्येभ्यः स गच्छेत्स्वर्गमानन्त्यम्' इति वासिष्ठस्मरणात् । चीरं वस्त्रखण्डो वल्कलं वा । न फालकृष्टमधितिष्ठेत्कृष्टक्षेत्रस्योपरि न निवसेत् । श्रावणिकेन वैदिकेन मार्गेण न लौकिकेनेत्यर्थः ॥ ४५ ॥

---

(१) अर्धाधानं स्मृतं श्रौतस्मार्ताग्न्योस्तु पृथक्कृतिः । सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रया ॥ त्रेतापरिग्रहः सर्वाधानम् । (२) दर्शमास्कन्दयन् न. ङ ।
(३) तन्निरपेक्षेणाधिकारः ङ. । (४) व्रात्येऽहनि ङ. । (५) लम्भिका ङ. ।
(६) अवरुध्य यजेतेत्यवरोध. क. ख । (७) नाग्निमाधायः ख. ।

अफालकृष्टेनाग्नींश्च पितॄन् देवातिथीनपि ॥
भृत्यांश्च तर्पयेच्छ्मश्रुजटालोमभृदात्मवान् ॥ ४६ ॥

(वी० मि०) कर्षणं विनैवोत्पन्नेन नीवारादिनाऽग्न्यादीन् तर्पयेत्। अग्नितर्पणमग्निहोत्रम्। आद्येन चकारेणाऽग्निहोत्रसाधनगोमयादिद्रातृगवां, चरमेण स्वस्य समुच्चयः। अपिकारेण बलिकर्दमोद्देश्यभूतसमुच्चयः। लोमपदेन कक्षादिस्थं लोम विवक्षितम्।

जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च।

इति मनुः। आत्मवानात्मोपासनरतः सन् ॥ ४६ ॥

(मिता०) 'साग्निः सोपासनो व्रजे'दित्येतदग्निसाध्यश्रौतस्मार्तकर्मानुष्ठानार्थमित्युक्तं, तत्र गुणविधिमाह—

अफालेति। फालग्रहणं कर्षणसाधनोपलक्षणम्। अकृष्टक्षेत्रोद्भवेन नीवारवेणुश्यामाकादिना अग्नींस्तर्पयेदग्निसाध्यानि कर्माण्यनुतिष्ठेत्। चशब्दाद्भिक्षादानमपि तेनैव कुर्यात्। तथा पितॄन्देवानतिथीन् अपिशब्दाद् भूतान्यपि तेनैव तर्पयेत। तथा भृत्यान् चशब्दादाश्रमप्राप्तानपि। तथा च मनुः (६।७)—'यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः। अम्मूलफलभिक्षाभिर्वर्तयेदाश्रमागतान्' ॥ इति। एवं पञ्चमहायज्ञान्कृत्वा स्वमपि तच्छेषमेव भुञ्जीत। (६।१२) 'देवताभ्यश्च तद् हुत्वा वन्यं मेध्यतरं हविः। शेषमात्मनि युञ्जीत लवणं च स्वयंकृतम्' ॥ इति मनुस्मरणात्। स्वयंकृतमूषरलवणम्। एवं भोजनार्थं यागाद्यर्थं च मुन्यन्ननियमाद्ग्राम्याहारपरित्यागोऽर्थसिद्धः। अत एव मनुः (६।३)—'संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम्' इति। ननु च दर्शपूर्णमासादेर्व्रीह्यादिग्राम्यद्रव्यसाध्यत्वात्कथं तत्परित्यागः। न च वचनीय(१)मफालकृष्टेनाग्नींश्चेति विशेषवचनसामर्थ्याद्व्रीह्यादिबाध इति। विशेषविषयेणापि स्मृत्या श्रुतिबाधस्यान्याय्यत्वात्, अफालकृष्टविधेश्च स्मार्ताग्निसाध्यकर्मविषयत्वेनाप्युपपत्तेः। सत्यमेवं किंत्वत्र व्रीह्यादेरप्यफालकृष्टत्वसम्भवान्न विरोधः। अत एवोक्तं मनुना (६।११)—'वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः। पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक्' ॥ इति। नीवारादीनां मुन्यन्नानां स्वयमुत्पन्नानां स्वतो मेध्यत्वे सिद्धे-

(१) अकालकृष्ट ख. ।

ऽपि पुनर्मेध्यग्रहणं यज्ञार्हव्रीह्यादिप्राप्त्यर्थं कृतम् । मेधो यज्ञस्तदर्हं मेध्यमिति । तथा श्मश्रूणि मुखजानि रोमाणि जटारूपांश्च शिरोरुहान्कक्षादीनि च रोमाणि बिभृयात् । रोमग्रहणं नखानामप्युपलक्षणम् । तथा च मनुः-'जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखांस्तथा' । इति । तथात्मवानात्मोपासनाभिरतः स्यात् ॥ ४६ ॥

अह्नो मासस्य षण्णां वा तथा संवत्सरस्य च ॥
अर्थस्य सञ्चयं कुर्यात् कृतमाश्वयुजे त्यजेत् ॥ ४७ ॥

(वी० मि०) दिवसस्य मासस्य चैकस्य षण्णां वा मासानां संवत्सरस्य वा सम्बन्धिभोजनयजनादिपर्याप्तस्याऽर्थस्य द्रव्यस्य नीवारादेः तथा धर्माविरुद्धप्रकारेण संचयं कुर्यात् । ततोऽधिकस्य कृतं सङ्गृहीतं विनियुक्तावशिष्टं च द्रव्यमाश्विने मासि त्यजेत् । पुनरन्यसंचयं कुर्यादित्यर्थः ॥ ४७ ॥

(मिता०) पूर्वोक्तद्रव्यसञ्चयनियममाह—

अन्ह इति । एकस्याह्नः सम्बन्धि भोजनयजनादिदृष्टादृष्टकर्मणः पर्याप्तस्यार्थस्य सञ्चयं कुर्यात् । मासस्य वा षण्णां मासानां वा सम्बन्धि कर्मपर्याप्तं सञ्चयं कुर्यात् नाधिकम् । यद्येवं क्रियमाणमपि कथञ्चिदतिरिच्यते तर्हि तदतिरिक्तमाश्वयुजे मासि त्यजेत् ॥ ४७ ॥

दान्तस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात् ॥
स्वाध्यायवान् दानशीलः सर्वभूत(१)हिते रतः ॥ ४८ ॥
दन्तोलूखलिकः कालपक्वाशी वाऽश्मकुट्टकः ॥
श्रौतं स्मार्तं फलस्नेहैः कर्म कुर्यात्तथा क्रियाः ॥ ४९ ॥

(वी० मि०) दान्तः शीतातपादिदुःखसहिष्णुः, त्रिषु सवनेषु स्नानशीलः प्रतिग्रहात् शब्दसमुच्चिताद्याजनादेश्च निवृत्तः, स्वाध्यायवान् वेदाभ्यासरतः, फलमूलभिक्षादिदानशीलः, सर्वेषां भूतानां प्राणिनां हिताचरणे रतः, दन्ता एवोलूखलं निस्तुषीकरणसाधनं यस्य सः, कालवशेन यत्नतः पक्वं बदरीफलनीवारादि तदशनशीलः, अश्मना कुट्टकोऽवहननकर्ता । वाशब्दात् 'अग्निपक्वाशनो वा स्या'दिति मनूक्तसङ्ग्रहः । श्रौतमग्निहोत्रादि स्मार्तं वैश्वदेवादि अव-

(१) सत्त्व-- इति मु० पु० पाठः ।

श्यकर्तव्यतया बोधितं, क्रिया भोजनभृत्यभरणाद्याश्च मेध्यतरुफलोद्भवैः स्नेहघृतस्थानीयैर्न तु घृतैस्तथा विधिबोधितप्रकारेण कुर्यात् ॥ ४८-४९ ॥

(मिता०) किञ्च—

दान्तेति । दान्तो दर्परहितः । त्रिषु सवनेषु प्रातर्मध्यन्दिनापराह्णेषु स्नानशीलः । तथा प्रतिग्रहपराङ्मुखः । चशब्दाद्याजनादिनिवृत्तश्च । स्वाध्यायवान् वेदाभ्यासरतः । तथा फलमूलभिक्षादिदानशीलः । सर्वप्राणिहिताचरणनिरतश्च भवेत् ॥ ४८ ॥

(मिता०) किञ्च—

दन्तेति ।दन्ता एवोलूखलं निस्तुषीकरणसाधनं दन्तोलूखलं तद्यस्यास्ति स दन्तोलूखलिकः।कालेनैव पक्वं कालपक्वं नीवारवेणुश्यामाकादि बदरेङ्गुदादिफलं च तदशनशीलः कालपक्वाशी । वाशब्दो 'अग्निपक्वाशनो वा स्यात्कालपक्वभुगेव वा' इति मनूक्ताग्निपक्वाशित्वाभिप्रायः । अश्मकुट्टको वा भवेत् । अश्मना कुट्टनमवहननं यस्य स तथोक्तः । तथा श्रौतं स्मार्तं च कर्म दृष्टार्थांश्च भोजनाभ्यञ्जनादिक्रियाः लकुचमधूकादिमेध्यतरुफलोद्भवैः स्नेहद्रव्यैः कुर्यान्न तु घृतादिकैः । तथा च मनुः [६।१३]—'मेध्यवृक्षोद्भवानद्यात्स्नेहांश्च फलसम्भवान्' इति ॥ ४९ ॥

चान्द्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्तयेत्सदा ॥
पक्षे गते वाऽप्यश्नीयान्मासे वाऽहनि वा गते ॥ ५० ॥

(वी०मि०) चान्द्रायणैः सदा कालं नयेत् । प्राजापत्यादिभिः कृच्छ्रैर्वा कालं वर्तयेत् । सदेति सर्वान्वितम् । मासे पक्षे वा गतेऽहन्येकस्मिन् वा गतेऽश्नीयात्, न तु गृहस्थवत् प्रत्यहमित्यर्थः । अपिकारेणाष्टमकालिकादिसमुच्चयः ।

चतुर्थकालिको वा स्यात् यद्वाऽप्यष्टमकालिकः ।

इति मनुवचनात् ॥ ५० ॥

(मिता०) पुरुषार्थतया विहितद्विर्भोजननिवृत्त्यर्थमाह—

चान्द्रायणैरिति । चान्द्रायणैर्वक्ष्यमाणलक्षणैः कालं नयेत् । कृच्छ्रैर्वा प्राजापत्यादिभिः कालं वर्तयेत् । यद्वा पक्षे पञ्चदशदिनात्मकेऽतीतेऽश्नीयात् मासे वाऽहनि गते वा नक्तमश्नीयात् । अपि-

शब्दाच्चतुर्थकालिकत्वादिनापि । यथाह मनुः (६।१९) 'नक्तं वान्नं समश्नीयाद्दिवा वाऽऽहृत्य शक्तितः । चतुर्थकालिको वा स्याद्यद्वाप्यष्टमकालिकः' ॥ इति । एतेषां च कालनियमानां स्वशक्त्यपेक्षया विकल्पः ॥ ५० ॥

शुचिर्भूमौ (१)स्वपेद्रात्रौ दिवा सम्प्रपदैर्नयेत् ॥
स्नानासनविहारैर्वा योगाभ्यसेन वा तथा ॥ ५१ ॥

(वी०मि०) रात्रौ शुचिः सन् भूमौ न तु खट्वादौ स्वपेत् । दिवा दिवसं समीचीनैर्धर्माजकैः प्रपदैः सृतैः स्थानेनोर्ध्वावस्थानेन आसनेनोपवेशन विहारेणोपनिषच्छ्रवणलीलया तथा योगाभ्यासेन नयेत् न तु स्वपेत् ।

मनुः—

विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ।

शृणुयादिति सम्बध्यते । तथा—

भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम् ॥

इति ॥ ५१ ॥

(मिता०) किंच—

स्वप्यादिति । आहारविहारावसरवर्ज्यं रात्रौ शुचिः प्रयतः स्वप्यात् नोपविशेन्नापि तिष्ठेत । दिवा स्वप्नस्य पुरुषमात्रार्थतया प्रतिषिद्धत्वान्न तन्निवृत्तिपरम् । तथा भूमावेव स्वप्यात् । तच्च भूमावेव न शय्यान्तरितायां मञ्चकादौ वा । दिनं तु संप्रपदैरटनैर्नयेत् । स्थानासनरूपैर्वा विहारैः संचारैः काञ्चित्कालं स्थानं काञ्चिच्चोपवेशनमित्येव वा दिनं नयेत् । योगाभ्यासेन वा । तथा च मनुः (६।२२)—'विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः' इति । आत्मनः संसिद्धये ब्रह्मत्वप्राप्तये । तथाशब्दात्क्षितिपरिलोडनाद्वा नयेत् । (६।२२)—'भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम्' इति मनुस्मरणात् । प्रपदैः पादाग्रैः ॥ ५१ ॥

ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः ॥
आर्द्रवासाश्च हेमन्ते शक्त्या वापि तपश्चरेत् ॥ ५२ ॥

(वी०मि०) 'त्रयस्तुः संवत्सरो ग्रीष्मो वर्षा हेमन्तश्चे'ति । तत्र

(१) स्वप्याद् भूमौ शुची रात्रौ—इति मु० पु० पाठः ।

ग्रीष्मे चैत्रादिमासचतुष्टये पञ्चाग्निमध्यस्थः तपः पञ्चाग्निसेवनरूपं चरेत्। चतुर्दिक्षु चत्वारोऽग्नय उपरि च सूर्यात्मकोऽग्निरित्येवं पञ्चाऽग्नयः। वर्षासु स्थण्डिलेशयो वर्षाधारानिवारणविरहिभूतलशायी स्थण्डिलशयनरूपं तपश्चरेत्। हेमन्ते त्वार्द्रवासाः तादृशवस्त्रधारणं सार्वकालिकं तपश्चरेत्। एवंविधस्तपश्चरणेऽशक्तः स्वसामर्थ्यानुसारेण शरीरशोषकं तपोन्तरमाचरेत्। आपशब्देनाऽनुकल्पत्वं चरमपक्षस्य सूचितम्॥ ५२॥

(मिता०) किञ्च—

ग्रीष्म इति। 'ऽयर्तुः संवत्सरो ग्रीष्मो वर्षा हेमन्तः' इति दर्शनात् ग्रीष्मे चैत्रादिमासचतुष्टये चतसृषु दिक्षु चत्वारोऽग्नयः उपरिष्टादादित्य इत्येवं पञ्चानामग्नीनां मध्ये तिष्ठेत्। तथा वर्षासु श्रावणादिमासचतुष्टये स्थण्डिलेशयः वर्षाधाराविनिवारणविरहिणि भूतले निवसेत्। हेमन्ते मार्गशीर्षादिमासचतुष्टये क्लिन्नं वासो वसीत। एवंविधतपश्चरणे असमर्थः स्वशक्त्यनुरूपं वा तपश्चरेत्। यथा शरीरशोषस्तथा यतेत। (६।२४)—'तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः' इति मनुस्मरणात्॥ ५२॥

यः कण्टकैर्विंतुदति चन्दनैर्वाऽनुलिम्पति(?)॥
अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य च॥ ५३॥

(वी० मि०) कण्टकैस्तु यो विशेषतस्तुदति व्यथयति तस्याऽक्रुद्धः यश्चन्दनैस्तमनुलिम्पति तस्याऽपरितुष्टः उभयोश्च समः उदासीनः स्यात्। षष्ठी विषयत्वपरा। चकारेणोदासीनस्य हर्षशोकाभावयोश्च समुच्चयः॥ ५३॥

(मिता०) किञ्च—

य इति। यः काश्चित्कण्टकादिभिर्विविधमङ्गानि तुदति व्यथयति तस्मै न क्रुध्येत्। यश्चन्दनादिभिरुपलिम्पति सुखयति तस्य न परितुष्येत्। किं तु तयोरुभयोरपि समः स्यादुदासीनो भवेत्॥ ५३॥

(वी० मि०) अग्नसञ्चयाक्षमत्वेनाऽग्निहोत्राद्यसम्भवे त्वाह—

अग्नीन्वाऽप्यात्मसात्कृत्वा वृक्षवासो मिताशनः॥
वानप्रस्थगृहेष्वेव यात्रार्थं भैक्षमाचरेत्॥ ५४॥

---

(१) चन्दनैर्यश्च लिम्पति—इति मु० पु० पाठः।

ग्रामादाहृत्य वा ग्रासानष्टौ भुञ्जीत वाग्यतः ॥
वायुभक्षः प्रागुदीचीं गच्छेदावर्ष्मसंक्षयात् ॥ ५५ ॥

वैखानसशास्त्रोक्तविधिनाऽग्नीनात्मनि समारोप्य मूलफलादिना जीवनार्थं वृक्ष एव आवासो वासस्थलं यस्य स, मिताशनः परिमितभोजी स्यात् । तदसम्भवे वानप्रस्थानां गृहेषु भैक्षं यात्रार्थं प्राणरक्षणार्थमाचरेत् । एवकारेण गृहस्थव्यवच्छेदः । ततो जीवनासम्भवे ग्रामाद्ग्रामवासिनो गृहस्थसमुदायादाहृत्य अष्टौ ग्रासान् तावता प्राणधारणासम्भवे तु षोडश ग्रासान् वाग्यतो मौनी भूत्वा भुञ्जीत । सर्वत्राऽसमर्थस्तु आवर्ष्मसंक्षयात् शरीररक्षणपर्यन्तं वायुभक्षः सन् प्रागुदीचीमैशानीं दिशमकुटिलगतिर्गच्छेत् । स्मृत्यन्तरे—

अष्टौ ग्रासा मुनैर्भैक्षं वानप्रस्थस्य षोडश ।

मनुः—

अग्नीनात्मनि वैतानान् समारोप्य यथाविधि ।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥

तथा—

अपराजितां वास्थाय गच्छेद्दिशमजिह्मगः ।

स्मृतिः—'वानप्रस्थो वीराध्वानं ज्वलनाम्बुप्रवेशनं भृगुप्रपतनं वाऽनुतिष्ठेत्' । अस्मिन् वानप्रस्थाश्रमे ब्राह्मणक्षत्रिययोरेवाऽधिकारः ।

चत्वारो ब्राह्मणस्योक्ता आश्रमा श्रुतिदर्शिताः ।
क्षत्रियस्य त्रयः प्रोक्ता द्वावेको वैश्यशूद्रयोः ॥

इति योगिसंहितायां ग्रन्थकृताऽभिहितत्वादिति ॥ ५३–५५ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने वानप्रस्थप्रकरणम् ॥

(मिता०) अग्निपरिचर्याक्षमं प्रत्याह—

अग्नीनिति । अग्नीनात्मनि समारोप्य वृक्षावासो वृक्ष एव आवासः कुटी यस्य स तथोक्तः । मिताशनः स्वल्पाहारः । अपिशब्दात्फलमूलाशनश्च भवेत् । यथाह मनुः (६।२५)—'अग्नीनात्मनि वैतानान्समारोप्य यथाविधि । अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः' ॥ इति । मुनिर्मौनव्रतयुक्तः । फलमूलासंभवे च यावता प्राणधारणं भवति तावन्मात्रं भैक्षं वानप्रस्थगृहेष्वाचरेत् ॥ ५४ ॥

(मिता०) यदा तु तदसंभवो व्याध्यभिभवो वा तदा किं कार्यं

मित्यत आह—

ग्रामादिति। ग्रामाद्वा भैक्षमाहृत्य वाग्यतो मौनी भूत्वा अष्टौ ग्रासान्भुञ्जीत। ग्राम्यभैक्षविधानान्मुन्यन्नानियमोऽर्थलुप्तः। यदा पुनरष्टाभिर्ग्रासैः प्राणधारणं न संभवति तदा 'अष्टौ ग्रासा मुनेर्भैक्षं वानप्रस्थस्य षोडशे'ति स्मृत्यन्तरोक्तं द्रष्टव्यम्॥

(मिता०) सकलानुष्ठानासमर्थं प्रत्याह—

वायुभक्ष इति। अथवा वायुरेव भक्षो यस्यासौ वायुभक्षः प्रागुदीचीमैशानीं दिशं गच्छेत्। आवर्म्मसंक्षयात् वर्म्म वपुस्तस्य निपातपर्यन्तमकुटिलगतिर्गच्छेत्। यथाह मनुः—(६।३१)—'अपराजितां वास्थाय गच्छेद्दिशमाजिह्मगः' इति। महाप्रस्थानेऽप्यशक्तौ भृगुपतनादिकं वा कुर्यात्। 'वानप्रस्थो वी(१)राध्वानं ज्वलनाम्बुप्रवेशनं भृगुपतनं वानुतिष्ठेत्' इति स्मरणात्। स्नानाचमनादिधर्माब्रह्मचारिप्रकरणाद्यभिहिताश्चाविरोधिनोऽस्यापि भवन्ति। 'उत्तरेषां चैनदविरोधि' इति गौतमस्मणात्। एवं प्रागुदितैन्द्र्वादिदीक्षामहाप्रस्थानपर्यन्तास्तनुत्यागान्तमनुतिष्ठन्ब्रह्मलोके पूज्यतां प्राप्नोति। यथाह मनुः (६।३२)—'आसां महर्षिचर्याणां त्यक्त्वाऽन्यतमया तनुम्। वीतशोकभयो विप्रो ब्रह्मलोके महीयते' ॥ इति। ब्रह्मलोकः स्थानविशेषो न तु नित्यं ब्रह्म। तत्र लोकशब्दस्याप्रयोगात्। तत्र तुरीयाश्रममन्तरेण मुक्त्यनङ्गीकाराच्च। न च 'योगाभ्यासेन वा पुनः' इति ब्रह्मोपासनविध्यनुपपत्त्या तद्भावापत्तिः परिशङ्कनीया। सालोक्यादिप्राप्त्यर्थत्वेनापि तदुपपत्तेः। अत एव श्रुतौ 'त्रयो धर्मस्कन्धा' इत्युपक्रम्य 'यज्ञोऽध्ययनं दानमिति प्रथमः, तप एवेति द्वितीयः, ब्रह्मचर्याचार्यकुलवासी तृतीयः। अत्यन्तमाचार्यकुल एवमात्मानमवसादयन्निति गार्हस्थ्यवानप्रस्थनैष्ठिकत्वस्वरूपमभिधाय सर्व एते पुण्यलोका भवन्तीति त्रयाणामाश्रमिणां पुण्यलोकप्राप्तिमभिधाय 'ब्रह्मसंस्थोऽमृतत्वमेति' इति पारिशेष्यात्परिव्राजकस्यैव ब्रह्मसंस्थस्य मुक्तिलक्षणामृतत्वप्राप्तिरभिहिता। यदपि 'श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते' इति गृहस्थस्यापि मोक्षप्रतिपादनं तद्भवान्तरानुभूतपारिव्रज्यस्येत्यवगन्तव्यम्॥ ५५॥

इति वानप्रस्थधर्मप्रकरणम्।

(१) वीराधानं ङ।

(वी० मि०) अथ क्रमप्राप्तान् संन्यासिधर्मानभिधास्यन् चतुर्थमाश्रमं प्रस्तौति—

वनाद् गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् ॥
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ॥ ५६ ॥
अधीतवेदो जनकृत् पुत्रवानन्नदोऽग्निमान् ॥
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ॥ ५७ ॥

वनाद्वानप्रस्थाश्रमात् गृहात् गृहस्थश्रमात् वाशब्देनाऽनास्थावानचिना ब्रह्मचर्याश्रमाद्वा काषायपरिपाके सति मोक्षे मोक्षैके संन्यासाश्रमे मनः कुर्यात् । अस्मिन्नाश्रमे ब्राह्मणस्यैवाऽधिकारः, याज्ञवल्क्यवचनात् ।

आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ।

इत्यभिधाय—

एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः ॥

इत्युपसंहरता मनुना ब्राह्मणस्यैवाऽधिकारबोधनाच्च । 'ब्राह्मणाः प्रव्रजन्ती'ति श्रुतेश्च । सार्ववेदसी सर्वधनसम्बन्धिनी दक्षिणा यस्यास्तां प्रजापतिदेवताकामिष्टिं ब्रह्मचारिभिन्नः साग्निश्चेत्तदा कृत्वा तदन्ते इष्टिकरणानन्तरं वैतानानग्नीनात्मनि श्रुत्युक्तविधानेनाऽऽरोप्य कृत्वेत्यनेन मनः कुर्यादित्येतत्प्रतिबन्धाद्यनिष्टस्यानन्तर्यबोधनेऽपि नेष्टिकरणाग्निसमारोपणयोः पूर्वापरभावो बोधित इति तदन्त इत्यस्य नानर्थक्यम् । पुत्रवानिति कृतदारपरिग्रहपरम् । आद्यचकारात् 'उदगयने पौर्णमास्यां पुरश्चरणमादौ कृत्वा शुद्धेन कायेनाऽष्टौ श्राद्धानि निर्वपेत् द्वादश वे'ति बौधायनाद्युक्तेतिकर्तव्यतासमुच्चयः । द्वितीयचकारेण नित्यनैमित्तिककर्मान्तरकृदिति समुच्चितम् । तुशब्देन यथेच्छाचरणस्य संन्यासाधिकारो व्यवच्छिद्यते । नान्यथेति इष्टिकरणादीतिकर्तव्यतां विना न संन्यासाश्रमपरिग्रहः कार्य इत्यर्थः । अत्र जाबालिः—'ब्रह्मचर्यं परिसमाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वे'ति । अथ 'जायमानो वै ब्राह्मणस्त्रिभिः ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इति श्रुतम् ।

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।

अनपाकृत्य मोक्षे तु सेवमानो व्रजत्यधः ॥

इति मनुना चोक्तः क्रमः । कथं ब्रह्मचारिणः संन्यासाधिकारः सङ्गच्छत इति चेत्—उच्यते, कृतदारपरिग्रहस्य पुत्रोत्पादनानन्तरमेव प्रव्रज्याधिकार इत्येतत्तात्पर्यकत्वमेतयोः श्रुतिमनुवाक्ययोः । अन्यथा सिद्धजाबालश्रुत्या ब्रह्मचारिणामधिकारसिद्धेरिति दिक् ॥५८-५९॥

(मिता०) वैखा(१)नसधर्माननुक्रम्य क्रमप्राप्तान्परिव्राजकधर्मान् सांप्रतं प्रस्तौति—

वनादित्यादि । यावता कालेन तीव्रतपःशोषितवपुषो विषयकषायपरिपाको भवति पुनश्च मदोद्भवाशङ्का नोद्भाव्यते तावत्कालं वनवासं कृत्वा तत्समनन्तरं मोक्षे मनः कुर्यात् । वनगृहशब्दाभ्यां तत्सम्बन्ध्याश्रमो लक्ष्यते । मोक्षशब्देन च मोक्षैकफलकश्चतुर्थाश्रमः । अथवा गृहाद्गार्हस्थ्यादनन्तरं मोक्षे मनः कुर्यात् । अनेन च पूर्वोक्तश्चतुराश्रमसमुच्चयपक्षः पाक्षिक इति द्योतयति । तथा च-विकल्पो जाबालश्रुतौ श्रूयते—'ब्रह्मचर्यं परिसमाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा' इति । तथा गार्हस्थ्यो(२)त्तराश्रमबाधश्च 'गौतमेन दर्शितः—'ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधनाद्गार्हस्थ्यस्य' इति । एतेषां च समुच्चयविकल्पबाधपक्षाणां सर्वेषां श्रुतिमूलत्वादिच्छया विकल्पः । अतो यत्कैश्चित्पण्डितंमन्यैरुक्तम्—'स्मार्तत्वान्नैष्ठिकत्वादीनां गार्हस्थ्येन श्रौतेन वा बाधः गार्हस्थ्यानधिकृतान्धक्लीवादिविषयता वा' इति तत्स्वाध्यायाध्ययनैवधुर्यनिबन्धनमित्युपेक्षणीयम् । किं च-यथा विष्णुक्रमणाज्यावेक्षणाद्यक्षमतया पंग्वादीनां श्रौतेष्वनधिकारस्तथा स्मार्तेष्वप्युदकुम्भाहरणभिक्षाचर्यादिष्वक्षमत्वात्कथं पंग्वादिविषयतया नैष्ठिकत्वाद्याश्रमनिर्वाहः, अस्मिंश्चाश्रमे ब्राह्मणस्यैवाधिकारः । मनुः-(६।२५)-'आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद् गृहात्' । तथा (६।९७)—'एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः' इत्युपक्रमोपसंहाराभ्यां मनुना ब्राह्मणस्याधिकारप्रतिपादनात् । 'ब्राह्मणाः प्रव्रजन्ति' इति श्रुतेश्चाग्रजन्मन एवाधिकारो न द्विजातिमात्रस्य । अन्ये तु त्रैवर्णिकानां प्रकृतत्वात् 'त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः' इति सूत्रकारवचनाच्च द्विजातिमात्रस्या-

(१) वानप्रस्थधर्मान् ङ. । (२) गार्हस्थ्योत्तराश्रम० ख. ।

धिकारमाहुः । यदा वनाद् गृहाद्वा प्रव्रजति तदा सार्ववेदसदक्षिणां सार्ववेदसी सर्वधनसम्बन्धिनी दक्षिणा यस्याः सा तथोक्ता तां प्रजापतिदेवताकामिष्टिं कृत्वा तदन्ते तान्वैतानानग्नीनात्मनि श्रुत्युक्तविधानेन समारोप्य । चशब्दात् 'उदगयने पौर्णमास्यां पुरश्चरणमादौ कृत्वा शुद्धेन कायेनाष्टौ श्राद्धानि निर्वपेत् द्वादश वा' इति बौधायनोक्तं पुरश्चरणादिकं च कृत्वा तेषाधीतवेदो जपपरायणो जातपुत्रो दीनान्धकृपणार्थितार्थाय यथाशक्त्यन्नदश्च भूत्वाऽलाहिताग्निर्यष्ट्वादिना प्रतिबन्धाभावे कृताधानो नित्यनैमित्तिकान्यङ्गान्कृत्वा मोक्षे मनः कुर्यात् चतुर्थाश्रमं प्रविशेन्नान्यथा । अनेनानपाकृतर्णत्रयस्य गृहस्थस्य प्रवज्यायामनधिकारं दर्शयति । यथाह मनुः (६।३५)—'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः' ॥ इति । यदा तु ब्रह्मचर्यात्प्रव्रजति तदा न प्रजोत्पादनादिनियमः । अकृतदारपरिग्रहस्य तत्रानधिकारात् रागप्रयुक्तत्वाच्च विवाहस्य । न च ऋणत्रयापाकरणविधिरेव दारानाक्षिपतीति शङ्कनीयम् । विद्याधनार्जननियमवदन्यप्रयुक्तदारसंभवे तस्यानाक्षेपकत्वात् । ननु 'जायमानो वै ब्राह्मणस्त्रिभिः ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इति, जातमात्रस्यैव प्रजोत्पादनादीन्यावश्यकानीति दर्शयति । नैवम्, न हि जातमात्रः अकृतदाराग्निपरिग्रहो यज्ञादिष्वधिक्रियते । तस्मादधिकारी जायमानो ब्राह्मणादिर्यज्ञादीननुतिष्ठेदिति तस्यार्थः । अतश्चोपनीतस्य वेदाध्ययनमेवावश्यकम् । कृतदाराग्निपरिग्रहस्य प्रजोत्पादनमपीति निरवद्यम् ॥ ५६—५७ ॥

(वी० मि०) अथ चतुर्थाश्रमिणां कृत्यमाह—

सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ॥
एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ॥ ५८ ॥
अप्रमत्तश्चरेद्भैक्षं सायाह्नेऽनभिलक्षितः ॥
रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ॥ ५९ ॥
यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च ॥
सलिलं शुद्धिरेतेषां गोवालैश्चावधर्षणम् ॥ ६० ॥

सर्वेषां भूतानां प्राणिनां हितः अनिष्टनिवृत्ताशंसी न तु हितकर्ता 'हिंसानुग्रहयोरनारम्भी'ति गौतमवचनात् । शान्तो निगृहीतेन्द्रियः, त्रयो वैणवा दण्डा अस्येति त्रिदण्डी 'त्रीन्वैणवान् मूर्द्धप्रमाणान् दक्षिणेन पाणिना धारयेत्सव्येन कमण्डलु'मिति स्मृत्यन्तरात् । 'एकदण्डी त्रिदण्डी वे'ति तु बौधायनः । गौतमः—'मुण्डः शिखी परिशिष्टं यज्ञोपवीतमप्सु जुहोति भूःस्वाहेति । अथ दण्डमादत्ते सखे मां गोपाये'ति । सकमण्डलुरिति । शौचाद्यर्थं धृतकमण्डलुरित्यर्थः । एकोऽद्वितीय एवारमत इत्येकारामः । तदाह दक्षः—

एको भिक्षुर्यथोक्तश्च द्वावेव मिथुनं स्मृतम् ।
त्रयो ग्रामः समाख्यात ऊर्ध्वं तु नगरायते ॥
राजावर्तादि तेषां तु भिक्षावार्ता परस्परम् ।
अपि पैशुन्यमात्सर्यं सन्निकर्षान्न संशयः ॥

परिव्रज्य लौकिकवैदिककर्माणि विशिष्याऽनुक्तानि सन्त्यज्य भिक्षार्थी ग्राममाश्रयेदुपजीवेत् । सायाह्ने द्वादशमुहूर्तानन्तरं दिने ह्यप्रमत्तोऽनुद्धतः, अनभिलक्षितोऽप्रकटीकृतनिजमाहात्म्यः सन्नन्यैर्भिक्षुकै रहिते ग्रामे अलोलुपो बहुतरमिष्टान्नादिष्वनासक्तश्च सन् यात्रामात्रं प्राणस्थितिमात्रयोग्यं भैक्षं चरेत् । भिक्षार्थं यतेः पात्राणि मृत्तिकावंशकाष्ठसञ्जीवनीनामन्यतममयानि भवन्ति, न तु तैजसानि । एतेषां मृण्मयादीनां यतिपात्राणां सलिलं गोवालावघर्षणं च शुद्धिहेतुः । इयं भिक्षाचरणप्रयोगाङ्गत्वेनाऽत्र शुद्धिरभिहिता । उपघातजन्याशौचनिरासिका शुद्धिस्तु प्रागेवोक्ता । आद्यचकारेण भिक्षार्थपात्राणां भोजनार्थत्वमपि पात्रान्तराभावे समुच्चीयते । 'तद्भैक्षं गृहीत्वैकान्ते तेन पात्रेणाऽन्येन वा तूष्णीं मात्रया भुञ्जीते'ति देगलवचनात् । द्वितीयचकारो व्यवस्थितविकल्पार्थः । मृण्मयादीनां सलिलैरलाबुमयानां गोवालवर्षणैः शुद्धिरिति 'गोवालैः फलसम्भव'मिति प्रागुक्तसंवादात् ।

अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचं चमसानामिवाऽध्वरे ॥

इति मनुवचनस्वरसाच्च । यमः—

सुवर्णरूप्यपात्रेषु ताम्रकांस्यायसेषु च ।
भिक्षां दत्त्वा न धर्मोऽस्ति गृहीत्वा नरकं व्रजेत् ॥

इति ॥ ५७-६० ॥

(मिता०) एवमधिकारिणं निरूप्य तद्धर्मानाह—

सर्वेति । सर्वभूतेभ्यः प्रियाप्रियकारिभ्यो हित उदासीनो न पुनर्हिताचरणः । 'हिंसानुग्रहयोरनारम्भी' इति गौतमस्मरणात् । (१) शान्तो बाह्यान्तःकरणोपरतः । त्रयो दण्डा अस्य सन्तीति त्रिदण्डी । ते च दण्डा वैणवा ग्राह्याः । प्राजापत्येष्ट्यनन्तरं 'त्रीन्वैणवान्दण्डान्मूर्ध्नप्रमाणान्दक्षिणेन पाणिना धारयेत्सव्येन सोदकं कमण्डलुम्' इति स्मृत्यन्तरदर्शनात् । एकं वा दण्डं धारयेत् 'एकदण्डी त्रिदण्डी वा' इति बौधायनस्मरणात् । 'चतुर्थमाश्रमं गच्छेद्ब्रह्मविद्यापरायणः । एकदण्डी त्रिदण्डी वा सर्वसंगविवर्जितः' ॥ इति चतुर्विंशतिमते दर्शनाच्च । तथा शिखाधारणमपि वैकल्पिकम् । 'मुण्डः शिखी वा' इति गौतमस्मरणात् । 'मुण(२)डोऽममोऽक्रोधोऽपरिग्रहः' इति वसिष्ठस्मरात् । तथा यज्ञोपवीतधारणमपि वैकल्पिकमेव । 'संशिखान्केशान्निकृत्य विसृज्य यज्ञोपवीतम्' इति काठकश्रुतिदर्शनात् । 'कुटुम्बं पुत्रदारांश्च वेदाङ्गानि च सर्वशः । केशान्यज्ञोपवीतं च त्यक्त्वा गुढश्चरेन्मुनिः' ॥ इति वाष्कलस्मरणाच्च । 'अथ यज्ञोपवीतमप्सु जुहोति भूःस्वाहेति अथ दण्डमादत्ते सखे मां गोपाय' इति परिशिष्टदर्शनाच्च । यद्यशक्तिस्तदा कन्थापि ग्राह्या । 'कापायी मुण्डास्त्रिदण्डी सकमण्डलुपवित्रपादुकासनकन्थामात्र' इति देवलस्मरणात् । शौचाद्यर्थं कमण्डलुसहितश्च भवेत् । एकरामः प्रव्रजितान्तरेणासहायः संन्यासिनीभिः स्त्रीभिश्च । स्त्रीणां चैक इति बौधायनेन स्त्रीणामपि प्रव्रज्यास्मरणात् । तथा च दक्षः—'एको भिक्षुर्यथोक्तश्च द्वावेव मिथुनं स्मृतम् । त्रयो ग्रामः समाख्यात ऊर्ध्वं तु नगरायते ॥ राजवार्तादि तेषां तु भिक्षावार्ता परस्परम् । अपि पैशुन्यमात्सर्यं सान्निकर्षान्न संशयः' ॥ इति । परिव्रज्य परिपूर्वो व्रजतिस्त्यागे वर्तते । अतश्चाहं ममाभिमानं तत्कृतं च लौकिकं कर्मनिचयं वैदिकं च नित्यकाम्यात्मकं संत्यजेत् । तदुक्तं मनुना (१२,७८-९२)—'सुखाभ्युदयिकं चैव नैश्रेयसिकमेव च । प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥ इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते । निष्कामं

(१) शान्तः करणोपरतः क० । (२) मनोपरिग्रह ङ ।

ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ॥ यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः । आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्' ॥ इति । अत्र वेदाभ्यासः प्रणवाभ्यासस्तत्र यत्नवान् । भिक्षाप्रयोजनार्थं ग्राममाश्रयेत्प्रविशेत् न पुनः सुखनिवासार्थम् । वर्षाकाले तु न दोषः । 'ऊर्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी' इति शङ्खस्मरणात् । अशक्तौ पुनर्मासचतुष्टयपर्यन्तमपि स्थातव्यं 'न चिरमेकत्र वसेदन्यत्र वर्षाकालात् । श्रावणादयश्चत्वारो मासा वर्षाकालः' इति देवलस्मरणात् । 'एकरात्रं वसेद्ग्रामे नगरे रात्रिपञ्चकम् । वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतुरो वसेत्' ॥ इति कण्वस्मरणात् ॥ ५८ ॥

(मिता०) कथं भिक्षाटनं कार्यमित्यत आह—

अप्रमत्त इति । अप्रमत्तो वाक्चक्षुरादिचापलरहितो भैक्षं चरेत् । वसिष्ठेनात्र विशेषो दर्शितः-'सप्तागाराण्यसंकल्पितानि चरेद्भैक्षम्' इति । सायाह्ने अह्नः पञ्चमे भागे । तथा च मनुः (६।५६)-'विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने । वृत्ते शरावसंपाते नित्यं भिक्षां यतिश्चरेत्' ॥ इति । तथा-'एककालं चरेद्भिक्षां प्रस(१)ज्येन्न तु विस्तरे । भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति' ॥ इति । अनभिलक्षितः ज्योतिर्विज्ञानोपदेशादिना अचिह्नितः । मनुः (६।५०)-'न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया । नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्' ॥ इति तेनोक्तत्वादिति । यत्पुनर्वसिष्ठवचनम्-'ब्राह्मणकुले वा यल्लभेत तद्भुञ्जीत सायंप्रातर्मांसवर्जम्' इति । तदशक्तविषयम् । भिक्षुकैर्भिक्षणशीलैः पाखण्ड्यादिभिर्वर्जिते ग्रामे । मनुनात्र विशेष उक्तः (६।६१)-'न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा स्त्रीभिः । आकीर्णं भिक्षुकैरन्यैरगारमुपसंव्रजेत्' ॥ इति । यावता प्राणयात्रा वर्तते तावन्मात्रं भैक्षं चरेत् । तथा च संवर्तः-'अष्टौ भिक्षाः समादाय मुनिः सप्त च पञ्च वा । अद्भिः प्रक्षाल्य ताः सर्वास्ततोऽश्नीयाच्च वाग्यतः' ॥ इति । अलोलुपो मिष्टान्नव्यञ्जनादिष्वप्रसक्तः ॥ ५९ ॥

(मिता०) भिक्षाचरणार्थं पात्रमाह—

यतिपात्राणीति । मृदादिप्रकृतिकानि यतीनां पात्राणि भवेयुः । तेषां सलिलं गोवालावघर्षणं च शुद्धिसाधनम् । इयं च शुद्धिर्भिक्षा

(१) मनोपरिग्रह० ङ ।

(१)चरणादिप्रयोगाङ्गभूता नाऽमेध्याद्यपहातिविषया । तदुपघाते द्रव्यशुद्धिप्रकरणोक्ता द्रष्टव्या । अत एव मनुना (६।५३)-'अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च । तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे' ॥ इति । चमसदृष्टान्तोपादानेन प्रायोगिकी शुद्धिर्दर्शिता । पात्रान्तराभावे भोजनमपि तत्रैव कार्यम् । 'तद्भैक्षं गृहीत्वैकान्ते तेन पात्रेणान्येन वा तूष्णीं प्राणमात्रं भुञ्जीते'ति देवलस्मरणात् ॥ ॥६०॥

(वी०मि०) एवं हि व्यवहर्तव्यमुक्त्वा मोक्षप्राप्तिहेतुभूतात्मोपासनाङ्गमान्तरं नियममाह--

संनिरुध्येन्द्रियग्रामं रागद्वेषौ प्रहाय च ॥
भयं हित्वा च भूतानाममृतीभवति द्विजः ॥ ६१ ॥
कर्तव्याऽऽशयशुद्धिस्तु भिक्षुकेण विशेषतः ॥
ज्ञानोत्पत्तिनिमित्तत्वात्स्वातन्त्र्यकरणाय च ॥ ६२ ॥

इन्द्रियाणां ग्रामं समूहं रूपादिविषयेभ्यः सम्यक् निरुध्य उपकार्यपकारिविषयौ रागद्वेषौ व्युदस्य त्यक्त्वा भूतानां प्राणिनां स्वकर्तृकर्मणोत्पादनं हित्वेति मिताक्षरा । तत्तु 'परस्य न तदाचरे'दित्यग्रेतनेन गतार्द्धेम् । तस्मादयमर्थः--व्याघ्रादीनां सकलं हित्वाऽमृतीमोक्षभाग्भवति द्विजो ब्राह्मणः भिक्षुकेणाशयस्याऽन्तःकरणस्य वासनाक्षयरूपा शुद्धिर्विशेषतः प्राणायामाभ्यासैः कर्तव्या । किमर्थमत आह ज्ञानेति । अस्या द्वैतसाक्षात्कारं प्रत्याशयशुद्धेर्निमित्तत्वात्तदर्थं दोषक्षयेणात्मध्यानधारणादौ स्वातन्त्र्यसम्पादनार्थं चेत्यर्थः । आद्यचकारेणेर्ष्यादीनां समुच्चयः । द्वितीयचकारेण शोकस्य चरमचकारेण सञ्चितपापपुण्यक्षयार्थकत्वस्य समुच्चयः । तुशब्देन निवृत्तरूपधर्मस्य प्रथमश्लोकोक्तस्य केवलस्य मोक्षसाधनत्वं व्यवच्छिन्नम् ॥ ६१-६२ ॥

(मिता०) एवं भूतस्य यतेरात्मोपासनाङ्गं नियमविषयमाह-

संनिरुध्येति । चक्षुरादीन्द्रियसमूहं रूपादिविषयेभ्यः सम्यङ् निरुध्यविनिवर्त्य रागद्वेषौ प्रियाप्रियविषयौ प्रहाय त्यक्त्वा चशब्दादीर्ष्यादीनपि । तथा भूतानाम(२)पकाराकरणेन भयमकुर्वन् शुद्धान्तःकरणः सञ्जातैतसाक्षात्कारेणामृतीभवति मुक्तो भवति ॥ ६१ ॥

---

(१) भिक्षाहरणप्रयोग० ङ । (२) अपकारेण ।

(मिता०) किञ्च—

कर्तव्येति । विषयाभिलाषद्वेषजनितदोषकलुषितस्याशयस्यान्तःकरणस्य शुद्धिः कल्मषक्षयः प्राणायामैः कर्तव्या । तस्याः शुद्धेरात्माद्वैतसाक्षात्काररूपज्ञानोत्पत्तिनिमित्तत्वात् । एवं सति विषयासक्तिजनितदोषात्मकप्रतिबन्धक्षये सत्यात्मध्यानवारणादौ स्वतन्त्रो भवति । तस्माद्भिक्षुकेण त्वेषा शुद्धिर्विशेषतोऽनुष्ठेया । तस्य मोक्षप्र(१)धानत्वात् । मोक्षस्य च शुद्धान्तःकरणतामन्तरेण दुर्लभत्वात् । यथाह मनुः (६।७१)–'दह्यन्ते ध्यायमानानां धातूनां हि यथा मलाः । तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्' ॥ इति ॥ ६२ ॥

(वी० मि०) इन्द्रियनिरोधस्योक्तस्य जनकीभूतं विवेकं संसारस्वरूपपर्यालोचनया सम्पाद्यमित्याह—

आवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा ॥
आधयो व्याधयः क्लेशा जरा रूपविपर्ययः ॥ ६३ ॥
भवो जातिसहस्रेषु प्रियाप्रियविपर्ययः ॥

गर्भवासा नानाजन्मसम्बन्धिनो दुःखदा आवेक्ष्याः संसारिणां सम्बन्धितया पर्यालोचनीयाः । निषिद्धकर्मरौरवादिनानानरकेषु गतयः, आधयो मनःपीडाः, व्याधयो ज्वराद्याः, क्लेशाः जीवनोपायानुसरणादिजन्यश्रमाः, जराऽन्नपानादिकारितवह्वदोषसम्भवा वार्द्धकं, रूपविपर्ययः युवदशासु सौन्दर्यस्य वार्द्धके विपर्ययो वैपरीत्यं, जातिसहस्रेषु मनुष्यगोशूकरादिनानाजन्मप्रियस्यापातरमणीयस्य परिणामतोऽप्रियस्य वैषयिकसुखस्य पत्नीपुत्रधनादेर्वा तत्साधनस्य विपर्ययो विच्छेदः । एते सर्व एव दुःखमयाः संसारे आवेक्ष्याः । तथा च वैराग्यं सुलभमिति भावः । चकारेण मरणं तथाशब्देन च राजादिकृतवधताडने समुच्चिनोति ॥ ६३ ॥

(मिता०) इन्द्रियनिरोधोपायतया संसारस्वरूपनिरूपणमाह—

आवेक्ष्या इति । वैराग्यसिद्ध्यर्थं मूत्रपुरीषादिपूर्णनानाविधगर्भवासा आवेक्षणीयाः पर्यालोचनीयाः । चशब्दाज्जननोपरमावपि । तथा निषिद्धाचरणादिक्रियाजन्या महारौरवादिनिरयपतनरूपा गतयः ।

---

(१) मोक्षप्रसाधनत्वात् ङ ।

तथाधयो मनःपीडाः, व्याधयश्च ज्वरातीसाराद्याः शारीराः, क्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च, जरा वलीपलिनाद्यभिभवः, रूपविपर्ययः खञ्जकुब्जत्वादिना प्राक्तनस्य रूपस्यान्यथाभावः, तथा श्वसूकरखरोरगाद्यनेकजातिषु भव उत्पत्तिः । तथा इष्टस्याप्राप्तिः अनिष्टस्य प्राप्तिरित्यादिबहुतरक्लेशावहं संसारस्वरूपं पर्यालोच्य तत्परिहारार्थमात्मज्ञानोपायभूतेन्द्रियजये प्रयतेत ॥ ६३ ॥

(वी० मि०) वैराग्योत्पत्त्यनन्तरकृत्यमाह—

ध्यानयोगेन संदृश्यः(१) सूक्ष्म आत्मात्मनि स्थितः ॥ ६४ ॥

ध्यानं वहिर्विषयोपरमस्तद्विशिष्टेन योगेन चित्तवृत्तेरात्मैकाग्रत्वरूपेण निदिध्यासनापरनामकेनात्मनि परब्रह्मणि स्थितोऽभेदेन समुद्रतरङ्गवत् सूक्ष्म अविद्याग्रस्तानामदृश्य आत्मा सन्दृश्यो विषयीकर्तव्यः । अथवा ध्यानयोगेन हेतुना स्वजन्मसाक्षात्कारविषयीकर्तव्य इत्यर्थः ॥ ६४ ॥

(मिता०) एवमवेक्ष्यानन्तरं किं कार्यमित्यत आह—

ध्यानयोगेनेति । योगश्चित्तवृत्तिनिरोधः आत्मैकाग्रता ध्यान तस्या एव वाह्यविषयत्वोपरमः ध्यानयोगेन निदिध्यासनापरपर्यायेण सूक्ष्मः शरीरप्राणादिव्यतिरिक्तः क्षेत्रज्ञ आत्मा आत्मनि ब्रह्मण्यवस्थितः इत्येवं तत्त्वंपदार्थयोरभेदं सम्यक् पश्येदपरोक्षीकुर्यात् । अत एव श्रुतौ 'आत्मा वारे द्रष्टव्यः' इति साक्षात्काररूपं दर्शनमनूद्य तत्साधनत्वेन 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रवणमननिदिध्यासनानि विहितानि ॥ ६४ ॥

(वी० मि०) ननु मोक्षपदेन चतुर्थाश्रमापादनात् संन्यासस्य मोक्षहेतोः सत्त्वे मोक्षस्य च स्वभावित्वात् किमिति ध्यानयोगादिकं प्रवृत्तिनिवृत्तिलक्षणमित्याह—

नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः ॥
अतो यदात्मनोऽपथ्यं (२)परस्य न तदाचरेत् ॥ ६५ ॥
सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः ॥
संयतेन्द्रियता विद्या धर्मः सर्व उदाहृतः ॥ ६६ ॥

---

(१) सम्पश्येत्—इति मु० पु० पाठः । (२) परेषां—इति मु० पु० पाठः ।

आश्रमः संन्यासाश्रमः केवलं स्वरूपत एव मोक्षसाधने धर्मे न कारणं यतस्तदाश्रमवता क्रियमाणः सत्यादिधर्मो मोक्षे साधनं भवेत्। अतस्तादृशधर्मस्याऽपेक्षितत्वादात्मनोऽपथ्यं दुःखकारणं परुषभाषणताडनादि तत्परस्य नाचरेत्। अत एव सत्यादिः सर्वो धर्मः कर्तव्यत्वेन मुनिभिरुदाहृतः कथितः। सत्यं मोक्षसाधनीभूतशास्त्रजन्यतत्त्वज्ञानं, धृतिरिष्टवियोगानिष्टप्राप्तौ चित्तस्याच पलत्वं, मनोनिग्रहो दम, इन्द्रियपदं बाह्येन्द्रियपरम्, विद्या आत्ममननिदिध्यासनरूपा, शेषं प्रसिद्धम्। मिताक्षरायां तु आश्रमो दण्डकमण्डल्वादिधारणं नात्मोपासनाख्ये धर्मे कारणं यस्मादसौ क्रियमाणो भवेदेव नातिदुष्कर इति व्याख्यातम् ॥ ६५—६६ ॥

(मिता०) किञ्च—

नेति। प्राक्तनश्लोकोक्तात्मोपासनाख्ये धर्मे नाश्रमो दण्डकमण्डल्वादिधारणं कारणम्। यस्मादसौ क्रियमाणो भवेदेव नातिदुष्करः तस्माद्यदात्मनोऽपथ्यमुद्वेगकरं परुषभाषणादि तत्परेषां न समाचरेत्। अनेन ज्ञानोत्पत्तिहेतुभूतान्तःकरणशुद्ध्यापादनत्वेनान्तरङ्गत्वाद्रागद्वेषप्रहाणस्य प्रधानत्वेन प्रशंसार्थमाश्रमनिराकरणं, न पुनस्तत्परित्यागाय तस्यापि विहितत्वात्। तदुक्तं मनुना (६।६६)—दूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे वसन्। समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम्' ॥ इति ॥ ६५ ॥

(मिता०) किञ्च—

सत्यमिति। सत्यं यथार्थप्रियवचनम्। अस्तेयं परद्रव्यानपहारः। अक्रोधोऽपकारिण्यपि क्रोधस्यानुत्पादनम्। ह्रीर्लज्जा। शौचमाहारादिशुद्धिः। धीर्हिताहितविवेकः। धृतिरिष्टवियोगेऽनिष्टप्राप्तौ प्रचलितचित्तस्य यथापूर्वमवस्थापनम्। दमो मदत्यागः। संयतेन्द्रियता अप्रतिषिद्धेष्वपि विषयेष्वनतिसङ्गः। विद्या आत्मज्ञानम्। एतैः सत्यादिभिरनुष्ठितैः सर्वो धर्मोऽनुष्ठितो भवति। अनेन दण्डकमण्डल्वादिधारणबाह्यलक्षणात् सत्यादीनामात्मगुणानामन्तरङ्गतां द्योतयति ॥ ६६ ॥

(वी० मि०) 'सूक्ष्म आत्मात्मनि स्थितः' इत्युक्तं, तत्रैवाधाराधेयभावस्य भेदनियतत्वादत आह—

निस्सरन्ति यथा लोहपिण्डात्तप्तात्स्फुलिङ्गकाः ॥
सकाशादात्मनस्तद्वदात्मानः प्रभवन्ति हि ॥ ६७ ॥

(वी० मि०) तप्तात्लोहपिण्डाद्यथा महाग्नेः स्फुलिङ्गका निस्सरन्ति निर्गच्छन्ति तद्वत्परमात्मनः सकाशाज्जीवात्मानः प्रभवन्ति । अयमाशयः—स्फुलिङ्गस्याऽग्निमत्त्वाभावेऽप्यग्नेः स्फुलिङ्गाद्भेदमादायैव जन्यजनकभावस्तथा जीवात्मनां परमात्माभिन्नत्वाभावेऽपि परमात्मनो जीवात्मभ्यो भेदमादाय जन्यजनकभाव उपपद्यत एव । जन्यत्वं चाऽऽविर्भावमात्रम् । स्फुलिङ्गजीवात्मनोः पूर्वसिद्धत्वादिति भावः ॥ ६७ ॥

(मिता०) ननु ध्यानयोगेनात्मनि स्थितमात्मानं पश्येदित्युक्तं जीवपरमात्मनोर्भेदाभावादित्यत आह—

निःसरन्तीति । यद्यपि जीवपरमात्मनोः पारमार्थिको भेदो नास्ति तथाप्यात्मनः साकाशादविद्योपाधिभेदभिन्नतया जीवात्मनः प्रभवन्ति, हि यस्मात् तस्माद्युज्यत एव जीवपरमात्मनोर्भेदव्यपदेशः । यथा हि तप्तालोहपिण्डादयोगोलकाद्विस्फुलिङ्गकास्तेजोवयवा निःसरन्ति निःसृताश्च स्फुलिङ्गव्यपदेशं लभन्ते तद्वत् । अत उपपन्नम्—आत्मात्मनि स्थितो द्रष्टव्य इति । यद्वायमर्थः—ननु सुषुप्तिसमये प्रलये च सकलक्षेत्रज्ञानां ब्रह्मणि प्रलीनत्वात्कस्यायमात्मोपासनाविधिरित्यत आह—निःसरन्तीत्यादि । यद्यपि सूक्ष्मरूपेण प्रलयवेलायां प्रलीनास्तथाप्यात्मनः सकाशादविद्योपाधिभेदभिन्नतया जीवात्मानः प्रभवन्ति, पुनः कर्मवशात्स्थूलशरीराभिमानिनो जायन्ते तस्मान्नोपासनाविधिविरोधः तैजसस्य पृथग्भावसाम्यात्लोहपिण्डदृष्टान्तः ॥ ६७ ॥

(वी० मि०) 'सूक्ष्म आत्मात्मनी'ति प्रागुक्ते हेतुत्वमेतच्छ्लोकार्थस्याऽभिप्रैति । 'भवो जातिसहस्रे'ष्वित्युक्तं, पुनःपुनर्जन्मनि किं मानमित्याशङ्कायामाह—

तत्रात्मा हि स्वयं किञ्चित्कर्म किञ्चित्स्वभावतः ॥

करोति च त(१)दाभ्यासाद्धर्माद्धर्मोभयात्मकम् ॥ ६८ ॥

तत्र संसारे जीवात्मा किञ्चित्कर्म स्तन्यपानादिकं स्वयमेव तज्ज(२)न्मीयाचारनैरपेक्ष्येण करोति । किञ्चित्कर्म उष्ट्रादेः कण्टकाशित्वादिकं स्वभावतः स्वजातिनियमादृष्टवशेन स्वकण्टकाशित्वादिदर्शनेनेति यावत् । किञ्चिच्च धर्माधर्मोभयात्मकं कर्माऽध्ययनपरदारादिजन्मान्तरवासनावशात् सदसदुपदेशकृतं तावत् करोति तथा च प्राग्जन्माभावे स्वयं स्वभावादभ्यासाच्च कर्मणो नोपपद्यन्ते । एवं तज्जन्मीयकर्माण्यपि तत्पूर्वजन्माभावेनोपपद्येरन्नित्यनादिनानाजन्मत्वादुपपन्नमेकस्य जन्मसहस्रमिति भावः । हिशब्दोऽवधारणे ॥ ६८ ॥

(मिता०) ननु चानुपात्तवपुषां क्षेत्रज्ञानां निष्परिस्प(३)न्दतया कथं तन्निबन्धनो जरायुजाण्डजादिचतुर्विधदेहपरिग्रह इत्यत आह—

तत्रेति । यद्यपि तस्यामवस्थायां परिस्पन्दात्मकक्रियाभावस्तथापि धर्माधर्माध्यवसायात्मकं कर्म मानसं भवत्येव । तस्य च विशिष्टशरीरग्रहणहेतुत्वमस्त्येव । (१२।९)—'वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्' इति मनुस्मरणात्। एवं गृहीतवपुः स्वयमेवान्वयव्यतिरेकानिरपेक्षः, स्तन्यपानादिके कृते तृप्तिर्भवत्यकृते न भवतीत्येवंरूपौ यावन्वयव्यतिरेकौ तत्र निरपेक्षः । प्राग्भवीयानुभवभावितभावनानुभवोद्भूतकार्यावबोधः किञ्चित्स्तन्यपानादिकं करोति, किञ्चित्स्वभावतो यदृच्छया प्रयोजनाभिसन्धिनिरपेक्षं पिपीलकादिभक्षणं करोति, किंचिद्भवान्तराभ्यासवशाद्धर्माधर्मोभयरूपं करोति । तथा च स्मृत्यन्तरम्—'प्रतिजन्म यदभ्यस्तं दानमध्ययनं तपः । तेनैवाभ्यासयोगेन तदेवाभ्यसते पुनः' ॥ इति । एवं जीवानां कर्मवैचित्र्यं तत्कृतं जरायुजादिदेहवैचित्र्यं युज्यत एव ॥६८॥

(वी० मि०) नन्वनादिश्चेदात्मा तदा कथं जातो देवदत्त इत्यादिव्यवहार इत्यत आह—

निमित्तमक्षरः कर्ता बोद्धा ब्रह्म गुणी वशी ॥
अजः शरीरग्रहणात्स जात इति कीर्त्यते ॥ ६९ ॥

---

(१) करोति किञ्चिदन्या०—इति मु० पु० पाठः।
(२) तज्जन्यमाचार०—इति ख० पु० पाठः । (३) स्पन्दतया कथं ख.।

निमित्तं कारणमेव न तु कार्योऽपीत्यतोऽक्षरोऽप्यतश्च वस्तुगत्यात्मा । अत एव ब्रह्म सकलदेशकालव्यापकः, शरीरग्रहणात् शरीरसर्वथोत्पत्तिः सङ्कीर्त्यते । अवस्थाविशेषोत्पत्तेर्गृहस्थो जात इति वदित्यर्थः । न तु सुखदुःखमोहात्मकगुणत्रयविकारवतीव गुणत्रिकात्मिकायाः प्रकृतेः कर्तृत्वमावश्यकमिति नात्मा निमित्तं मानाभावादत आह बोद्धा । अन्य एव कर्ता न तु प्रकृतिः । अचेतनं हि चेतनाधिष्ठितमेव प्रवर्तते । अथ गुणशून्यस्य कथं गुणवत्कार्यात्मकत्वमत आह वशी स्वतन्त्रः । शक्तिस्तु परतन्त्रा न कर्त्री अचेतनत्वादित्यर्थः ॥ ६९ ॥

(मिता०) नन्वेवं सति ब्राह्मण एव कथंचिज्जीवव्यपदेश्यत्वात्तस्य च नित्यत्वादिधर्मत्वात्कथं विष्णुमित्रो जात इति व्यवहार इत्याशङ्क्याह—

निमित्तमिति । सत्यमात्मा सकलजगत्प्रपञ्चाविर्भावेऽविद्यासमावेशवशात्समवाय्यसमवायिनिमित्तमित्येवं स्वयमेव त्रिविधमपि कारणं न पुनः कार्यकोटिनिविष्टः । यस्मादक्षरोऽविनश्वरः । ननु सत्त्वादिगुणविकारस्य सुखदुःखमोहात्मकस्य कार्यभूते जगत्प्रपञ्चे दर्शनात्तद्गुणवत्त्याः प्रकृतेरेव जगत्कर्तृतोचिता न पुनर्निर्गुणस्य ब्रह्मणः । मैवं मंस्थाः । आत्मैव कर्ता, यस्मादसौ जीवोपभोग्यसुखदुःखहेतु(१)भूतादृष्टादेर्बोद्धा । न ह्यचेतनायाः प्रकृतेर्नामरूपव्याकृतविचित्रभोक्तृवर्गभोगानुकूलभोग्यभोगायतनादियोगिजगत्प्रपञ्चरचना घटते । तस्मादात्मैव कर्ता । तथा स एव ब्रह्म बृंहको विस्तारकः । न चासौ निर्गुणः, यतस्तस्य त्रिगुणशक्तिरविद्या प्रकृतिप्रधानाद्यपरपर्याया विद्यते । अतः स्वतो निर्गुणत्वेऽपि शक्तिमुखेन सत्त्वादिगुणयोगी कथ्यते । न चैतावता प्रकृतेः कारणता, यस्मादात्मैव वशी स्वतन्त्रः न प्रकृतिर्नाम स्वतन्त्रं तत्त्वान्तरं, तादृग्विधत्वे प्रमाणाभावात् । न च वचनीयं शक्तिरूपापि सैव कर्तृभूतेति । यतः शक्तिमत्कारकं न शक्तिः, तस्मादात्मैव जगतस्त्रिविधमपि कारणम् । तथा अज उत्पत्तिरहितः । अतस्तस्य यद्यपि साक्षाज्जननं नोपपद्यते तथापि शरीरग्रहणमात्रेण जात इत्युच्यते, अवस्थान्तरयोगितयोत्पत्तेर्गृहस्थो जात इतिवत् ॥ ६९ ॥

---

(१) हेतुपुण्यापुण्यादेर्बोद्धा ङ ।

(वी० मि०) शरीरग्रहणप्रकारमाह चतुर्दशभिः श्लोकैः—

सर्गादौ स यथाकाशं वायुं ज्योतिर्जलं महीम् ॥
सृजत्येकोत्तरगुणांस्तथादत्ते भवन्नपि ॥ ७० ॥
आहुत्याप्यायते सूर्यस्तस्माद्वृष्टिरथौषधिः ॥
तदन्नं रसरूपेण शुक्रत्व(१)मुपगच्छति ॥ ७१ ॥

स परमात्मा सर्गादिकाले यथाऽऽकाशादीन् पञ्च एकोत्तरगुणान् यथोत्तरमेकैकाधिकगुणयुक्तान् सृजति तथा भवन् जीवभावं गच्छन्नपि तानाकाशादीन् शरीरारम्भार्थमुपादत्ते । गुणाश्च शब्दस्पर्शरूपरसगन्धाः, तेषां चाकाशादिनां शुक्रसाहित्येन शरीरारम्भकत्वम् । अभिधान एवाहुतिजन्माहुष्टस्य तदारम्भोपयोगित्वमाह—आहुत्येति । यजमानप्रक्षिप्तयाऽऽहुत्या सूर्य आप्यायते तृप्यति । तस्मादेव तृप्ताद्वृष्टिर्भवति । अथ वृष्टेर्व्रीह्यादिसस्यरूपौषधिर्भवति । तत ओषधेरन्नं भवति । तच्चाऽन्नं रसरूपेण परिणामेन द्वारीभूतेन शुक्रशोणित्वमुपगच्छति ॥ ७०—७१ ॥

(मिता०) शरीरग्रहणप्रकारमाह—

सर्गादाविति । सृष्टिसमये स परमात्मा यथाकाशादीन् शब्दैकगुणं गगनं, शब्दस्पर्शगुणः पवनः, शब्दस्पर्शरूपगुणं तेजः, शब्दस्पर्शरू(२)परसगुणवदुदकम्, शब्दस्पर्शरूपरसगन्धगुणा जगतीत्येवमेकोत्तरगुणान् सृजति तथात्मा जीवभावमापन्नो भवन्नुत्पद्यमानोऽपि स्वशरीरस्यारम्भकत्वेनापि तानुपादत्ते गृह्णाति ॥ ७० ॥

(मिता०) कथं शरीरारम्भकत्वं पृथिव्यादीनामित्यत आह—

आहुत्येति । यजमानैः प्रक्षिप्तयाहुत्या पुरोडाशादिरसेनाप्यायते सूर्यः । सूर्याच्च कालवशेन परिपक्वाज्यादिहवीरसाद्वृष्टिर्भवति । ततो व्रीह्याद्यौषधिरूपमन्नम् । तच्चान्नं सेवितं सत् रसरुधिरादिक्रमेण शुक्रशोणितभावमापद्यते ॥ ७१ ॥

स्त्रीपुंसयोस्तु संयोगे विशुद्धे शुक्रशोणिते ॥
पञ्चधातून् स्वयं षष्ठ आदत्ते युगपत्प्रभुः ॥ ७२ ॥

---

(१) मधिगं०—इति मु० पु० पाठः । (२) रसवदुदकम् ख ।

(वी०मि०) स्त्रीपुरुषयोः ऋतुकालीने संयोगे मैथुने परस्परमिलिते शुक्रशोणिते विशुद्धे वाद्यनभिभूते पञ्चधातून् शरीरधारकान् पृथिव्यादीनि महाभूतानि षष्ठश्चिदात्मको धातुः प्रभुः परमात्मा स्वयमेव न त्वन्यप्रेरणया युगपदादत्ते शरीरारम्भाय मिश्रयति । तुशब्देन मैथुनव्यतिरेकेण शुक्रशोणितयोर्मिलनं व्यवच्छिनत्ति ॥७२॥

(मिता०) ततः किमित्यत आह—

स्त्रीपुंसयोरिति । ऋतुवेलायां स्त्रीपुंसयोर्योगे शुक्रं च शोणितं च शुक्रशोणितं तस्मिन्परस्परसंयुक्ते विशुद्धे 'वातपित्तश्लेष्मदुष्टग्रन्थिपूयक्षीणमूत्रपुरीषगन्धरेतांस्यबीजानि' इति स्मृत्यन्तरोक्तदोषरहिते स्थित्वा पञ्चधातून् पृथिव्यादिपञ्चमहाभूतानि शरीरारम्भकतया स्वयं षष्ठश्चिद्धातुरात्मा प्रभुः शरीरारम्भ(१)करणेऽदृष्टकर्मयोगितया समर्थो युगपदादत्ते भोगायतनत्वेन स्वीकरोति । तथा च शारीरके—'स्त्रीपुंसयोः संयोगे योनौ रजसाभिसंसृष्टं शुक्रं तत्क्षणमेव सह भूतात्मना गुणैश्च सत्त्वरजस्तमोभिः सह वायुना प्रेर्यमाणं गर्भाशये तिष्ठति' इति ॥ ७२ ॥

इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः ॥
धारणा प्रेरणं दुःखमिच्छाऽहङ्कार एव च ॥ ७३ ॥
प्रयत्न आकृतिर्वर्णः स्वरद्वयौ भवाभवौ ॥
तस्यैतदात्मजं सर्वमनादेरादिमिच्छतः ॥ ७४ ॥

(वी०मि०) इन्द्रियाणि चक्षुरादीनि पञ्च प्राणादीनि च पञ्च मनः-प्राणौ ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नाः आयुःशतवर्षाद्यवच्छिन्नजीवनं धृतिश्चित्तस्थैर्यं धारणा मेधा प्रेरणमिन्द्रियाणां स्वविषये प्रवर्तनम् अहङ्कारोऽभिमानः आकृतिरवयवसंनिवेशः वर्णो गौरत्वादिः स्वरो गान्धारादिः भवः पुत्रधनादिसम्पदुत्पत्तिः, तद्विपर्ययोऽभवः । एतत्सर्वमादिशरीरसम्बन्धमिच्छतोऽनादेरात्मनो जीवात्मन आत्मजमेवात्मीयप्राक्तनादेव प्रभवमेव निष्पद्यते । चकारेण धर्मशौर्यादिसङ्ग्रहः ॥ ७३-७४ ॥

---

(१) रम्भकारणादृष्ट ।

(मिता०) किञ्च—

इन्द्रियाणीत्यादि । इन्द्रियाणि ज्ञानकर्मेन्द्रियाणि वक्ष्यमाणानि । मनश्चोभयसाधारणम् । प्राणोऽपानो व्यान उदानः समान इत्येवं पञ्चवृत्तिभेदभिन्नः शारीरो वायुः प्राणः । ज्ञानमवगमः । आयुः कालविशेषावच्छिन्नं जीवनम् । सुखं निर्वृतिः । धृतिश्चित्तस्थैर्यम् । धारणा प्रज्ञा मेधा च । प्रेरणं ज्ञानकर्मेन्द्रियाणामधिष्ठातृत्वम् । दुःखमुद्वेगः । इच्छा स्पृहा । अहंकारोऽहंकृतिः । प्रयत्न उद्यमः । आकृतिराकारः । वर्णो गौरिमादिः । स्वरः षड्जगान्धारादिः । द्वेषो वैरम् । भवः पुत्रपश्वादिविभवः । अभवस्तद्विपर्ययः । तस्यानादेरात्मनो नित्यस्यादिमिच्छतः शरीरं जिघृक्षमाणस्य सर्वमेतदिन्द्रियादिकमात्मजनितं प्राग्भवीयकर्मबीजजन्यमित्यर्थः ॥ ७३-७४ ॥

प्रथमे मासि संक्लेदभूतो धातुविमूर्च्छितः ॥
मास्यर्बुदं द्वितीये तु तृतीयेऽङ्गेन्द्रियैर्युतम् ॥ ७५ ॥
आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रं बलादिकम् ॥
वायोस्तु स्पर्शनं चेष्टां व्यूहनं रौक्ष्यमेव च ॥ ७६ ॥
पित्तात्तु दर्शनं पक्तिमौष्ण्यं रूपं प्रकाशिताम् ॥
रसात्तु रसनं शैत्यं स्नेहं क्लेदं समार्दवम् ॥ ७७ ॥
भूमेर्गन्धं तथा घ्राणं गौरवं मूर्तिमेव च ॥
आत्मा गृह्णात्यजः सर्वं तृतीये स्पन्दते ततः ॥ ७८ ॥
दोहदस्या(१)ऽप्रदानेन गर्भो दोषमवाप्नुयात् ॥
वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः ॥ ७९ ॥
स्थैर्यं चतुर्थे त्वङ्मानां पञ्चमे शोणितोद्भवः ॥
षष्ठे बलस्य वर्णस्य नखलो(२)म्नां च सम्भवः ॥८०॥
मनसा (३)चेतसा युक्तो नाडीस्नायुशिरायुतः ॥
सप्तमे चाऽष्टमे चैव त्वङ्मांसस्मृतिमानपि ॥ ८१ ॥

---

(१) दौहृदस्येति पाठान्तरम् । (२) नखरोम्णा—इति मु० पु० पाठः ।
(३) मनश्चैतन्ययुक्तोऽसौ—इति मु० पु० पाठः ।

पुनर्गर्भं पुनर्धात्रीमोजस्तस्य प्रधावति ॥
अष्टमे मास्यतो गर्भो जातः प्राणैर्वियुज्यते ॥ ८२ ॥
नवमे दशमे (१)मासि प्रबलैः सूतिमारुतैः ॥
निस्सार्यते बाण इव (२)जन्तुश्छिद्रेण सज्वरः ॥८३॥

(वी०मि०) गर्भः प्रथमे मासि धातुषु पृथिव्यादिषु मूर्छितः क्षीरनीरवदेकतापन्नः सङ्क्लेदभूतो द्रवदशापन्न (३)एव तिष्ठति । द्वितीये मास्यर्बुदमीषत्कठिनमांसपिण्डात्मको भवति । तृतीये मासि अङ्गैः करादिभिरिन्द्रियैश्चक्षुरादिभिर्युतो भवति आत्मा च । तृतीये मासि आकाशादिभ्यः पञ्चभ्यो लाघवादिकं सर्वं गृह्णाति गर्भान्तःप्रविष्टः सन् गर्भद्वारा स्वसम्बन्धीकरोति । ततस्तदनन्तरं चतुर्थे मासि स्पन्दते गर्भः । तथा च शारीरकम्–'चतुर्थे मासि चलनादावभिप्रायं करोती'ति । पारस्करोऽपि—'पुंसवनं स्पन्दनात्पुरा द्वितीये तृतीये वा कर्तव्य'मिति । लाघवं लङ्घनोपयोगिनं लघिमानं सौक्ष्म्यं वस्त्वन्तरमध्यप्रवेशम् । आदिग्रहणाच्छिद्रसमूहम्—उपनिषत्संवादात् । स्पर्शनात्त्वगिन्द्रियं, व्यूहनमङ्गानां विविधं प्रसारणं, रौक्ष्यं कर्कशत्वं, चकारात्स्पर्शं च । तुशब्देन भूतान्तरस्यापादानत्वं व्यवच्छिन्नम् । एवमग्नेऽपि। एवकारेण तिर्यग्गमनादिस्वभावत्वव्यवच्छेदः । पित्तात्तेजसः कार्यकारणयोरभेदोपचारः दर्शनं चक्षुः, पक्तिं भुक्तान्नपरिपाकम्, औष्ण्यम् उष्णस्पर्शत्वं, प्रकाशिनां दीपमानतां, रसाज्जलात्स्नेहं स्निग्धतां, क्लेदं द्रवत्वसम्बन्धः, मार्दवं सुकुमारस्पर्शः तत्सहितं, गौरवं गुरुत्वसम्बन्धं, मूर्तिः काठिन्यं, चकारेण श्यामरूपादेः सङ्ग्रहः । एवकारेण तृतीये इत्यत्राऽन्वितेन कालान्तरव्यवच्छेदः । तृतीयमासमारभ्य गर्भिणीमधिकृत्य तत्पतिकर्तव्यं प्रसङ्गादाह दौहृदस्येति । गर्भिण्या तद्वांछितस्याऽर्थस्य मिष्टभोजनश्रमाभावादेरप्रदानेन गर्भो दोषं वैरूप्यात्मकं मरणादिकं वाऽवाप्नोति । तस्माद्गर्भिण्याः स्त्रियाः प्रियं वाञ्छितं सम्पादनीयमित्यर्थः । अपिकारेण वीर्यहीनत्वसङ्ग्रहः । दौहृदस्येति पाठे गर्भहृदयेनात्महृदयेन च द्विहृदयाया गर्भिण्या अभीष्टस्येत्यर्थः । निपातनादौकारादिति । तथा च श्रुतिः—'द्विहृदयां

(१) वापि—इति मु० पु० पाठः । (२) यन्त्राच्छि०—इति मु० पु० पाठः ।
(३) च—इति ख० पु० पाठः ।

नारीं दौहृदिनीमाचक्षते तदभिलषितं दद्याद्वीर्यवन्तं चिरायुषं पुत्रं जनयती'ति । चतुर्थे मासेऽङ्गानां तृतीयमासजानां स्थैर्ये नियतस्थानेषु दृढस्थानं प्रवक्तव्यम् । नखलोमनाञ्चेति चकारेण शिरःकेशसमुच्चयः । सप्तमे मासि मनसाऽन्तःकरणेन चेतसा ज्ञानेन युक्तो नाडीभिर्वायुवाहनीभिरिडाप्रभृतिभिः स्नायुभिरस्थिबन्धनैः शिराभिर्नाभिसम्बद्धाभिश्च ततो व्याप्तो भवति । अष्टमे त्वचा पूर्णमांसेन प्रचुरेण पूर्वजन्मानुभूतस्मृत्या च युक्तो भवति । अपिकारेण वैराग्यसमुच्चयः । चकारौ त्वर्थौ । एवकारेण सर्वेषां मासधर्माणामयोगव्यवच्छेदः । तस्याऽष्टममासिकस्य गर्भस्यौजः प्राणात्मकं गर्भं धात्रीं जननीं प्रति पुनश्चञ्चलतया प्रधावति । अतोऽष्टमे मासि जातो योनेर्निःसृतो गर्भः प्राणैश्चञ्चलतया धावद्भिर्वियुज्यते । नवमे दशमे वा मासि सूतिहेतुभिर्मारुतैः प्रबलैर्गर्भनिःसारणसमर्थैः सज्वरो दुस्सहपीडाऽभिभूयमानः सर्वावयवपरिपूर्णत्वङ्मांससहितो जन्तुर्द्धातुः प्रेरितो बाण इव शीघ्रं छिद्रेण योनिरन्ध्रेण गर्भाशयान्निःसार्यते । त्वङ्मांसाद्यपूर्णस्तु नवममासादर्वागपि आयासादिदोषवशान्निस्सार्यते । बाह्यपवनस्पर्शे तु तस्य पूर्वजन्मानुभूतस्मृतिर्नश्यति । 'जातः स वायुना स्पृष्टो न स्मरति पूर्वं जन्म मरणं कर्म शुभाऽशुभ'मिति निरुक्ताभिधानात् ॥ ७५—८३ ॥

(मिता०) संयुक्तशुक्रशोणितस्य कार्यरूपपरिणतौ क्रममाह—

प्रथम इति । असौ चेतनः पिण्डो धातुविमूर्च्छितः धातुषु पृथिव्यादिषु विमूर्च्छितो लोलीभूतः क्षीरनीरवदेकीभूत इति यावत् । प्रथमे गर्भमासे संक्लेदभूतो द्रवरूपतां प्राप्त एवावतिष्ठते न कठिनतया परिणमते । द्वितीये तु मास्यर्बुदमीषत्कठिनमांसपिण्डरूपं भवति । अयमभिप्रायः—कौ(१)ष्ठ्यपवनजठरदहनाभ्यां प्रतिदिनमीषदीषच्छोष्यमाणं शुक्रसं(२)पर्काद्द्रवीभूतं भूतजातं त्रिंशद्भिर्दिनैः काठिन्यमापद्यत इति । तथा च सुश्रुते—'द्वितीये शीतोष्णानिलैरभिपच्यमानो भूतसङ्घातो घनो जायते' इति । तृतीये तु मास्यङ्गैरिन्द्रियैश्च संयुक्तो भवति ॥ ७५ ॥

---

(१) कोष्ठपवन ङ । (२) संपर्कसम्पादितद्रवीभावम् ।

(मिता०) किञ्च—

आकाशादित्यादि । आत्मा गृह्णातीति सर्वत्र सम्बध्यते । गगनालघिमानं लङ्घनक्रियोपयोगिनम् । सौक्ष्म्यं सूक्ष्मेक्षित्वम् । शब्दं विषयम् । श्रोत्रं श्रवणेन्द्रियम् । बलं दार्ढ्यम् । आदिग्रहणात्सुषिरत्वं विविक्तां च । 'आकाशाच्छुब्दं श्रोत्रं विविक्तां सर्वच्छिद्रसमूहांश्च' इति गर्भोपनिषद्दर्शनात् । पवनात्स्पर्शेन्द्रियम् । चेष्टां गमनागमनादिकाम् । व्यूहनमङ्गानां विविधं प्रसारणम् । रौक्ष्यं कर्कशत्वं चशब्दात्स्पर्शं च । पित्तात्तेजसो दर्शनं चक्षुरिन्द्रियम् । पक्तिं भुक्तस्यान्नस्य पचनम् । औष्ण्यमुष्णस्पर्शत्वमङ्गानाम् । रूपं श्यामिकादि । प्रकाशितां भ्राजिष्णुतां तथा संतापामर्षादि च । 'शौर्यामर्षतैक्ष्ण्यपक्त्यौष्ण्यभ्राजिष्णुतासंतापवर्णरूपेन्द्रियाणि तैजसानि' इति गर्भोपनिषद्दर्शनात् । एवं रसादुदकाद्रसनेन्द्रियम् । शैत्यमङ्गानां स्निग्धताम् । मृदुत्वसहितं क्लेदमार्द्रताम् । तथा भूमेर्गन्धं घ्राणेन्द्रियं गरिमाणं मूर्तिं च । सर्वमेतत्परमार्थतो जन्मरहितोऽप्यात्मा तृतीये मासि गृह्णाति । ततश्चतुर्थे मासि स्पन्दते चलति । तथा शारीरके—'तस्माच्चतुर्थे मासि चलनादावभिप्रायं करोति' इति ॥ ७६-७७-७८ ॥

(मिता०) किञ्च—

दौहृदस्येति । गर्भस्यैकं हृदयं गर्भिण्याश्चापरमित्येवं द्वि(१)हृदया तस्याः स्त्रिया यदभिलषितं तत् दौ(२)हृदं तस्याप्रदानेन गर्भो विरूपतां मरणरूपं वा दोषं प्राप्नोति । तस्मात्तद्दोषपरिहारार्थं गर्भपुष्ट्यर्थं च गर्भिण्याः स्त्रियाः यत्प्रियमभिलषितं तत्संपादनीयम् । तथा च सुश्रुते—'द्विहृदयां नारीं दौहृदिनीमाचक्षते तदभिलषितं दद्यात् वीर्यवन्तं चिरायुषं पुत्रं जनयति' इति । तथा च व्यायामादिकमपि गर्भग्रहणप्रभृति तया परिहरणीयम् । 'ततःप्रभृति व्यायामव्यवायातितर्पणदिवास्वप्नरात्रिजागरणशोकभययानारोहणवेगधारणकुक्कुटासनशोणितमोक्षणानि परिहरेत्' इति तत्रैवाभिधानात् । गर्भग्रहणं च श्रमादिभिर्लिङ्गैरवगन्तव्यम् । 'सद्यो गृहीतगर्भायाः श्रमो ग्लानिः पिपासा स(३)क्थिसादनं शुक्रशोणितयोर(४)वबन्धः स्फुरणं च योनेः' इत्यादि तत्रैवोक्तम् ॥ ७९ ॥

---

(१) द्विहृदयायाः स्त्रिया ङ । (२) दोहदम् ङ । (३) सक्थिसादनं ङ । (४) रनुबन्धः ङ ।

(मिता०) किञ्च—

स्थैर्यमिति । तृतीये मासि प्रादुर्भूतस्याङ्गसङ्गस्य चतुर्थे मासि स्थैर्यं स्थेमा भवति । पञ्चमे लोहितस्योद्भव उत्पत्तिः । तथा षष्ठे बलस्य वर्णस्य कररुहरोम्णां च सम्भवः ॥ ८० ॥

(मिता०) किञ्च—

मन इति । असौ पूर्वोक्तो गर्भः सप्तमे मासि मनसा चेतसा चेतनया च युक्तो नाडीभिर्वायुवाहिनीभिः स्नायुभिरस्थिबन्धनैः शिराभिर्वातपित्तश्लेष्मवाहिनीभिश्च संयुतः । तथाष्टमे मासि त्वचा मांसेन स्मृत्या च युक्तो भवति ॥ ८१ ॥

(मिता०) किञ्च—

पुनरिति । (१)तस्याष्टममासिकस्य गर्भस्यौजः कञ्चन गुणविशेषो धात्रीं गर्भं च प्रति पुनःपुनरतितरां चञ्चलतया शीघ्रं गच्छति । अतोऽष्टमे मासि जातो गर्भः प्राणैर्वियुज्यते । अनेनौजःस्थितिरेव जीवनहेतुरिति दर्शयति । ओजःस्वरूपं च स्मृत्यन्तरे दर्शितम्—'हृदि तिष्ठति यच्छुद्धमीषदुष्णं सपीतकम् । ओजः शरीरे संख्यातं तन्नाशान्नाशमृच्छति' ॥ इति ॥ ८२ ॥

(मिता०) किञ्च—

नवम इति । एवं करचरणचक्षुरादिपरिपूर्णाङ्गेन्द्रियो नवमे दशमे वापि मासे अपिशब्दात्प्रागपि सप्तमेऽष्टमे वा अत्यायासादिदोषवशात्प्रबलसूतिहेतुप्रभञ्जनप्रेरितस्नाय्वस्थिचर्मादिनिर्मितवपुर्यन्त्रस्य छिद्रेण सुसूक्ष्मसुषिरेण सज्वरो दुःसहदुःखाभिभूयमानो निःसार्यते धनुर्यन्त्रेण सुधन्वप्रेरितो बाण इवातिवेगेन । निर्गमसमनन्तरं च बाह्यपवनस्पृष्टो नष्टप्राचीनस्मृतिर्भवति । 'जातः स वायुना स्पृष्टो न स्मरति पूर्वं जन्म मरणं कर्म च शुभाशुभम्' इति निरुक्तस्याष्टादशेऽभिधानात् ॥ ८३ ॥

(वी० मि०) वैराग्यमूलक इन्द्रियनिग्रह इति वैराग्यसम्पादनाय कष्टैर्जातस्य शरीरस्य स्वरूपं विवृणोति चतुर्विंशत्या—

तस्य पोढा शरीराणि षट् त्वचो धारयन्ति च ॥
षडङ्गानि तथाऽस्थां च स(२)षष्टिं च शतत्रयम् ॥ ८४ ॥

---

(१) तथाष्टम-ङ । (२) सह षष्ट्या शतत्रयम्—इति मु० पु० पाठः ।

तस्यात्मनः षोडश रक्तमांसमेदोऽस्थिमज्जाशुक्ररूपषट्प्रकारवन्ति शरीराणि कर्तृणि षट्कोशात्मिका त्वचोऽवभाषिणी लोहितश्वेतातास्रारोहिणीवंशधाराख्याः सुश्रुतेऽभिहिताः करद्वयंचरणद्वयाशिरोगात्राणि षडङ्गानि । अस्थां षष्टिसहितं शतत्रयं षट्श्लोक्या वक्ष्यमाणप्रकारेण धारयन्ति । चकारैर्नाडीस्नायुशिराणां समुच्चयः ॥८४॥

(मिता०) कायस्वरूपं विवृण्वन्नाह—

तस्येति । तस्यात्मनो यानि जरायुजाण्डजशरीराणि तानि प्रत्येकं षट्प्रकाराणि रक्तादिषड्धातुपरिपाकहेतुभूतषडाग्निस्थानयोगित्वेन । तथा ह्यन्नरसो जाठराग्निना पच्यमानो रक्ततां प्रतिपद्यते । रक्तं च स्वकोशस्थेनाग्निना पच्यमानं मांसत्वम् । मांसं च स्वकोशानलपरिपक्वं मेदस्त्वम् । मेदोऽपि स्वकोशवह्निना पक्वमस्थिताम् । अस्थ्यपि स्वकोशाशिखिपरिपक्वं मज्जात्वम् । मज्जापि स्वकोशपावकपरिपच्यमानश्चरमधातुतया परिणमते । चरमधातोस्तु परिणतिर्नास्तीति स एवात्मनः प्रथमः कोशः । इत्येवं षट्कोशाग्नियोगित्वात् षट्प्रकारत्वं शरीराणाम् । अन्नरसरूपस्य तु प्रथमधातोरनियतत्वान्न तेन प्रकारान्तरत्वम् । तानि च शरीराणि षट् त्वचो धारयन्ति । रक्तमांसमेदोस्थिमज्जाशुक्राख्याः षट् धातव एव रम्भास्तम्भत्वागिव बाह्याभ्यन्तररूपेण स्थिताः त्वगिवाच्छादकत्वात्त्वचस्ताः षट् त्वचो धारयन्ति । तदिदमायुर्वेदप्रसिद्धम् । तथाङ्गानि च षडेव करयुग्मं चरणयुगलमुत्तमाङ्गं गात्रमिति । अस्थां तु षष्टिसहितं शतत्रयमुपरितनषट्श्लोक्या वक्ष्यमाणमवगन्तव्यम् ॥ ८४ ॥

(वी० मि०) षष्ट्यधिकशतत्रयं गणयति—

स्थालैः सह चतुःषष्टिर्दन्ता वै विंशतिर्नखाः ॥
पाणिपादशलाकाश्च तेषां स्थानचतुष्टयम् ॥ ८५ ॥
षष्ट्यङ्गुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयम् ॥
चत्वार्यरत्निकास्थीनि जङ्घयोस्तावदेव तु ॥ ८६ ॥
द्वेद्वे जानुकपोलोरुफलकांससमुद्भवे ॥
अक्षतालूषकश्रोणीफलके च विनिर्दिशेत् ॥ ८७ ॥
भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पञ्च च ॥

ग्रीवा पञ्चदशास्थी स्याज्जत्वेकैकं तथा हनुः ॥ ८८ ॥
तन्मूले द्वे ललाटाक्षिगण्डे नासा घनास्थिका ॥
पार्श्वकाः स्थालकैः सार्धमर्बुदैश्च द्विसप्ततिः ॥ ८९ ॥
द्वौ शङ्खौ कपालानि चत्वारि शिरसस्तथा ॥
उरः सप्तदशास्थीनि पुरुषस्यास्थिसङ्ग्रहः ॥ ९० ॥

(वी० मि०) द्वात्रिंशता स्थालैर्दन्तमूलप्रदेशस्थैरस्थिभिः सहिता द्वात्रिंशद्दन्ताश्चतुःषष्टिर्भवन्ति । पाणिपादनखा विंशतिः पाणिपादस्थाः शलाकास्तदाकाराण्यस्थीनि च विंशतिर्मणिबन्धस्य गुल्फस्य च पुरोवर्तीनि । तेषां नखानां शलाकानां च मूलप्रदेशरूपं स्थानचतुष्टयं करद्वयं चेति । एवमत्र चतुरधिकं शतमस्थ्नामुक्तम् । स्थानचतुष्टयस्याऽस्थिभिन्नस्य प्रसङ्गतोऽभिधानात् । यद्वा नखानां स्थानशलाका इत्यभेदान्वयः । चतुष्टयं चैकैकहस्तादि शलाकानां समुदायमभिप्रेत्योक्तमित्यविरोधः । अङ्गुलीनां षष्टिरस्थीनि एकैकस्या अङ्गुलेरस्थित्रयसम्बन्धात् । पार्ष्ण्योः पादपश्चिमभागयोरस्थिनी द्वे, एकैकस्मिन् पादे गुल्फौ वामदक्षिणस्थौ द्वौद्वाविति चतुर्षु गुल्फेष्वस्थिचतुष्टयम् । बाह्वोररत्निप्रमाणानि चत्वार्यस्थीनि, जङ्घयोश्चत्वार्यस्थीनीति चतुःसप्ततिः । जानुनी जङ्घोरुसन्धी, कपोलो गण्डः, ऊरुफलके सक्थिनी, अंसौ बाहुमूले, एतत्समुद्भवे प्रत्येकं द्वेद्वे अस्थिनी, अक्षः कर्णनेत्रान्तरालदेशः, तालूपके तालुमूले, श्रोणीफलके कटी प्रत्येकं द्वेद्वे अस्थिनी निर्दिशेदिति चतुर्दशास्थीनि । भगपदेन शिश्नस्याऽप्युपलक्षणं तदस्थि एकम । पृष्ठे पञ्चचत्वारिंशदस्थीनि । ग्रीवा कन्धरा पञ्चदशास्थियुक्ता भवति । एकमस्थि समाश्रित्य जत्रु वक्षोंऽससन्धिद्वयं, हनुश्चिबुकः स्यादित्येवं चतुःषष्टिरस्थीनि । तस्य हनोर्मूले द्वे अस्थिनी, ललाटे अक्ष्णि गण्डे कपोलाक्षमध्यप्रदेशे प्रत्येकं द्वे, नासा घनैकास्थिमती, पार्श्वकाः पञ्जरास्थीनि स्थालैः तदाधारभूतैरस्थिभिरर्बुदनामकैरस्थिविशेषैश्च सह द्विसप्ततिरित्येवमेकाशीतिरस्थ्नां भवति । शङ्खौ भ्रूकर्णान्तरालास्थिनी द्वे शिरसः कपालानि चत्वारि उरःप्रभृतिसप्तदशास्थीनि इत्येवं त्रयोविंशतिः । एवं मिलित्वा षष्ट्यधिकं शतत्रयमिति

पुरुषस्य मनुष्यस्याऽस्थिपरिगणनम् । वैशब्दः पादपूरणे । अन्ये द्वादशाऽव्ययशब्दाः षड्भिः श्लोकैः प्रत्येकमुक्तानां सङ्ख्यानां न्यूनाधिकत्वयोर्व्यवच्छेदाय ॥ ८५-९० ॥

(मिता०) किञ्च—

स्थालैरिति । स्थालानि दन्तमूलप्रदेशस्थान्यस्थीनि द्वात्रिंशत्तैः सह द्वात्रिंशद्दन्ताश्चतुःषष्टिर्भवन्ति । नखाः करचरणरुहा विंशतिर्हस्तपादस्थानि शलाकाकाराण्यस्थीनि मणिबन्धस्योपरिवर्तीनि अङ्गुलिमूलस्थानि विंशतिरेव । तेषां नखानां शलाकास्थ्नां च स्थानचतुष्टयं द्वौ चरणौ करौ चेत्येवमस्थां चतुरुत्तरं शतम् ॥ ८५ ॥

(मिता०) किञ्च—

षष्टीति । विंशतिरङ्गुलयस्तासामेकैकस्यास्त्रीणि त्रीणीत्येवमङ्गुलिसंबन्धीन्यस्थीनि षष्टिर्भवन्ति । पादयोः पश्चिमौ भागौ पार्ष्णी तयोरस्थीनि, द्वे एकैकस्मिन्पादे गुल्फौ द्वावित्येवं चतुर्षु गुल्फेषु चत्वार्यस्थीनि, बाह्वोररत्निप्रमाणानि चत्वार्यस्थीनि, जङ्घयोस्तावदेव चत्वार्येवेत्येवं चतुःसप्ततिः ॥ ८६ ॥

(मिता०) किञ्च—

द्वेद्वे इति । जङ्घोरुसन्धिर्जानुः, कपोलो गल्लः, ऊरुः सक्थि तत्फलकम्, अंसो भुजशिरः, अक्षः कर्णनेत्रयोर्मध्ये शङ्खादधोभागः, तालूषकं काकुदं, श्रोणी ककुद्मती तत्फलकं, तेषामेकैकस्यास्थीनि द्वेद्वे विनिर्दिशेदित्येवं चतुर्दशास्थीनि भवन्ति ॥ ८७ ॥

(मिता०) किञ्च—

भगास्थीति । गुह्यास्थ्येकं पृष्ठे पश्चिमभागे पञ्चचत्वारिंशदस्थीनि भवन्ति । ग्रीवा कंधरा सा पञ्चदशास्थीं स्यात् भवेत् । वक्षोंसयोः सन्धिर्जत्रु प्रतिजत्रु एकैकम्, हनुश्चिबुकं तत्राप्येकमस्थीत्येवं चतुःषष्टिः ॥ ८८ ॥

(मिता०) किञ्च—

तन्मूल इति । तस्य हनोर्मूलेऽस्थिनी द्वे । ललाटं भालम्, अक्षि चक्षुः, गण्डः, कपोलाक्षयोर्मध्यप्रदेशः तेषां समाहारो ललाटाक्षिगण्डं तत्र प्रत्येकमस्थियुगुलम् । नासा घनसंज्ञकास्थिमती । पार्श्वकाः कक्षाधःप्रदेशसंबद्धान्यस्थीनि तदाधारभूतानि स्थालकानि तैः स्था-

लकैः अर्बुदैश्चास्थिविशेषैः सह पार्श्वकाः द्विसप्ततिः । पूर्वोक्तैश्च नवभिः सार्धमेकाशीतिर्भवन्ति ॥ ८९ ॥

(मिता०) किञ्च—

द्वाविति । भ्रूकर्णयोर्मध्यप्रदेशावस्थिविशेषौ शङ्खौ । शिरसः सबन्धीनि चत्वारि कपालानि । उरो वक्षस्तत्सम्बन्धास्थिकमित्येवं त्रयोविंशतिः । पूर्वोक्तैश्च सह षष्ट्यधिकं शतत्रयमित्येवं पुरुषस्यास्थिसंग्रहः कथितः ॥ ९० ॥

गन्धरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः ॥
नासिका लोचने जिह्वा त्वक् श्रोत्रं चेन्द्रियाणि च ॥ ९१ ॥

(वी० मि०) नासिकादीनि ज्ञानेन्द्रियाणि शरीरान्तर्भूतानि तेषां च यथासङ्ख्यं गन्धादयो विषया विशेषेण सिनोति पुरुषान् बध्नातीति व्युत्पत्त्या हि संसूचितम् । एवमग्रिमश्लोकेऽपि ॥ ९१ ॥

(मिता०) सविषयाणि ज्ञानेन्द्रियाण्याह—

गन्धेति । एते गन्धादयो विषयाः पुरुषस्य बन्धनहेतवः । 'विषयशब्दस्य 'षिञ् बन्धने' इत्यस्य धातोर्व्युत्पन्नत्वात् । एतैश्च गन्धादिभिर्बोध्यत्वेन व्यवस्थितैः स्वस्वगोचरसंवित्साधनतयानुमेयानि घ्राणादीनि पञ्चेन्द्रियाणि भवन्ति ॥ ९१ ॥

हस्तौ पायुरुपस्थं च मु(१)खं पादौ च पञ्च वै ॥
कर्मेन्द्रियाणि जानीयान्मनश्चैवोभयात्मकम् ॥ ९२ ॥

(वी० मि०) पायुर्गुदम्, उपस्थं मैथुनसाधनं वराङ्गम्, अन्यानि प्रसिद्धानि । कर्मेन्द्रियाणि आदाननिर्हारानन्दव्यवहारसंवरणात्मककर्मपञ्चकसम्पादकानीन्द्रियाणि मनश्च उभयात्मकं ज्ञानेन्द्रियकर्मेन्द्रियात्मकं ज्ञानं कर्माणि जनकत्वादिन्द्रियत्वाच्च । एवकारेणाऽन्येषामुभयात्मकत्वव्यवच्छेदः । वैशब्दः पादपूरणे ॥ ९२ ॥

(मिता०) कर्मेन्द्रियाणि दर्शयितुमाह—

हस्ताविति । हस्तौ प्रसिद्धौ, पायुर्गुदम्, उपस्थं रतिसंपाद्यसुखसाधनं, जिह्वा प्रसिद्धा, पादौ च एतानि हस्तादीनि पञ्च कर्मेन्द्रियाणि आदाननिर्हारानन्दव्याहारविहारादिकर्मसाधनानि जानी-

---

(१) जिव्हा-इति मु० पु० पाठः ।

यात् । मनोऽन्तःकरणं युगपत् ज्ञानानुत्पत्तिगम्यं तच्च बुद्धिकर्मेन्द्रियसहकारितयोभयात्मकम् ॥ ९२ ॥

नाभिरोजो गुदं शुक्रं शोणितं शङ्खकौ तथा ॥
मूर्द्धासकण्ठहृद(१)यं प्राणस्यायतनानि च ॥ ९३ ॥

(वी० मि०) नाभ्यादीनि दश प्राणस्य दशविधस्याऽसाधारणान्यायतनानि आधारभूतानि । ओजश्चक्षु(२)र्वर्तिं, शङ्खकौ व्याख्यातौ । तथाशब्देन वक्ष्यमाणवपादिसमुच्चयः । चशब्देन सामान्यत(३)आयतनत्वं तेषां समुच्चीयते । शेषं सुगमम् ॥ ९३ ॥

(मिता०) प्राणायतनानि दर्शयितुमाह—

नाभिरिति । नाभिप्रभृतीनि दश प्राणस्य स्थानानि । समाननाम्नः पवनस्य सकलाङ्गचारित्वेऽपि नाभ्यादिस्थानाविशेषवाचोयुक्तिः प्राचुर्याभि(४)प्राया ॥ ९३ ॥

(वी० मि०) असाधारण्येन प्राणस्यायतनान्युक्तानि, सामान्यतस्तदायतनानि साधारणानि च स्फुटयति—

वपा वसाऽवहननं नाभिः क्लोम यकृत् प्लिहा ॥
क्षुद्रान्त्रं वृक्ककौ वस्तिः पुरीषाधानमेव च ॥ ९४ ॥
आमाशयोऽथ हृदयं स्थूलान्त्रं गुद एव च ॥
उदरं च गुदौ कोष्ठ्यौ विस्तारोऽयमुदाहृतः ॥ ९५ ॥
कनीनिके चाऽक्षिकूटे शष्कुली कर्णपत्रकौ ॥
कर्णौ(५) शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे ॥ ९६ ॥
वङ्क्षणौ वृषणौ वृक्कौ श्लेष्मसङ्घातजौ स्तनौ ॥
उपजिह्वा स्फिजौ बाहू जङ्घोरुषु च पिण्डिका ॥ ९७ ॥
तालूदरं वस्तिशीर्षं चिबुके गलशुण्डिके ॥
अवटश्चैवमेतानि स्थानान्यत्र शरीरके ॥ ९८ ॥

---

(१) मूर्धासहृदयं कण्ठः—इति क०पु०पाठः ।
(२) चक्षुर्वर्ण—इति ख० पु० पाठः ।
(३) सामान्यतया अदनत्वं तेषां – इति ख० पु० पाठः ।
(४) भिप्रायेण ङ । (५) गण्डौ शङ्खौ—इति क० पु. पाठः ।

अक्षिर(१)न्ध्रचतुष्कं च पद्धस्तहृदयानि च ॥
नव छिद्राणि तान्येव प्राणस्यायतनानि (२)च ॥ ९९ ॥

वपा ह्नन्मेदः, वसा मांसस्नेहः, अवहननं फुप्फुसाख्यं, नाभिः प्रागभिहिताऽपि विस्तरेणाऽभिधाने प्रतिपाद्यमाना न दोषाय, एवमन्यत्रापि द्रष्टव्यम् । क्लोम मांसपिण्डो दक्षिणकुक्षिगतः, यकृत् समीपस्था कालिका, प्लीहा हृदयाधोवामतः फुप्फुससमीपे स्थिता, ह्रस्वत्वं छान्दसम् । क्षुद्रान्त्रं हृदयस्थं शोणितमेदप्रभवमन्त्रं सार्द्धत्रिव्यायामं, वृक्कौ हृदयसमीपस्थौ मांसपिण्डौ, वस्तिर्मूत्राशयः, पुरीषाधानं पुरीषाशयोऽन्तर्वर्ती, आमाशयोऽपक्काहाराधारः, हृदयं हृत्पुण्डरीकं, स्थूलान्त्रं गलनालं, कोष्ठे नाभेरधःप्रदेशे भवौ कोष्ठ्यौ, गुदौ श्रोणिफलके अयं प्राणायतनविस्तारः कैश्चिदुदाहृतः। अन्ये त्वत्र न्यूनाधिकभावे प्राणायाममेवमाहुरित्याह कनीनिकं इति । कनीनिके अक्षितारके, अक्षिकूटे अक्षिनासान्तरे, शष्कुली कर्णरन्ध्रः, कर्णपत्रकौ पार्थिवौ पत्राकारौ श्रवणपदवाच्यौ, गण्डशङ्खौ व्याख्यातौ, दन्तवेष्टौ दन्तपङ्क्ती, ककुन्दरे जघनकूपकौ, वङ्क्षणौ जङ्घोरुसन्धी, वृक्कौ प्रागुक्तौ, श्लेष्मणः सङ्घातेन समूहेन जातौ स्तनौ वैराग्यार्थं विशेषणम् । उपजिह्वा जिह्वामूलभवा घण्टिका, स्फिजौ श्रोणिफलके, पिण्डिका जङ्घयोरूर्वोश्च मांसलप्रदेशः, गलशुण्डिके हनुमूलगलयोः सन्धी, अवटो निम्नो देशः, अवटुरिति पाठे घाटा, अक्षिरन्ध्राणां चक्षुःप्रान्तानां चतुष्कं तानि प्रसिद्धानि, चक्षुर्द्वयं नासारन्ध्रद्वयं कर्णद्वयं मुखं पायुरुपस्थमित्येतानि नव छिद्राणि । एवमेतानि स्थानानि अत्र शरीरके कुत्सिते शरीरे प्राणस्यायतनान्याधारभूतानीति। नवभिश्चकारैरथशब्देन च दशानामसाधारणायतनानां मध्येऽत्रानुक्तानां सङ्ग्रहः । तत्र केषाञ्चिन्मते षडनुक्ताः, अन्येषां मते तु चत्वारोऽनुक्ताः स्वयं विवेचनीयाः । एवकाराभ्यामुभयकल्पयोरुक्तानामायतनत्वायोगो व्यवच्छिन्नः । शेषं सुगमम् ॥ ९४—९९ ॥

(मिता०) प्राणायतनानि प्रपञ्चयितुमाह—

वपेत्यादि । वपा प्रसिद्धा, वसा मांसस्नेहः, नाभिः प्रसिद्धा,

---

(१) अक्षिवर्त्मचतुष्कं—इति मु. पु. पाठः । (२) तु—इति मु. पु. पाठः ।

अवहननं फुप्फुसः, प्लीहा आयुर्वेदप्रसिद्धा, तौ च मांसपिण्डाकारौ स्तः सव्यकुक्षिगतौ। यकृत् कालिका, (१)क्लोम मांसपिण्डः तौ च दक्षिणकुक्षिगतौ, क्षुद्रान्त्रं हृत्स्थान्त्रमं, वृक्कौ हृदयसमीपस्थौ मांसपिण्डौ, वस्तिर्मूत्राशयः, पुरीषाधानं पुरीषाशयः, आमाशयोऽपक्वान्नस्थानम्, हृदयं हृत्पुण्डरीकम्, स्थूलान्त्रगुदोदराणि प्रसिद्धानि, बाह्याद् गुदवलयादन्तर्गुदवलये द्वे, तौ च गुदौ काष्ठ्यौ कोष्ठ नाभेरधःप्रदेशे भवौ। अयं च प्राणायतनस्य विस्तार उक्तः । पूर्वश्लोके तु संक्षेपः। अत एव पूर्वश्लोकोक्तानां केषांचिदिह पाठः ॥९४-९५॥

(मिता०) पुनः प्राणायतनप्रपञ्चार्थमाह—

कनीनिके इत्यादि । कनीनिके अक्षितारके, अक्षिकूटे अक्षिनासिकयोः सन्धी, शष्कुली कर्णशष्कुली, कर्णपत्रकौ कर्णपाल्यौ, कर्णौ प्रसिद्धौ, दन्तवेष्टौ दन्तपाल्यौ, ओष्ठौ प्रसिद्धौ, ककुन्दरे जघनकूपकौ, वङ्क्षणौ जघनोरुसंधी, वृक्कौ पूर्वोक्तौ, स्तनौ च श्लेष्मसंघातजौ, उपजिह्वा घण्टिका, स्फिजौ कटिप्रोथौ, बाहू प्रसिद्धौ, जङ्घोरुषु च पिण्डिका जङ्घयोरूर्वोश्च पिण्डिका मांसलप्रदेशः, गलशुण्डिके हनुमूलगलयोः सन्धी, शीर्षं शिरः, अवटः शरीरे यः कश्चन निम्नो देशः कण्ठमूलकक्षादिः। अवटुरिति पाठे कुकाटिका। तथाक्ष्णोः कनीनिकयोः प्रत्येकं श्वेतं पार्श्वद्वयमिति वर्णचतुष्टयम् । यद्वा अक्षिपुटचतुष्टयम्। शेषं प्रसिद्धम्। एवमेतानि कुत्सिते शरीरे स्थानानि। तथाक्षियुगलं कर्णयुग्मं नासाविवरद्वयमास्यं पायुरुपस्थमित्येतानि पूर्वोक्तानि नव छिद्राणि च प्राणस्यायतनान्येव ॥९६-९९॥

शिराः शतानि सप्तैव नव स्नायुशतानि च ॥
धमनीनां शते द्वे तु पञ्च पेशीशतानि च ॥ १०० ॥
एकोनत्रिंशल्लक्षाणि तथा नव शतानि च ॥
षट्पञ्चाशद्विजा(२)नीयाच्छिरा धमनिसंज्ञिताः ॥ १०१ ॥

(वी० मि०) शिरा नाभिसम्बद्धा वातपित्तकफवाहिन्यः सकलदेहव्यापिका नाड्यः सप्त शतानि। स्नायूनामस्थिबन्धननाडीनां

---

(१) क्लोमा० ख। (२) षट् पञ्चाशच्च जानीत-इति मु. पु. पाठः।

शतानि नव । धमनीनां नाभेरूर्ध्वस्थानां प्राणादिवाहिनीनां नाडीनां द्वे शते । पेशीनां पिण्डाकारमांसलभागानां शतानि पञ्च । एकोनत्रिंशल्लक्षाणि नव शतानि षट्पञ्चाशच्च तथा शाखाप्रशाखाभेदेन शिरा धमनिसंज्ञिताः प्रागुक्ता विजानीयात् । 'एकोनविंशतिर्लक्षा' इति शूलपाणिना पठितं, लक्षाशब्दः स्त्रीलिङ्ग एवायमिति व्याख्यातं च। आद्यमध्यचरमचशब्दैः शाखाप्रशाखाभेदविवक्षाम(१)न्तरेणाऽधिकसंख्या चतुर्षु वाक्यार्थेषु व्यवच्छिद्यते । तृतीयचकारेण स्नायूनामपि शाखाभेदेन बहुतमत्वं सूचयति ॥ १००-१०१ ॥

(मिता०) किंच—

शिरा इति । शिरा नाभिसम्बन्धाश्चत्वारिंशत्संख्या वातपित्तश्लेष्मवाहिन्यः सकलकलेवरव्यापिन्यो नानाशाखिन्यः सत्यः सप्तशतसंख्या भवन्ति । तथाङ्गप्रत्यङ्गसन्धिबन्धनाः स्नायवो नवशतानि । धमन्यो नाम नाभेरुद्भूताश्चतुर्विंशतिसंख्याः प्राणादिवायुवाहिन्यः शाखाभेदेन द्विशतं भवन्ति । पेश्यः पुनर्मांसलाकारा ऊरुपिण्डकाद्यङ्गप्रत्यङ्गसंधिन्यः पञ्चशतानि भवन्ति ॥१०० ॥

(मिता०) पुनश्चासामेव शिरादीनां शाखाप्राचुर्येण संख्यान्तरमाह—

एकोनेति । शिराधमन्यो मिलिताः शाखोपशाखाभेदेन एकोनत्रिंशल्लक्षाणि । तथा च नवशतानि षट्पञ्चाशच्च भवन्तीत्येवं हे साम्नवःप्रभृतयः मुनयो जानीत ॥ १०१ ॥

त्रयो लक्षास्तु विज्ञेयाः श्मश्रुकेशाः शरीरिणाम् ॥
सप्तोत्तरं मर्मशतं द्वे च सन्धिशते तथा ॥ १०२ ॥
रोम्णां कोट्यस्तु पञ्चाशच्चतस्रः कोट्य एव च ॥
सप्तषष्टिस्तथा लक्षाः सार्द्धाः स्वेदायनैः सह ॥ १०३ ॥
वायवीयैर्विगण्यन्ते विभक्ताः परमाणवः ॥
यद्यप्येको नु वेदैषां (२)भावानां चैव संस्थितिम् ॥१०४॥

(वी० मि०) श्मश्रूणि मूर्द्धकक्षादिकेशाश्च मिलितास्त्रयो लक्षा

---

(१) विवक्षासम्भवेनाऽधिक०—इति ख. पु. पाठः।

(२) यद्यप्येकोऽनुवेत्स्येषां—इति मु० पु० पाठः।

ज्ञेयाः । पुस्त्वं छान्दसम् । मर्माणि अल्पाभिघातेऽप्यतिपीडाकराणि, स्थानानि वस्त्यादीनि नवैकशतसंख्यानि। अस्थ्नां सन्धिशते द्वे। श्मश्रुकेशव्यतिरिक्तानां रोम्णां सार्द्धकोटित्रयमितानां परमाणवो वायवीयैः परमाणुभिर्विभक्ताः पृथक्कृताः स्वसमसंख्यैः स्वेदनिर्गममार्गैः सह चतुःपञ्चाशत् कोट्यः सार्द्धषष्टिर्लक्षाश्चाऽनुमानेन विगण्यन्ते । यद्येकोऽपि एषां शिष्याणां मध्ये भावानामस्थिरोमादीनां संस्थितिं मर्यादां वेदेत्यर्द्धोक्तिः, तदा स दिव्यदृष्टिरिति वक्तव्यशेषस्य याज्ञवल्क्येऽतीन्द्रियार्थदर्शनाय ध्यानासङ्गादनभिधानमित्याभाति। नु वितर्के। यद्वा तदा कृत्यसावित्यग्रेतनमनुषञ्जनीयम्। अथवा यद्यप्यन्यैरनुमानेनैव भुवि गण्यन्ते तथाप्येषां मध्ये एकोऽहं भावानां संस्थितिं प्रत्यक्षेण वेदेत्यर्थः । श्लोकद्वयस्थैस्तुकारचकारैश्चतुर्भिश्चतुर्षु वाक्यार्थेषूनसंख्याव्यवच्छेदः । तथाशब्दाभ्यां विज्ञयं विज्ञेये इत्यर्थद्वयमनुकृष्यते। तृतीयश्लोकस्थचकारेण शरीरसृष्टिक्रमसमुच्चयः । एवकारस्त्वेषामित्यत्र एक इत्यत्र वाऽन्वितः ॥१०२-१०४॥

(मिता०) किंच—

त्रय इति । शरीरिणां श्मश्रूणि केशाश्च मिलिताः सन्तस्त्रयो लक्षा विज्ञेयाः । मर्माणि मरणकराणि क्लेशकराणि च स्थानानि तेषां सप्तोत्तरं शतं ज्ञेयम् । अस्थ्नां तु द्वे सन्धिशते । स्नायुशिरादिसन्धयः पुनरनन्ताः ॥ १०२ ॥

(मिता०) सकलशरीरसुषिरादिसंख्यामाह—

रोम्णामित्यादि । पूर्वोदितशिराकेशादिसहितानां रोम्णां परमाणवः सूक्ष्मसूक्ष्मतररूपा भागाः स्वेदस्रवणसुषिरैः सह चतुःपञ्चाशत्कोट्यः, तथा सप्तोत्तरषष्टिलक्षाः सार्धाः पञ्चाशत्सहस्रसहिताः वायवीयैर्विभक्ताः पवनपरमाणुभिः पृथक्कृता विगण्यन्ते । एतच्च शास्त्रदृष्ट्याऽभिहितम् । चक्षुरादिकरणपथगोचरत्वाभावादस्यार्थस्य, इममतिगहनमर्थं शिरादिभावसंस्थानरूपं हे मुनयः ! भवतां मध्ये यः कश्चिदनुवेत्ति सोपि महान् अग्र्यो बुद्धिमताम् । अतो यत्नतो बुद्धिमता बोद्धव्या भावसंस्थितिः ॥ १०३-१०४ ॥

रसस्य नव विज्ञेया जलस्याञ्जलयो दश ॥
सप्तैव तु पुरीषस्य रक्तस्याष्टौ प्रकीर्तिताः ॥१०५ ॥

षट् श्लेष्मा पञ्च पित्तं च चत्वारो मूत्रमेव च ॥
वसा त्रयो द्वौ तु मेदो मज्जैकोर्ध्वं तु मस्तके ॥ १०६ ॥
श्लेष्मौजसस्तावदेव रेतसस्तावदेव तु ॥
इत्येतदस्थिरं वर्ष्म यस्य मोक्षाय कृत्यसौ ॥ १०७ ॥

(वी० मि०) स्वस्थस्य रसादीनामुक्तसंख्या अञ्जलयः शरीरे प्रकीर्तिताः । सम्यक्परिणताहारो रसः तस्य नवाऽञ्जलयः । एवमग्रेऽपि । वसा मांसस्नेहः, मेदो मांसरसः, मज्जाऽस्थि, सुषिरगत एकोऽञ्जलिर्मस्तके च मज्जार्द्धाञ्जलिमितः, श्लेष्मौजसः श्लेष्मसारस्य तावदेव अञ्जल्यर्द्धमेव । द्वादशभिरव्ययैर्द्वाद्दशसु वस्तुषु न्यूनाधिकसंख्याऽञ्जलिगना व्यवच्छिद्यते । एतत्सर्वं जानतो मोक्षसाधनं वैराग्यमुत्पद्यत इत्याशयवानाह इतीति । इति नश्वरकथितवस्तुसामुदायनिमित्तत्वादेतद्वर्ष्म शरीरमस्थिरम्, तच्चाऽस्थिरत्वेनाऽसारत्वेन दुःखमयत्वेन च ज्ञातं योगाभ्यासमुखेन मोक्षाय यस्य पुंसो भवति, असौ कृती पुण्यवान् ॥ १०५—१०७ ॥

(मिता०) शारीररसादिपरिमाणमाह—

रसस्येत्यादि । सम्यक्परिणताहारस्य सारो रसस्तस्य परिमाणं नवाञ्जलयः । पार्थिवपरमाणुसंश्लेषनिमित्तस्य जलस्याञ्जलयो दश विज्ञेयाः । पुरीषस्य वर्चस्कस्य सप्तैव । रक्तस्य जाठरानलपरिपाकापादितलौहित्यस्यान्नरसस्याष्टावञ्जलयः प्रकीर्तिताः । श्लेष्मणः कफस्य षडञ्जलयः । पित्तस्य तेजसः पञ्च । मूत्रस्योष्मारस्य चत्वारः । वसाया मांसस्नेहस्य त्रयः । मेदसो मांसरसस्य द्वावञ्जली । मज्जा त्वस्थिगतसुषिरगतस्तस्यैकोऽञ्जलिः । मस्तके पुनरर्धाञ्जलिः । मज्जा श्लेष्मौजसः श्लेष्मसारस्य तथा रेतसश्चरमधातोस्तावदेवार्धाञ्जलिरेव । एतच्च समधातुपुरुषाभिप्रायेणोक्तम् । विषमधातोस्तु न नियमः । 'वैलक्षण्याच्छरीराणामस्थायित्वात्तथैव च । दोषधातुमलानां च परिमाणं न विद्यते' ॥ इत्यायुर्वेदस्मरणात् । इतीदृशमास्थिस्नाय्वाद्यारब्धमेतदशुचिनिधानं वर्ष्मास्थिरमिति यस्य बुद्धिरसौ कृती पण्डितो मोक्षाय समर्थो भवति । वैराग्यनित्यानित्यविवेकयोर्मोक्षोपायत्वात्, अस्थिमूत्रपुरीषादिप्राचुर्यज्ञानस्य वैराग्यहेतुत्वात् । अत

एव व्यासः—'सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः । शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥ यदि नामास्य कायस्य यदन्तस्तद्बहिर्भवेत् । दण्डमादाय लोकोऽयं शुनः काकांश्च वारयेत्' ॥ इति । तस्मादीदृशकुत्सितशरीरस्यात्यन्तिकविनिवृत्त्यर्थमात्मोपासने प्रयतितव्यम् ॥ १०५-१०७ ॥

(वी० मि०) एवमुत्पन्ने वैराग्ये सत्यात्मोपासनं कर्तव्यं यथा तदाह—

द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ॥
हिताहिता नाम नाड्यस्तासां मध्ये शशिप्रभम् ॥ १०८ ॥
मण्डलं तस्य मध्यस्थ आत्मा दीप इवाऽचलः ॥
स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ॥ १०९ ॥
ज्ञेयं चारण्यकमहं यदादित्यादवाप्तवान् ॥
योगशास्त्रं च मत्प्रोक्तं ज्ञेयं योगमभीप्सता ॥ ११० ॥
अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम् ॥
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत् प्रभुः ॥१११॥

हृदयप्रदेशादभि सर्वतो निःसृतो देहस्य हिताहितानाम्नापि हिता नाड्यो द्वासप्ततिसहस्राणि यास्तासां नाडीनां मध्ये शशिप्रभं मण्डलं तस्य मध्यस्थोऽचलः स्थितो दीप इव प्रकाशमान आस्ते स आत्मा ज्ञेयः साक्षात्कर्तव्यः । अत्र फलमाह—तमात्मानं प्रत्यक्षतो विदित्वा इह संसारे पुनर्न जायत इति । साक्षात्कारोपायश्रवणमाह ज्ञेयमिति । यदहमादित्याद् गुरोराप्तवानधीतवान् तदारण्यकं बृहदारण्यकाख्यमात्मश्रवणाय ज्ञेयम् । मननमाह—मत्प्रोक्तं च योगप्रतिपादकं शास्त्रं संहितारूपं योगमात्मनि स्थैर्यमभीप्सता ज्ञेयम् । निदिध्यासनमाह अनन्येति । मनोऽन्तःकरणं, बुद्धिं महत्तत्वं, स्मृतिं बुद्धिनिष्ठवृत्तिविशेषात्मिकाम्, इन्द्रियं श्रोत्रादि अनन्यविषयमात्माभिन्नविषयव्यावृत्तं कृत्वा हृदये दीपवत् स्थितो योऽसौ पूर्वमुक्तः स आत्मा ध्येयः । तुकारेणाऽऽत्मसाक्षा-

त्कारं विना मोक्षो व्यवच्छिन्नः । चकाराभ्यां छन्दोगोपनिषदादेर्न्यायशास्त्रादेश्च समुच्चयः ॥ १०८-१११ ॥

(मिता०) उपासनीयात्मस्वरूपमाह—

द्वेत्यादि । हृदयप्रदेशादभिनिःसृताः कदम्बकुसुमकेसरवत्सर्वतो निर्गता हिताहितकरत्वेन हिताहितेतिसंज्ञा द्वासप्ततिसहस्राणि नाड्यो भवन्ति । अपरास्तिस्रो नाड्यस्तासामिडापिङ्गलाख्ये द्वे नाड्यौ सव्यदक्षिणपार्श्वगते हृदि विपर्यस्ते नासाविवरसंबद्धे प्राणापानायतने । सुषुम्णाख्या पुनस्तृतीया दण्डवन्मध्ये ब्रह्मरन्ध्रविनिर्गता । तासां नाडीनां मध्ये मण्डलं चन्द्रप्रभं तस्मिन्नात्मा निर्वातस्थदीप इवाचलः प्रकाशमान आस्ते स एवंभूतो ज्ञातव्यः । यतस्तत्साक्षात्करणादिह संसारे न पुनः संसरति अमृतत्वं प्राप्नोति ॥ १०८-१०९ ॥

(मिता०) किञ्च—

ज्ञेयमिति । चित्तवृत्तेर्विषयान्तरातिरस्कारेणात्मनि स्थैर्यं योगस्तत्प्राप्त्यर्थं बृहादारण्यकाख्यमादित्याद्यन्मया प्राप्तं तच्च ज्ञातव्यम् । तथा यन्मयोक्तं योगशास्त्रं तदपि ज्ञातव्यम् ॥ ११० ॥

(मिता०) कथं पुनरसावात्मा ध्येय इत्यत आह—

अनन्यविषयामिति । आत्मव्यतिरिक्तविषयेभ्यो मनोबुद्धिस्मृतीन्द्रियाणि प्रत्याहृत्य आत्मैकविषयाणि कृत्वा आत्मा ध्येयः । योऽसौ प्रभुर्निर्वातस्थप्रदीपवद्दीप्यमानो निष्प्रकम्पो हृदि तिष्ठति । एतदेव तस्य ध्येयत्वं यच्चित्तवृत्तेर्बहिर्विषयावभासतिरस्कारेणात्मप्रवणतायाम शरावसंपुटनिरुद्धप्रभाप्रतानप्रसरस्येव प्रदीपस्यैकनिष्ठत्वम् ॥ १११ ॥

(वी० मि०) आशयशुद्धयभावेन समाध्यशक्तं प्रति मोक्षोपायमाह—

यथाविधानेन पठन् साम(१)गानमविच्युतम् ॥
सावधानस्तदभ्यासात्परं ब्रह्माऽधिगच्छति ॥ ११२ ॥

साम्नां सम्बन्धिगानरूपं ग्रन्थमविच्युतमस्खलितं यथास्यात्तथा यथाविधानेन वेदोपादिष्टविधिना सावधानः सामध्वन्यनुस्यूतात्मैकाग्रचित्तः पठन् तदभ्यासात्तथा क्रमेणाऽऽशयशुद्धिसमा-

(१) सामगाय०—इति मु० पु० पाठः ।

धिनिष्पादनेन परं ब्रह्माऽधिगच्छति साक्षात्करोति प्राप्नोति वा । 'सामगायमविच्युत'मिति तु शूलपाणौ पाठः ॥ ११२ ॥

(मिता०) यस्य पुनश्चित्तवृत्तिर्निराकारालम्बनतया समाधौ नाभिरमते तेन शब्दब्रह्मोपासनं कार्यमित्याह—

यथाविधानेनेति । स्वाध्यायावगतमार्गानतिक्रमेण सामगायं सामगानम् । साम्नो गानात्मकत्वेऽपि गायमिति विशेषणं प्रगीतमन्त्रव्युदासार्थम् । अविच्युतमस्खलितं, सावधानः सामध्वन्य(१)नुस्यूतात्मैकाग्रचित्तवृत्तिः पठंस्तदभ्यासवशात्तत्र निष्णातः शब्दाकारशून्योपासनेन परं ब्रह्माऽधिगच्छति । तदुक्तम्–'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति' इति ॥ ११२ ॥

(वी०मि०) सामानभिज्ञस्य मोक्षोपायमाह—

अपरान्तकमुल्लोप्यं मद्रकं मकरीं(२) तथा ॥
औवेणकं सरोविन्दुमुत्तरं गीतकानि च ॥ ११३ ॥
ऋग्गाथा पाणिका दक्षविहिता ब्रह्मगीतिका ॥
ज्ञेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितम् ॥ ११४ ॥

अपरान्तकादीनि सप्त महागीतिकानि सङ्गीते प्रसिद्धानि । ऋग्गाथाद्याश्चतस्रो गीतिकास्तत्रैव प्रसिद्धाः । एतदुभयविधं ज्ञेयम् । तत्राऽभ्यासकरणान्मोक्षसंज्ञितमात्मस्वरूपताचिन्तनेन मोक्षेण कार्येण संज्ञितं संज्ञावत् मोक्षसाधनेति संज्ञावदिति यावत् । चकारेण परस्परसाहित्यं बोधयति ॥११३-११४॥

(मिता०) यस्य पुनर्वैदिक्यां गीतौ चित्तं नाभिरमते तेन लौकिकगीतानुस्मृतात्मोपासनं कार्यमित्याह—

अपरान्तकमित्यादि । अपरान्तकोल्लोप्यमद्रकमकर्यौवैणकानि सरोविन्दुसहितं चोत्तरमित्येतानि प्रकराख्यानि सप्त गीतकानि । चशब्दादासारितवर्धमानकादिमहागीतानि गृह्यन्ते । ऋग्गाथाद्याश्चतस्रो गीतिका इत्येतदपरान्तकादिगीतजातमध्यारोपितात्मभावं मोक्षसाधनत्वान्मोक्षसंज्ञितं मन्तव्यम् । तदभ्यासस्यैकाग्रतापादनद्वारेणा त्मैकाग्रतापत्तिकारणत्वात् ॥ ११३-११४ ॥

---

(१) अनुस्मृतात्मैक क। (२) प्रकरीं—इति मु० पु० पाठः ।

(वी०मि०) किञ्च—

वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ॥
तालज्ञश्चाऽप्र(१)यत्नेन मोक्षमार्गं नियच्छति ॥ ११५ ॥

श्रुतयो द्वाविंशतिः स्वराणां प्रभेदाः, जातयः सप्त निषादाद्याः, तालध्वनिविशेषो रूपकादिः मोक्षमार्गं चित्तसमाधियोगरूपं नियच्छति प्राप्नोति। चकारः सर्वसाहित्यः॥ ११५ ॥

(मिता०) किंच—

वीणेति। भरतादिमुनिप्रतिपादितवीणावादनतत्त्ववेदी। श्रूयत इति श्रुतिः द्वाविंशतिविधा सप्तस्वरेषु। तथा हि-षड्जमध्यमपञ्चमाः प्रत्येकं चतुःश्रुतयः ऋषभधैवतौ प्रत्येकं त्रिश्रुती इति। जातयस्तु षड्जादयः सप्त शुद्धाः, सङ्करजातयस्त्वेकादशेत्येवमष्टादशविधास्तासु विशारदः प्रवीणः ताल इति गीत(२)परिमाणं कथ्यते। तत्स्वरूपज्ञश्च तदनुविद्धब्रह्मोपासनतया तालादिभङ्गभयाच्चित्तवृत्तेरात्मैकाग्र्यतायाः सुकरत्वादल्पायासेनैव मुक्तिपथं नियच्छति प्राप्नोति॥११५॥

(वी०मि०) गीतानां ब्रह्मोपासनबुद्ध्या कृतानां मोक्षहेतुत्वमतथाकृतानां तु फलमाह—

गीतज्ञो यदि योगेन नाप्नोति परमं पदम् ॥
रुद्रस्याऽनुचरो भूत्वा तेनैव सह मोदते ॥ ११६ ॥

योगेन योगद्वारा तदा मोक्ष एवेत्यन्वयः। शेषं स्पष्टम्। तथा रुद्रसेवया जन्मान्तरे सत्त्वशुद्धिमासाद्य मुच्यत इत्याशयः॥ ११६ ॥

(मिता०) चित्तविक्षेपाद्यन्तरायहतस्य गीतज्ञस्य फलान्तरमाह—

गीतज्ञ इति। गीतज्ञो यदि कथंचिद्योगेन परमं पदं नाप्नोति तर्हि रुद्रस्य सचिवो भूत्वा तेनैव सह मोदते क्रीडति ॥ ११६ ॥

(वी०मि०) 'अजः शरीरग्रहणा'दित्येवाऽऽद्युक्तमुपसंहरति—

अनादिरात्मा कथितस्तस्यादिस्तु शरीरकम् ॥
आत्मन(३)श्च जगत्सर्वं जगतश्चाऽऽत्मसम्भवः ॥ ११७ ॥

अनादिरात्मा (४)कथितः। तस्यादिः कुत्सितशरीरग्रहणमेव

---

(१) तालज्ञश्चाऽप्रयासेन—इति मु० पु० पाठः। (२) गीतप्रमाणं कल्प्यते ख.।
(३) आत्मनस्तु—इति मु० पु० पाठः। (४) अनादिर्जीवात्मा-इति क० पु० पाठः।

कथितं प्राक् । परमात्मनः सर्वं जगत् पृथिव्यादिमहाभूतानि । जगतश्च जीवात्मनः शरीरोत्पत्तिरित्यर्थः । तुशब्देन स्वरूपोत्पत्तिर्व्यवच्छिन्ना । आद्यचकारेण महत्तत्वादेर्हेतोर्द्वितीयचकारेण दृष्टस्य हेतोः सङ्ग्रहः ॥ ११७ ॥

(मिता०) पूर्वोक्तमुपसंहरति—

अनादिरिति । प्रागुक्तरीत्या अनादिरात्मा क्षेत्रज्ञस्तस्य च शरीरग्रहणमेवादिरुद्भवः कथितः 'अजः शरीरग्रहणा'दित्यत्र । परमात्मनश्च सकाशात्पृथिव्यादिसकलभुवनोद्भवः तस्माद्(१)भूताच्च पृथिव्यादिभूतसंघाताज्जीवानां स्थूलशरीरतया संभवश्च कथितः 'सर्गादौ स यथाकाश'मित्यादिना ॥ ११७ ॥

(वी०मि०) भूतेभ्य आत्मनस्तस्माच्च भूतानामुत्पत्तिरित्यापाततोऽसङ्गतं मन्वाना मुनयः पृच्छन्ति—

कथमेतद्विमुह्यामः सदेवासुरमानवम् ॥
जगदुत्पन्न(२)मात्मा च कथं तस्मिन्वदस्व नः ॥ ११८ ॥

देवासुरमानुषसहितं जगत्पञ्चभूतात्मकं कथमात्मन उत्पन्नमात्मा च तस्मिन् जगति समुत्पन्नः कथमित्येतद्विमुह्यामो विरोधभावेन सन्देहविषयीकुर्याम वयमतो मोहापाकरणपूर्वकं नो वदस्व । चकारेणाऽनादित्वमपि कथमेवमात्मन इति समुच्चीयते ॥ ११८ ॥

(मिता०) एतदेव प्रश्नपूर्वकं विवृणोति—

कथमिति । यदेतत्सकलसुरासुरमनुजादिसहितं जगत्तदात्मनः सकाशात्कथमुत्पन्नं, आत्मा च तस्मिन् जगति कथं तिर्यङ्नरसरीसृपादिशरीरभाग्भवतीत्येतस्मिन्नर्थे विमुह्यामः । अतो मोहापनुत्यर्थमस्माकं विस्तरशो वदस्व ॥ ११८ ॥

(वी०मि०) निरुपाधेरात्मनो जगदुत्पत्तिस्ततश्च शरीरविशिष्ट आत्मा उत्पद्यते विशेषणीभूतं शरीरमेवोत्पद्यत इति यावदतो न विरोध इत्यक्षरतात्पर्याभ्यां याज्ञवल्क्य उत्तरयति दशभिः—

मोहजालमपास्येह पुरुषो दृश्यते हि यः ॥
सहस्रकरपत्रेक्षः सूर्यवर्च्चाः सहस्रकः ॥ ११९ ॥

---

(१) संभूताश्च पृथिव्यादिभूतसंघाताः जीवानां ङ ।

(२) जगदुद्भूत०—इति मु० पु० पाठः ।

स आत्मा चैव यज्ञश्च विश्वरूपः प्रजापतिः ॥
विराजः सोऽन्नरूपेण यज्ञत्वमुपगच्छति ॥ १२० ॥

मोहजालं तत्त्वज्ञानेनाऽपास्य इह प्रागुक्ते हृत्कमले सहस्रकरचरणचक्षुःशिरोयुक्तः सूर्यतुल्यतेजा योगिभिर्दृश्यते यः परमात्मा स एव यज्ञो यागेनाराध्यः स एव प्रजापतिर्ब्रह्मा विश्वरूपो विराट् स एवाऽन्नरूपेण यज्ञत्वं वाजपेयादिरूपमुपगच्छति । एतेन विश्वरूपत्वाभिधानेन जन्यजनकभावो न विरुद्धयति इति समाधानमपि सूचितम् ॥ ११९-१२० ॥

(मिता०) एवं मुनिभिः पृष्टः प्रत्युत्तरमाह—

मोहजालमित्यादि । इह जगति यदिदं स्थूलकलेवरादावनात्मन्यात्माभिमानरूपं मोहजालं तदपास्य तद्व्यतिरिक्तो यः पुरुषोऽनेककरचरणलोचनः सूर्यवर्चाः अनन्तरश्मिः सहस्रकः बहुशिरा दृश्यते । एतच्च तत्तद्गोचरशक्त्याधारतयोच्यते । तस्य साक्षात्कारादिसम्बन्धाभावात् । स एवात्मा यज्ञः प्रजापतिश्च । यतोऽसौ विश्वरूपः सर्वात्मकः । वैश्वरूप्यमेव कथमिति चेत् । यस्मादसौ विराजः पुरोडाशाद्यन्नरूपेण यज्ञत्वमुपगच्छति । यज्ञाच्च वृष्ट्यादिद्वारेण प्रजासृष्टिरित्येवं वैश्वरूप्यम् ॥ ११९-१२० ॥

यो द्रव्यदेवतात्यागा(१)त्सम्भूतो रस उत्तमः ॥
देवान् सन्तर्प्य स रसो यजमानं फलेन च ॥ १२१ ॥
संयोज्य वायुना सोमं नीयते रश्मिभिस्तथा ॥
ऋग्यजुःसामविहितं सौरं धामोपनीयते ॥ १२२ ॥
तन्म(२)ण्डलादसौ सूर्यः सृजत्यमृतमुत्तमम् ॥
यज्जन्म सर्वभूतानामशनानशनात्मनाम् ॥ १२३ ॥
तस्मादन्नात्पुनर्यज्ञः पुनरन्नं पुनः क्रतुः ॥
एवमेतदनाद्यन्तं चक्रं सम्परिवर्तते ॥ १२३ ॥

(वी० मि०) हविरादिद्रव्यकर्मदेवतोद्देश्यकत्यागरूपाद्वाजपेयादियज्ञाद्यो रसः सारो विकार उत्तमो विश्वनिदानतयाऽदृष्टात्म-

---

(१) त्यागसं०—इति मु० पु० पाठः । (२) स्यमण्डला०—इति मु० पु०पाठः ।

कः संभूतः स रसो देवान् त्यागोद्देश्यान् सन्तर्प्य प्रीणयित्वा यजमानं फलेन संयोज्य सोमं प्रति वायुना नीयते, तेनेष्टेन प्रेरितो वायुर्जलं चन्द्रमसि प्रापयतीत्यर्थः। तत्र सोमदत्तीयैरेव रश्मिभिः किरणैः सौरं धाम सूर्यसम्बन्धि स्थानं तदीय मण्डलं ऋगादिभिस्त्रिभिर्विहितं निष्पादितं प्रतिसर उपनीयते, तेनाऽदृष्टेन प्रेरितं जलं नीयत इत्यर्थः। तस्मान्मण्डलादसौ सूर्यस्तस्याऽदृष्टविशेषस्य परिणामरूपममृतं जलं जगन्मूलत्वादुत्तमं सृजति भूमौ वर्षति । उत्तमत्वमेव स्फुटयति—यद्यस्माज्जलादशनात्मनां भोजनकारिणामात्मनां जङ्गमानामनशनात्मनामनशनकारिणामात्मनां वृक्षसस्यादीनां सर्वेषां भूतानां प्राणिनां जन्म भवति । अथवा भक्ष्याभक्ष्याणां सर्वभूतानां च यतो जन्मेत्यर्थः । तस्माद्दृष्टिसम्पादितजलजनितादन्नात् व्रीह्यादेः पुनर्यज्ञः पुनस्तस्माद्यज्ञादुक्तक्रमेणाऽन्नं तस्मादन्नात् पुनरपि क्रतुर्यज्ञ इत्येवमेतत् संसारचक्रं प्रवाहरूपेणाऽऽद्यन्तशून्यं सम्यक् परिवर्तते भ्रमिं करोति । चकारेण पित्राद्युद्देशेन कृतायज्ञाज्जातो रसः पित्रादीन् सन्तर्पयति समुच्चिनोति ॥ १२१–१२४ ॥

(मिता०) एतदेव प्रपञ्चयति—

य इत्यादि । द्रव्यस्य चरुपुरोडाशादेर्देवतोद्देशेन त्यागाद्यो रसः अदृष्टरूपमात्मनः परिणत्यन्तरमुत्तमः सकलजगज्जन्मबीजतयोत्कृष्टतमः संभूतः स देवान् संप्रदानकारकभूतान्सम्यक्प्रीणयित्वा यजमानं चाभिलषितफलेन संयोज्य पवनेन प्रेर्यमाणश्चन्द्रमण्डलं प्र(१)ति नीयते । ततः शशिमण्डलाद्रश्मिभिर्भानुमण्डलम् । सैषा त्रय्येव विद्या तपतीत्यभेदाभिधानात् ऋग्यजुःसाममयं प्रत्युपनीयते । ततश्च स्वमण्डलादसौ सूर्योऽमृतरसं वृष्टिरूपमुत्तमं यत्सकलभूतानामशनानशनात्मनां चराचराणां जननिमित्तं तत्सृजति । तस्माद्वृष्टिसंपादितौषधिमयात्प्रजोत्पत्तिहेतोरन्नात्पुनर्यज्ञो यज्ञाच्च पूर्वाभिहित(२)भङ्ग्या पुनरन्नमन्नाच्च पुनः क्रतुरित्येवमेतदखिलं संसारचक्रं प्रवाहरूपेणोत्पत्तिविनाशविरहितं सम्यक्परिवर्तत इत्यनेन क्रमेणात्मनः सकाशादखिलजगदुत्पत्तिः । तत्र चात्मनः स्वकर्मानुरूपविग्रहपरिग्रहः ॥ १२१–१२४ ॥

---

(१) प्रत्युपनीयते क. । (२) भिहितसंज्ञात्पुनरन्नं क. ।

(वी०मि०) नन्वनाद्यन्तं चेत् संसारचक्रं तदाऽनिर्मोक्षप्रसङ्ग इत्याशङ्क्याह—

अनादिरात्मा सम्भूतिर्विद्यते नान्तरात्मनः ॥
समवायी तु पुरुषो मोहेच्छाद्वेषकर्मजः ॥ १२५ ॥

आत्मा स्वरूपतोऽनादिरिति नान्तरा संसारमध्ये तस्यात्मनः सम्भूतिर्विद्यते, तथापि पुरुष आत्मा मोहादिकृतेन कर्मणा लब्धजन्मा गृहीतशरीरः सन् सुखदुःखादिसमवायी भवति । तथा च मोहादेर्निमित्तस्याऽभावे जन्माभावात्सुखदुःखादिविच्छेदे मोक्षः सम्भवत्येव । कस्यचिदात्मनः सर्वदानिर्मोक्षा च संसारचक्रस्याऽनाद्यन्तत्वं न तु सर्वस्यात्मन इति मीमांसकाः । अनन्तत्वं प्रलयव्यतिरिक्तान्तशून्यत्वम् । एवमादित्वमपि वाच्यमिति । तुशब्देन साङ्ख्यप्रसिद्धमात्मनो दुःखाद्यसम्भेदं व्यवच्छिनत्ति ॥ १२५ ॥

(मिता०) ननु यद्यात्मनः संसरणमनाद्यन्तं तर्ह्यनिर्मुक्तिप्रसङ्ग इत्यत आह—

अनादिरिति । यद्यप्यात्मनोऽनादित्वात्संभूतिर्न विद्यते अन्तरात्मनः शरीरव्यापिनः तथापि पुरुषः शरीरेण समवायी भवति भोगायतने सुखदुःखात्मकं भोग्यजातमुपभुङ्क्ते इत्येवंभूतेन संबन्धेन संबन्धी भवत्येव । स च समवायो मोहेच्छाद्वेषजनितकर्मनिर्मेयो न तु निसर्गजातः । तस्य कार्यत्वेन विनाशोपपत्तेर्नानिर्मुक्तिः ॥ १२५ ॥

(वी०मि०) अन्नरूपे संसारप्रवर्तको विराडित्युक्तं, स्वरूपेण विशेषः संसारमूलभूतप्राप्यमेकवर्णपृथिव्यादिप्रवर्तकत्वं तस्य दर्शयति—

सहस्रात्मा मया यो व आदिदेव उदाहृतः ॥
मुखबाहूरुपज्जाः स्युस्तस्य वर्णा यथाक्रमम् ॥ १२६ ॥
पृथिवी पादतस्तस्य शिरसो द्यौरजायत ॥
नस्तः प्राणा दिशः श्रोत्रात्स्पर्शाद्वायुर्मुखाच्छिखी ॥ १२७ ॥
मनसश्चन्द्रमा जातश्चक्षुषश्च दिवाकरः ॥
जघनादन्तरिक्षं च जगच्च सचराचरम् ॥ १२८ ॥

सकलजीवात्मकतया च सहस्रात्मा य आदिदेवो विराट् मया

वः प्रागुदाहृतः, तस्य मुखादितो ब्राह्मणादयो वर्णा यथाक्रमं जाता· स्तिष्ठन्ति । नस्तो नासातः, स्पर्शात्तु स्पर्शोपलम्भकात् त्वचः सच· राचरं स्थावरजङ्गमप्राणिसहितं जगद्विश्वम् । शेषं सुबोध्यम् । चकारैः श्रोत्राद्वायुप्राणयोर्नाभेरन्तरिक्षस्य च कल्पान्तरे पुरुषसूक्त· सिद्धामुत्पत्तिं सूचयति ॥ १२६-१२८ ॥

(मिता०) आत्मनो जगज्जन्मेत्युक्तं तत्प्रपञ्चयितुमाह—

सहस्रात्मेत्यादि । योऽसौ सकलजीवात्मकतया प्रपञ्चात्मक· तया च सहस्रात्मा बहुरूपस्तथा सकलजगद्धेतुतया आदिदेवो मया युष्माकमुदाहृतः तस्य वदनभुजसक्थिचरणजाता यथाक्रमम· ग्रजन्मादयश्चत्वारो वर्णाः । तथा तस्य पादाद् भूमिर्मस्तकात्सुरसञ्च घ्राणात्प्राणः कर्णात्ककुभः स्पर्शात्पवनो वदनाद् हुतवहः मनसः शशाङ्कः नेत्राद्भानुः जघनाद्गगनं जङ्गमाजङ्गमात्मकं जगच्च॥१२६-१२८॥

(वी०मि०) मुनयो देशयन्ति—(?)

यद्येवं स कथं ब्रह्मन् पापयोनिषु जायते ॥
ईश्वरः स कथं भावैरनिष्टैः सम्प्रयुज्यते ॥ १२९ ॥
करणैरन्वितस्यापि पूर्वं ज्ञानं कथञ्चन ॥
वेत्ति सर्वगतां कस्मात्सर्वगोऽपि न वेदनाम् ॥ १३० ॥

हे ब्रह्मन् योगीश्वर यद्येवमात्मजीवयोरैक्यं तदा स आत्मा ईश्वरोऽप्रतिहतेच्छः कथं पापासु निन्द्यासु सर्वासु योनिषु जायते, कथं वाऽनिष्टैर्भावैर्दुःखमोहादिभिश्चाण्डालातिर्यक्त्वादिभिश्च प्रक· र्षेण चिरकालं बहुभी रूपैः संयुज्यते न हि मन्दोऽपि नाम शक्तः सन्ननभीष्टं दुःखादिकमनुभवतीत्येकः पूर्वपक्षः । यदि जीवः परमा· त्मनोऽभिन्नस्तदा व्यापकत्वात्करणैर्मनःप्रभृतिभिरन्वितोऽपि पूर्व· जन्मानुभूतं न कथं जनाति। शरीरस्य चैतन्ये तु नात्मन्यतिप्रसङ्गः । पूर्वजन्मानुभावाय व्यधिकरणत्वेनैव तज्जन्मीयस्मृतिं प्रत्यहेतुत्वादि· ति द्वितीयः पूर्वपक्षः । यदि परमात्मनोऽभिन्नो जीवस्तदा सर्वगः सर्वप्राणिनामन्तर्यामी स्यात् । तथा च सर्वप्राणिगतां वेदनां दुःखं कस्मान्न वेत्ति नाऽनुभवतीति तृतीयः पूर्वपक्षः । अपिकारौ विरो· धार्थौ । चकारेण देवदत्तदृष्टस्य यज्ञदत्तेन कथं न स्मरणमित्यपि पूर्वपक्षान्तरं समुच्चिनोति ॥ १२९-१३० ॥

(मिता०) अत्र चोदयन्ति—

यदीति। हेब्रह्मन् योगीश्वर, यद्यात्मैव जीवादिभावं भजते तर्हि कथमसौ पापयोनिषु मृगपक्ष्यादिषु जायते । अथ मोहरागद्वेषादिदोषदुष्टत्वा(१)त्तत्र जन्मेत्युच्यते । तच्च न यस्मादीश्वरः स्वतन्त्रः कथमनिष्टैर्मोहरागादिभावैः सम्प्रयुज्यते ॥ १२९ ॥

(मिता०) किञ्च—

करणैरिति । तथेदमप्यत्र दूषणम् । मनःप्रभृतिज्ञानोपायैः सहितस्यापि तस्यात्मनः पूर्वज्ञानं जन्मान्तरानुभूताविषयं कस्मान्नोत्पद्यते । तथा सर्वप्राणिगतां वेदनां सुखदुःखादिरूपां स्वयं स(२)र्वगोऽपि सर्वदेहगतोऽपि कस्मान्न वेत्ति । तस्मदात्मैवेश्वरो जीवादिभावं भजत इत्ययुक्तम् ॥ १३० ॥

(वी० मि०) आद्यं पूर्वपक्षमुत्तरयति—

अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः ॥
दोषैः प्रयाति जीवोऽयं (३)भवं योनिशतेषु च ॥ १३१ ॥
अनन्ताश्च यथा भावाः शरीरेषु शरीरिणाम् ॥
रूपाण्यपि तथैवेह सर्वयोनिषु देहिनाम् ॥ १३२ ॥

निरवच्छिन्न ईश्वरोऽपि अविद्यावच्छिन्नोऽयं जीवो मनोवचनकायक्रियाप्रभवैर्मोहरागादिभिर्दोषैर्योनिषु भवं तदनन्तरं चाऽन्त्यत्वं चाण्डालत्वं पक्षित्वं स्थावरत्वं च प्रयाति । चकारेणाऽनन्तानां देवादिकीटादिभावानां समुच्चयः । यथाऽन्त्यत्वादयः शरीरेषु शरीरिणां भावा अनन्तास्तथा देहिनां सर्वयोनिष्विह संसारे तत्तदविद्यावच्छिन्नानि रूपाण्यनन्तानि परमात्मन एव । यथैकस्यैवाऽऽत्मनश्चाण्डालादित्वं कालभेदेन नैयायिकैरुपेयते (४)तथाऽस्माभिरपि परमात्मनि एकस्यैव तत्तदविद्यातदभावावच्छेदभेदेन जीवत्वमीश्वरत्वं चाऽभ्युपेयत इति न विरोध इति तात्पर्यार्थः । चकारेण योनिशतजन्मनां सः, अपिः सम्भावनायां, सम्भावितोऽयमर्थ इति तदर्थः, एवकारेण वेदान्तसिद्धत्वात् । उक्तार्थेऽवधारणमभिप्रैति ॥ १३१--१३२ ॥

---

(१) नत्तज्जन्मेत्युच्यते ङ । (२) सर्वज्ञोपि ङ ।
(३) भवयोनि०-इति मु० पु० पाठः । (४) नैयायिकैरुच्यते-इति ख० पु० पाठः ।

(मिता०) तत्र पूर्वचोद्यस्योत्तरमाह—

अन्त्येति । यद्यपीश्वरः स्वरूपेण सत्यज्ञानानन्दलक्षणः तथाप्यविद्यासामावेशवशान्मोहरागादिभावैरभिभूयमानो नानाहीनयोनिजननसाधनं मानसादित्रिविधं कर्मनिचयमाचरति । तेन चान्त्यजादिहीनयोनितामापद्यते । अन्त्याश्चण्डालादयः, पक्षिणः काकादयः, स्थावरा वृक्षादयः तेषां भावोऽन्त्यपक्षिस्थावरता तां यथाक्रमेण मनोवाक्कायारब्धकर्मदोषैर्जन्मसहस्रेष्वयं जीवः प्राप्नोति ॥ १३१ ॥

(मिता०) किञ्च—

अनन्ताश्चेति । शरीरिणां जीवानां शरीरेषु भावा अभिप्रायविशेषाः सत्याद्युद्रेकतारतम्याद्यथानन्तास्तथा तत्कार्याण्यपि कुब्जवामनत्वादीनि रूपाणि देहिनां सर्वयोनिषु भवन्ति ॥ १३२ ॥

(वी० मि०) ननु कर्मजैर्दोषैर्यदि जन्मशतं स्थावरत्वं च तदा नानाजन्मप्रयोजककर्मसत्त्वे प्रथमं किंजातीयशरीरग्रह इत्यत्र विनिगमकाभाव इत्यत आह—

विपाकः कर्मणां प्रेत्य केषाञ्चिदिह जायते ॥
इह वाऽमुत्र चैके(१)षां भावस्तत्र प्रयोजनम् ॥ १३३ ॥

केषाञ्चित्कर्मणां प्रेत्य भावान्तरे विपाकः फलदानोन्मुखत्वं, केषाञ्चित्पुत्रेष्ट्यादीनामिह जन्मनि विपाकः, केषाञ्चिद्दानादीनामिह कीर्त्यादिफलदानोन्मुखत्वम्, अमुत्र परलोके स्वर्गादिफलदानोन्मुखत्वं, विपाकेन तत्तत्कालनियते क्वचित्फलबलकल्पकारणताको भावः कालविशेषादिः प्रयोजनं प्रयोजक इत्यर्थः । करणे ल्युट् । क्वचित्प्रयोजक इत्येव पाठः । तथा च स्थावरत्वोपभोग्यफलजनकीभूतस्य तादृशस्यैकदाऽसत्त्वादिति भावः । चकारः परस्परसमुच्चयार्थः; तेन विकल्पो व्यवच्छिन्नः ॥ १३३ ॥

(मिता०) ननु यदि कर्मजन्यानि कुब्जत्वादीनि तर्हि कर्मानन्तरमेव तैर्भावितव्यमित्याशङ्क्याह—

विपाक इति । केषांचिज्ज्योतिष्टोमादिकर्मणा विपाकः फलं प्रेत्य देहान्तरे भवति । केषांचित्कारीर्यादिकर्मणां वृष्ट्यादिफलमिहैव भवति । केषांचिच्चित्रादीनां फलं पश्वादिकमिह देहान्तरे वेत्यनियत-

---

(१) चैकेषा—इति मु० पु० पाठः ।

मृ । न ह्यनन्तरमेव कर्मफलेन भवितव्यमिति शास्त्रार्थः । अत्र च कर्मणां शुभाशुभफलजनकत्वे सत्त्वादिभाव एव प्रयोजकभूतस्तदायत्तत्वात्फलतारतम्यस्य ॥ १३३ ॥

(वी० मि०) 'अन्त्यपक्षिस्थाचरता'मित्याद्युक्तं विशिष्य प्रपञ्चयति—

परद्रव्याण्यभिध्यायंस्तथाऽनिष्टानि चिन्तयन् ॥
वितथाभिनिवेशी च जायतेऽन्त्यासु योनिषु ॥ १३४ ॥
पुरुषोऽनृतवादी च पिशुनः परुषस्तथा ॥
अनिबद्धप्रलापी च मृगपक्षिषु जायते ॥ १३५ ॥
अदत्तादाननिरतः परदारोपसेवकः ॥
हिंसकश्चाऽविधानेन स्थावरेष्वभिजायते ॥ १३६ ॥
आत्मज्ञः शौचवान् दान्तस्तपस्वी विजितेन्द्रियः ॥
धर्मकृद्वेदविद्यावित्सात्त्विको देवयोनि(१)षु ॥ १३७ ॥
असत्कार्यरतोऽधीर आरम्भी विषयी च यः ॥
स राजसो मनुष्येषु मृतो जन्माऽधिगच्छति ॥ १३८ ॥
निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा ॥
प्रमादवान् भिन्नवृत्तो भवेत्तिर्यक्षु तामसः ॥ १३९ ॥
रजसा तमसा चैव समाविष्टो भ्रमन्निह ॥
भावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते ॥ १४० ॥

मृत इति सर्वत्र वाक्येऽन्वीयते। तेन परद्रव्याण्यपहर्तुमभिध्यायन् परस्याऽनिष्टानि चिन्तयित्वा वितथेऽसत्येऽर्थे वाधशास्त्रयुक्ते सत्यत्वव्यवस्थापनार्थमभिनिवेशशीलो वा मृतो जन्मान्तरे अन्त्यासु अन्त्यपुंसा युक्तासु योनिषु चाण्डालयोनिषु जायत इत्यर्थः। तथाशब्देन चशब्देन च समुच्चयार्थकेन विशेषणविशेष्यभावनिरासः। एवमग्रेऽपि । अनृतमयथार्थं वचसा वादी तदभिधानशीलः, पिशुनः परदोषख्यापनशीलः, परुषः श्रोतुरुद्वे(२)जकवाक्यप्रयोक्ता, अनिबद्धं धर्मशास्त्राद्यनुक्तं स्वेच्छाकल्पितमर्थं कर्तव्यत्वेन प्रलपतीत्यनिबद्ध-

---

(१) देवयोनिताम्—इति मु० पु० पाठः । (२) श्रोतुरुद्वेगकरवाक्य०—इति खं० पु० पाठः ।

प्रलापी पुरुषो मनुष्यः मृतो मृगपक्षियोनिषु जायते । पुरुष इति सर्वान्वितम्, तेनाऽतिरिक्तस्य शुभाशुभकर्मणामदृष्टजनकत्वं वारितम्। पुंस्त्वं च न विवक्षितमुद्देश्यगतत्वादित्यवधेयम् । अदत्तस्य परद्रव्यादानेऽपहारे निरतः प्रसक्तः, परदारगामी, अविधानेन विध्यनुमतप्रकारेण प्राणिनां हिंसकः स्थावरेषु वृक्षलतादिष्वपि जायते । आत्मज्ञ आत्मतत्त्वज्ञानवान् विद्याभिजनादिमदशून्य इति यावत्, दान्तोऽकार्यनियत(१)मनाः, विजितेन्द्रियः वशीकृतबाहिरिन्द्रियः, धर्मकृत् वर्णाश्रमाचारानुष्ठाता, सात्त्विकः किञ्चित्सत्त्वगुणोद्रेकवान् देवयोनिषु जन्म प्राप्नोति । असति धर्मार्जके कार्ये वाणिज्यकृष्यादौ रतोऽतएवाऽधीरो व्यग्रचित्तः, अत एव तत्तत्कार्यारम्भवान्, विषयी स्रक्चन्दनधनाद्यासक्तः, राजसो रजोगुणोद्रेकवान् मनुष्येषु, निद्रालुः दिवापि निद्राशीलः, क्रूरकृत् वैरानुबन्धकृत्, नास्तिको धर्मनिन्दकः, याचकः अशनवसनसम्पत्तावपि याचनशीलः, प्रमादवान् कार्याकार्यविवेकहीनः, भिन्नवृत्तो वेदविरुद्धद्यूताद्याचारवान्, तामसः तमोगुणोद्रेकवान् तिर्यक्षु पशुयोनिषु भवेदुत्पद्यते । एवं रजसा तमसाऽन्येन सत्त्वेन च समाविष्टः पुरुष इह संसारे भ्रमन् तदनुरूपैर्भावैर्मोहादिभिरनिष्टैस्तत्तद्योनिजन्मप्रदैः संयुक्तः पुनरपि संसारं देहसम्बन्धं प्रतिपद्यते प्राप्नोति अत्युद्रिक्तसत्त्वान्मुच्यते । अन्यत्सुबोधम् ॥ १३४—१४० ॥

(मिता०) मनोवाक्कायकर्मजैरन्त्यादि(२)योनीः प्राप्नोतीत्युक्तं तत्प्रपञ्चयितुमाह—

परद्रव्याणीति । परधनानि कथमहमपहरेयमित्याभिमुख्येन ध्यायंस्तथाऽनिष्टानि ब्रह्महत्यादीनि हिंसात्मकानि करिष्यामीति चिन्तयन् वितथे असत्यभूते वस्तुनि अभिनिवेशः पुनःपुनः संकल्पस्तद्वांश्च श्वचण्डालाद्यन्त्ययोनिषु जायते ॥ १३४ ॥

(मिता०) किञ्च—

पुरुष इति । यस्त्वनृतवदनशीलः पिशुनः कर्णेजपः पुरुषः परोद्वेगकरभाषी अनिबद्धप्रलापी प्रकृतासङ्गतार्थवादी च बुद्धिपूर्वाबुद्धिपू (३)र्ववृत्त्यादितारतम्याद्धीनोत्कृष्टेषु मृगपक्षिषु जायते ॥ १३५ ॥

---

(१) अकार्ये नित्यमनाः—इति ख० पु० पाठः ।

(२) योनिता प्राप्नोतीति ङ० । (३) पूर्वादि० ।

(मिता०) किञ्च—

अदत्तेति। अदत्तादाननिरतः अदत्तपरधनापहारप्रसक्तः परदारप्रसक्तश्च अविहितमार्गेण प्राणिनां घातकश्च दोषगुरुलघुभावतारतम्यात्तरुलताप्रतानादिस्थावरेषु जायते ॥ १३६ ॥

(मिता०) सत्त्वादिगुणपरिपाकमाह—

आत्मज्ञ इति। आत्मज्ञो विद्याधनाभिजनाद्यभिमानरहितः शौचयुक्तः दान्त उपशमान्वितः तपस्वी कृच्छ्रादितपोयुक्तः तथेन्द्रियार्थेष्वप्रसक्तः नित्यनैमित्तिकधर्मानुष्ठाननिरतः वेदार्थवेदी च यः सात्विकः स च सत्त्वोद्रेकतारतम्य(१)वशादुत्कृष्टोत्कृष्टतरसुरयोनितां प्राप्नोति ॥ १३७ ॥

(मिता०) किञ्च—

असदिति। असत्कार्येषु तूर्यवादित्रनृत्यादिष्वभिरतो यस्तथा अधीरो व्यग्रचित्तः आरम्भी सदा कार्याकुलो विषयेष्वतिप्रसक्तश्च स रजोगुणयुक्तः तद्गुणतारतम्याद्धीनोत्कृष्टमनुष्यजातिषु मरणानन्तरमुत्पत्तिं प्राप्नोति ॥ १३८ ॥

(मिता०) निद्रालुरिति। तथा च यः पुनर्निद्राशीलः प्राणिपीडाकरो लोभयुक्तश्च तथा नास्तिको धर्मादेर्निन्दकः याचनशीलः प्रमादवान् कार्याकार्यविवेकशून्यः विरुद्धाचारश्च असौ तमोगुणयुक्तस्तत्तारतम्याद्धीनहीनतरपश्वादियोनिषु जायते ॥ १३९ ॥

(मिता०) पूर्वोक्तमुपसंहरति—

रजसेति। एवमविद्याविद्धोऽयमात्मा रजस्तमोभ्यां सम्यगाविष्ट इह संसारे पर्यटन् नानाविधदुःखप्रदैर्भावैरभिभूतः पुनः पुनः संसारं देहग्रहणं प्राप्नोति। इतीश्वरः स कथं भावैरनिष्टैः संप्रयुज्यत इत्यस्य चोद्यस्यानवकाशः ॥ १४० ॥

(वी० मि०) द्वितीयं पूर्वपक्षमुत्तरयति—

मलिनो हि यथाऽऽदर्शो रूपालोकस्य न क्षमः ॥
तथाऽविपक्वकरणं आत्मज्ञानस्य न क्षमः ॥ १४१ ॥

एक(२)एवादर्शो व्यापको यदवच्छेदेन मलिनस्तदवच्छेदेन रूपालोकस्य प्रतिबिम्बत्वसाक्षात्कारस्य न क्षमः, अन्यावच्छेदेन च

---

(१) तारतम्यादुत्कृष्ट क०। (२) एक एवेत्यारभ्यं न चम इत्यन्तं नास्ति क० पुस्तके।

तत्क्षम एव । एवं सर्वजन्मानुभूत आत्माऽविपक्वकरणो यद्विषयावच्छेदेन त्वनावृतचैतन्यस्तस्यात्मनः प्राग्जन्मन्यनुभूतस्य ज्ञानेन क्षम एतज्जन्मानुभूतविषयावच्छेदेन त्वनावृतचैतन्यत्वाज्ज्ञाने क्षम एवेत्यर्थः ॥ १४१ ॥

(मिता०) यद्पि करणैरन्वितस्यापीति द्वितीयं चोद्यं तस्योत्तरमाह—

मलिन इति । यद्यप्यात्मा अन्तःकरणा(१)दिज्ञानसाधनसम्पन्नस्तथापि जन्मान्तरानुभूतार्थावबोधे न समर्थः, अविपक्वकरणो रागादिमलाक्रान्तचित्तो यस्मात् । यथा दर्पणो मलच्छन्नो रूपज्ञानोत्पादनसमर्थो न भवति ॥ १४१ ॥

(वी० मि०) ननु आदर्शे मलिनत्वात्प्रतिबिम्बस्याऽसत्त्वादनुपलम्भो युज्यते । प्राग्जन्मानुभूतस्य विषयस्याऽनुपलम्भस्तु नित्यविभुत्वात्मनि तत्सम्बन्धस्य दुरपन्हवत्वादावरणस्याशक्यत्वादत आह—

कट्वेर्वारौ यथाऽपक्के मधुरः सन्नसौऽपि न ॥
प्राप्यते ह्यात्मनि तथा नापक्वकरणे ज्ञता ॥ १४२ ॥

अपक्के कट्वेर्वारौ तिक्तकर्कट्यामग्रे प्रत्यक्षीक्रियमाणत्वात्सन्नपि मधुरो रसो न प्राप्यते यथा, तथाऽपक्वकरणेऽशुद्धाशये जीवात्मनि चैतन्यस्वभावत्वाद्विद्यमानेऽपि ज्ञता विषयप्रकाशता न प्राप्यते । अत्र दृष्टान्ते स्थूलरूपेण सम्बन्धत्वमप्राप्तिः । दार्ष्टान्तिके तु प्राग्जन्मानुभूतविषयावच्छेदेनैव तज्जन्मीयशरीरावच्छिन्नजीवप्रकाशकतासम्बन्धविरहः । भवति गृहावच्छिन्नाकाशस्य बहिर्वर्तिपुरुषं प्रत्यावृतत्वमिति भावः । तदिद'माकाशमेक'मित्यादिना वक्ष्यति । हिशब्दोऽवधारणे ॥ १४२ ॥

(मिता०) ननु प्राग्भवीयज्ञानस्याप्यात्मप्रकाशत्वात् तस्य च स्वतःसिद्धत्वान्नानुपलम्भो युक्त इत्याशङ्क्याह—

कट्वेरिति । अपक्के कट्वेर्वारौ तिक्तकर्कटिकायां विद्यमानोऽपि मधुरो रसो यथा नोपलभ्यते तथात्मन्यपक्वकरणे विद्यमानापि ज्ञता ज्ञातृता प्राग्भवीयवस्तुगोचरता न प्राप्यते ॥ १४२ ॥

---

(१) अन्तःकरणादेर्ज्ञाने ख० ।

(वी०मि०) तृतीयपूर्वपक्षमुत्तरयति--

सर्वाश्रयां निजे देहे देही विन्दति वेदनाम् ॥
योगी मुक्तश्च सर्वासां यो(१)न वाऽऽप्नोति वेदनाम्॥१४३॥

सर्वास्यात्मनः स्वाभिन्नत्वात् स्वनिष्ठामिव वेदनां सर्वाश्रयां वेदनां देही देहाभिमानी निजे देहे विन्दति प्राप्नोति । यो मुक्तो मुक्तदेहाभिमानो योगी स सर्वासामेव वेदनानां वेदिता भवतीति कस्मान्नवेत्तीत्याशङ्कितवतो नैवेत्युत्तरं पर्यवसितम् । अथ परनिष्ठां वेदनां देही मुक्तो वा किमाप्नोत्येव नेत्याह 'न वाप्नोति वेदना'मिति विद्योपाध्यवच्छेदेन वेदनाजनकमदृष्टं वर्तते । तदवच्छेदेन वेदनासम्बन्धइति नाऽन्यनिष्ठा वेदनाऽन्यत्र सम्बध्यत इत्यर्थः ॥ १४३ ॥

(मिता०) 'वेत्ति सर्वगतां कस्मात्सर्वगोऽपि न वेदना'मिति यदुक्तं तत्रोत्तरमाह-

सर्वाश्रयामिति । यः पुनर्देही देहाभिमानयुक्तः स सर्वाश्रयामाध्यात्मिकादि(२)रूपां वेदनां स्वकर्मोपार्जित एव देहे प्राप्नोति, न देहान्तरगतां, भोगायतनारम्भादृष्टवैलक्षण्यादेव । यस्तु योगी मुक्तो मुक्ताहंकारादिः सकलक्षेत्रगतानां सुखदुःखादिसंविदां वेदिता भवति परिपक्वकरणत्वात् ॥ १४३ ॥

(वी०मि०) नन्वात्मैक्यं प्रागुक्तं न घटते, 'अस्मान्मनुष्यादयमश्वो भिन्न' इत्यादिभेदप्रत्ययस्य सर्वसिद्धत्वादित्यत आह—

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ॥
तथात्मैको ह्यनेकश्च जलाधारेष्विवांशुमान् ॥ १४४ ॥

एकमेवाकाशं यथा घटाकाशाद् गृहाकाशो भिन्न इत्येवं पृथग्भावेभिन्नत्वेनाऽनुभवविषयो भवति, यथा वा जलाधारेषु नानापात्रेषु अंशुमान् सूर्यः पृथग्भवेत्तथैक एवात्माऽनेकत्वेनाऽनुभवविषयो भवतीत्यर्थः । हिशब्दाभ्यां दृष्टान्तयोः सर्वसिद्धत्वेनाऽवधारणमभिप्रैति। तथा च सर्वजीवसाधारणाविद्यारूपदोषावशादयं भ्रम एवेति भावः॥

(मिता०) नन्वेकस्मिन्नात्मनि सुरनरादिदेहेषु भेदप्रत्ययो न घटत इत्याशङ्क्याह-

आकाशमिति । यथैकमेव गगनं कूपकुम्भाद्युपाधिभेदभिन्नं नाने-

---

(१) योगमाप्नोति-इति मु० पु० पाठः । (२) त्मिकादिबहुरूपां ख. ।

वानुभूयते, यथा वा भानुरेकोऽपि भिन्नेषु जलभाजनेषु करकमणिकमल्लिकादिषु नानेवानुभूयते, तथैकोऽप्यात्मा अन्तःकरणोपाधिभेदेन नाना प्रतीयते । द्वितीयदृष्टान्तोपादानमात्मभेदस्यापारमार्थिकत्वद्योतनार्थम् ॥ १४४ ॥

(वी०मि०) महाभूतादीनां वर्णादीनां चराचरस्य च सृष्टिः प्रागुक्ता, तत्र प्रथमं चरभावं व्यक्तीकरोति—

ब्रह्मखानिलतेजांसि जलं भूश्चेति धातवः ॥
इमे लोका एष चात्मैतस्माच्च(१) सचराचरम् ॥ १४५ ॥

ब्रह्म व्यापकचिदानन्दरूपं स्वतःसिद्धं सर्वाद्यभूतम् । अस्मादेव ब्रह्मणो हेतुभूतात् खादयः पञ्च धातवो यथाक्रमं जायन्ते । त इमे पञ्च धातवोऽन्तरिक्षवाय्वग्निवरुणभूलोका उच्यन्ते । एषु च जातेष्वात्मा ब्राह्मणादिशरीरावच्छिन्नो भवति । एतस्मादनन्तरं चराचरसहितं विश्वं जायत इत्यर्थः । चकारेणाद्येनाकाशादीनां साहित्यमभिप्रैति । द्वितीयचकारेण च सहितानां हेतुत्वमाह । तृतीयचकारेण शरीरिणां चराचरसृष्टेः साहित्यम् ॥ १४५ ॥

(मिता०) 'पञ्चधातून्स्वयं षष्ठ आदत्ते युगपत्प्रभु'रित्याद्युक्तमर्थमुपसंहृत्याह—

ब्रह्मेति । ब्रह्म आत्मा खं गगनमनिलो वायुः तेजोऽग्निः जलं प्रसिद्धं भूश्चेत्येते वातादिधातव एव शरीरं व्याप्य धारयन्तीति धातवोऽभिधीयन्ते । तत्र खादयः पञ्च धातवः लोक्यन्ते दृश्यन्ते इति यावत् । एष चिद्धातुरात्मा एतस्माज्जडाजडसमुदायात्स्थावरजङ्गमात्मकं सर्वं जगदुत्पद्यते ॥ १४५ ॥

(वी०मि०) परमेश्वरेण कर्तुं शक्यत्वात् महाभूतसापेक्षस्यैव तस्य सृष्टिसमर्थत्वे महाभूतसृष्टिरेवाऽनुपपन्ना स्यादित्यत आह—

मृद्दण्डचक्रसंयोगात्कुम्भकारो यथा घटम् ॥
करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः ॥ १४६ ॥
हेममात्रमुपादाय रूपं वा हेमकारकः ॥
निजलालासमायोगात्कोशं वा कोशकारकः ॥ १४७ ॥

---

(१) एष चात्मा तस्माच्च—इति मु० पु० पाठः ।

कारणान्येवमादाय तासु तास्विह योनिषु ॥
सृजत्यात्मानमात्मा च सम्भूय करणानि च ॥ १४८ ॥

मृदादीनां संयोगात्परस्परप्रत्यासत्तेर्घटं यथा कुम्भकारः करोति यथा वा तृणादिभिर्गृहं गृहकारकः यथा वा हेमकारः केवलं हेम केवलं रूप्यं वा उपादाय कटककुण्डलादि यथा वा कोशकारकः कीटविशेषो निजलालानां परस्परमेलनात् कोशं करोति, एवं सम्भूय कारणानि मिलित्वा कार्यजनकानि करणानि महाभूतान्यादाय इह संसारे तासु तासु तिर्यङ्मनुष्यादिसम्बन्धिषु योनिषु परमात्मा जीवात्मानं सृजतीत्यर्थः । अयमाशयः—न हि कर्ता समवायिकारणतया अपेक्ष्यते । महाभूतसृष्टावपि तत्समवायिपरम्परा अपेक्षणीयाः सृज्यन्ते एव । न चैवमनवस्था, परमाणुषु नित्येषु स्वस्मिन्वा विश्रामात् । न च साक्षात्परमाणूनां स्वस्य वा शरीरोपादानत्वं कुतो नेति वाच्यं, स्वभावस्यापर्यनुयोज्यत्वात् । अन्यथा कोशकारः साक्षादेव कोशस्योपादानमस्तु किं लालासमायोजनेनेति किं न पश्यतीति दण्डचक्रोपादानं कारणत्वमात्रेण दृष्टान्ततया । मात्रपदेन समवायिनोऽवैलक्षण्येऽपि निमित्तविशेषाद्विशेषकार्याणामभिप्रैति । आद्यचकारेण संयोगाद्यसमवायिकारणसमुच्चयः । अन्त्यचकारेण अदृष्टादिनिमित्तकारणसङ्ग्रहः । एवकारेण आदायेत्यत्रान्वितेन तन्निरपेक्षसृष्टिव्यवच्छेदः ॥ १४६-१४८ ॥

(मिता०) कथमसावात्मा जगत्सृजतीत्याह—

मृद्दण्डेत्यादि । यथा हि कुलालो मृच्चक्रचीवरादिकं कारणजातमुपादाय करकशरावादिकं नानाविधकार्यजातं रचयति । यथा वा वर्धकिस्तृणमृत्काष्ठैः परस्परसापेक्षः एकं गृहाख्यं कार्यं करोति । यथा वा हेमकारकः केवलं हेमोपादाय हेमानुगतमेव कटकमुकुटकुण्डलादिकार्यमुत्पादयति । यथा वा कोशकारकः कीटविशेषो निजलालयारब्धमात्मबन्धनं कोशाख्यमारभते तथात्मापि पृथिव्यादीनि साधनानि परस्परसापेक्षाणि तथा करणान्यपि श्रोत्रादीन्युपादाय अस्मिन्संसारे तासु तासु सुरादियोनिषु स्वयमेवात्मानं निजकर्मबन्धबद्धं शरीरितया सृजति ॥ १४६-१४८ ॥

(वी०मि०) नन्वात्मानमित्ययुक्तं, भूतमेव चेतनं परमात्मा सृ-

जतीत्यत्र बाधकाभावात् । अत आत्मनि देहिनि मानमाह-

महाभूतानि सत्यानि यथात्माऽपि तथैव हि ।।
कोऽन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति ।। १४९ ।।
वाचं वा को विजानाति पुनः संश्रुत्य संश्रुताम् ।।
अतीतार्थस्मृतिः कस्य को वा स्वप्नस्य कारकः ।। १५० ।।
जातिरूपवयोवृत्तविद्यादिभिरहङ्कृतः ।।
सक्तः श(१)ब्दादिविषये कर्मणा मनसा गिरा ।। १५१ ।।

उक्तयुक्त्या महाभूतानि यथा सत्यानि तथाऽऽत्मापि सत्यः । तत्र हेतुः-अन्यथा आत्मनोऽसत्यत्वे इन्द्रियाणां चेतनत्वे एकेन नेत्रेण दृष्टमन्येन नेत्रेण त्वगादिना कः पश्यति, न चेदुभयदर्शी कश्चिदभ्युपेयः । तथा वामेन चक्षुषा यदद्राक्षं तद्दक्षिणेन चक्षुषा त्वचा वा पश्यामीति प्रतिसन्धानं नोपपद्येतेत्यर्थः । हिरवधारणे । एवकारेण भूतचैतन्यव्यवच्छेदः । अपिकारो दृष्टान्तदार्ष्टान्तिकयोर्हेतुत्वं समुच्चिनोति । वाचमिति । यदि शरीरमेव चेतनं तदा संश्रुत्य वाचं पुनः पुनः कः शृणोति । आहारपरिणामभेदेन शरीरस्य भिन्नत्वात् । यदि नोभयश्रावी कश्चिदेकः तदा यदश्रौषं पुरा तदधुना शृणोमीति प्रतिसन्धानं न स्यादित्यर्थः । अतीतेति । यद्यात्मा नास्ति तदाऽऽहारपरिणामभेदभिन्नस्य शरीरस्य अनुभवानाश्रयत्वेन स्मरणं नोपपद्येत । अतीतपदेन विषयस्य चैतन्याभावः सूचितः । को वेति । स्वप्नज्ञानस्य कारकः समवायिकारणकः इन्द्रियाणां विरतव्यापारत्वादित्यर्थः । जातीति । जात्यादिभिरहङ्कृतः को वा यद्यात्मा नास्ति तदा मनुष्योऽहं गौरो युवा याज्ञिकोऽधीतवेदो देवदत्तपुत्र इत्यादिप्रतीत्याश्रयः कः स्यात् । न हि शरीरमेव तथा, मृतशरीरेऽपि तथात्वप्रसङ्गात् । नापि प्राणः, तथा तस्याशु विनाशित्वेन पूर्वज्ञातार्थोपनीतमानासम्भवात् । न ह्यन्येन ज्ञातमन्यस्योपनीतं भासते सामानाधिकरण्येनैव उपनयनस्य हेतुत्वादित्यर्थः । सक्त इति । यदि चिरस्थायी नात्मास्ति तदा कर्मणा मनसा वाचा वा ज-

(१) शब्दादिविषयोयोगं क०-इति मु० पु० पाठः ।

न्मान्तरे शब्दादिविषयोपभोगहेतुमुद्योगधर्मारम्भं को वा करोती-त्यर्थः ॥ १४९—१५१ ॥

(मिता०) किं पुनर्वैषयिकज्ञानेन्द्रियव्यतिरिक्तात्मसद्भावे प्रमाण-मित्याशङ्क्याह—

महाभूतानीति । यथा हि पृथिव्यादिमहाभूतानि सत्यानि प्रमा-णगम्यत्वात् तथात्मापि सत्यः । अन्यथा यदि बुद्धीन्द्रियव्यतिरिक्तो ज्ञाता ध्रुवो न स्यात्तर्हि एकेन चक्षुरिन्द्रियेण दृष्टं वस्तु अन्येन स्पर्शनेन्द्रियेण को विजानाति यमहमद्राक्षं तमहं स्पृशामीति । तथा कस्यचित्पुरुषस्य वाचं पूर्वं श्रुत्वा पुनः श्रूयमाणां वाचं तस्य वागिय-मिति कः प्रत्यभिजानाति । तस्मात् ज्ञानेन्द्रियातिरिक्तो ज्ञाता ध्रुव इति सिद्धम् ॥

(मिता०) किञ्च—

अतीतेत्यादि । यद्यात्मा ध्रुवो न स्यात् तर्ह्यनुभूतार्थगोचरा स्मृ-तिः पूर्वानुभवभावितसंस्काराद्बोधनिबन्धना कस्य भवेत् । न ह्यन्येन दृष्टे वस्तुन्यन्यस्य स्मृतिरुपपद्यते । तथा कः स्वप्नज्ञानस्य कारकः । न हीन्द्रियाणामुपरतव्यापाराणां तत्कारकत्वम् । तथाहमेवाभिजन-त्वादिसम्पन्न इत्येवंविधोऽनुसन्धाप्रत्ययः कस्य भवति स्थिरात्म-व्यतिरिक्तस्य । तथा शब्दस्पर्शादिविषयोपभोगसिद्ध्यर्थमुद्योगं मनोवाक्कायैः कः कुर्यात् । तस्मादपि बुद्धीन्द्रियव्यतिरिक्त आत्मा स्थितः ॥ १४९–१५१ ॥

(वी०मि०) अथ प्रकृतमात्मोपासनं तद्विरोधिसान्दिग्धमतित्वा-दिनिरासेन सम्पादनीयमित्यभिप्रेत्याह—

स सन्दिग्धमतिः कर्मफलमस्ति न वेति वा ॥
विप्लुतः सिद्धमात्मानमसिद्धोऽपि हि मन्यते ॥ १५२ ॥
मम दाराः सुतामात्या अहमेषामिति स्थितिः ॥
हिताहितेषु भावेषु विपरीतमतिः सदा ॥ १५३ ॥
ज्ञेये च(१) प्रकृतौ चैव विकारे वाऽविशेषवान् ॥
अनाशकानलापातजलप्रपतनोद्यमी ॥ १५४ ॥

---

(१) ज्ञेयज्ञे-इति मु० पुं० पाठः ।

एवंवृत्तोऽविनीतात्मा वितथाभिनिवेशवान् ॥
कर्मणा द्वेषमोहाभ्यामिच्छया चैव बध्यते ॥ १५५ ॥

कर्मणो यज्ञादेः फलमस्ति नास्ति वेति सन्दिग्धमतिरत एव विप्लुतो धर्मभ्रष्टोऽत एवऽसिद्धोऽकृतार्थः सन्नपि स आत्मा सिद्धं कृतार्थमात्मानं मन्यते । तत्र हेतुः-मम दारादयः सन्ति, अहं चैषां प्रभुरित्येव वस्तुस्थितिरित्यापाततो हिताऽहितेष्वपरिणामाहितेषु सदा विपरीतमतिः इदमेव परमं प्रयोजनमिति । एवं ज्ञेये आत्मनि प्रकृतौ प्रधाने विकारे अहङ्कारमहाभूतादौ अविशेषवान् विवेकानभिज्ञः । तथा अनशनेऽनलप्रवेशे जलप्रपतने वा उद्यमी एवंवृत्तः एतादृशविरुद्धव्यापारीतरवान् अविनीतात्मा असंयतचित्तः वितथे परलोकासाधनत्वेन निष्फलमये नृत्यगीताद्यासक्तेऽभिनिवेश आसङ्गस्तद्वान् । कर्मणाऽनाशकावितथाभिनिवेशादिना द्वेषेण नाशकाद्याचरणमूलभूतेन मोहेन 'मम दारा' इत्यादिना इच्छया विषतथाभिनिवेशमूलभूतया बध्यते संसारे यति एतत्सर्वं मुमुक्षुणा वर्जनीयमिति तात्पर्यम् । हिशब्दन विपरीतमतेर्दार्ढ्यं दर्शितम् । 'ज्ञेये चे'त्यादिचकारत्रयेण नैयायिकवेदान्तिपातञ्जलासिद्धानामाविवेकिनां प्रदर्शनम् । चरमकारेण योषिद्धेतुविषयकरागद्वेषसमुच्चयः । आद्यस्यैवकारस्य 'इत्येव स्थिति'रिति व्युत्क्रमेणाऽन्वयः । चरम एवकारो बध्यत इत्यत्रान्वितो मोक्षं व्यवच्छिनत्ति ॥ १५२-१५५ ॥

(मिता०) उपासनविशेषविध्य(१)र्थं संसारस्य रूपं विवृण्वन्नाह—

स इति। योऽसौ पूर्वोक्त आत्मा विप्लुतोऽहङ्कारदूषितः स सकलकर्मसु फलमस्ति न वेति सन्दिग्धमतिर्भवति । तथाऽसिद्धोऽप्यकृतार्थोऽपि सिद्धमेव कृतार्थमात्मानं मन्यते ॥ १५२ ॥

(मिता०) किञ्च—

ममेति । तस्य विप्लुतेर्मम कलत्रपुत्रप्रेष्यादयोऽहमेषामित्यतीव ममताकुलस्थितिर्भवति । तथा हिताहितकरे कार्यप्रकरे स विप्लुतमतिर्विपरीतमतिः सदा भवेत् ॥ १५३ ॥

(मिता०) किञ्च—

ज्ञेयज्ञे इत्यादि । ज्ञेयं जानातीति ज्ञेयज्ञस्तस्मिन्नात्मनि प्रकृतौ

---

(१) सिध्यर्थं ङ ।

चात्मनो गुणसाम्यावस्थायां विकारे चाहङ्कारादावविशेषवान् विवेकानभिज्ञो भवति । तथानशनहुताशनाम्बुप्रवेशविषाशनादिषु विप्लवबशात्कृतप्रयत्नो भवेत् । एवं नानाप्रकारकार्यप्रवृत्तोऽविनीतात्माऽसंयतात्मा असत्कार्याभिनिवेशयुक्तः सन् तत्कृतकर्मजातेन रागद्वेषाभ्यां मोहेन च बध्यते शरीरग्रहणद्वारेण ॥ १५४-१५५ ॥

(वी०मि०) एतत्सर्वविरोधिन उपायमाह—

आचार्योपासनं वेदशास्त्रार्थेषु विवेकिता ॥
तत्कर्मणामनुष्ठानं सङ्गः सद्भिर्गिरः शुभाः ॥ १५६ ॥
स्त्र्यालोकालम्भविगमः सर्वभूतात्मदर्शनम् ॥
त्यागः परिग्रहाणां च जीर्णकाषायधारणम् ॥ १५७ ॥
विषयेन्द्रियसंरोधस्तन्द्रालस्यविवर्जनम् ॥
शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनम् ॥ १५८ ॥
नीरजस्तमता सत्त्वशुद्धिर्निःस्पृहता शमः ॥
एतैरुपायैः संशुद्धः (१)स हि योग्यमृती भवेत् ॥ १५९ ॥

आचार्यस्याऽध्ययनार्थमुपासनं, तत्प्रयुक्ता च वेदार्थेषु वेदान्तादिशास्त्रेषु च विवेकिता वेदशास्त्रेषु च विवेकिता, वेदशास्त्रोक्तं च प्राणायामादीनामनुष्ठानं, सद्भिर्योगाभ्यासादिचतुरैः सङ्गः, शुभाः परानुद्वेजिका गिरः, स्त्रिया दर्शनस्पर्शनपरित्यागः, सर्वप्राणिनामात्मतुल्यतया दर्शनं, परिग्रहाणां च दारपरिजनानां त्यागं मत्वाऽभिनिवेशत्यागहेतुभूतो विवेकः, पुरातनं गैरिकरक्तवस्त्रधारणं, नृत्यादिषु विषयेषु चक्षुरादेर्निवारणं, तन्द्रा निद्रानुकारिणी प्रमीला, आलस्यमात्मध्यानादावनुत्साहः, तयोर्विवर्जनं, शरीरस्याऽस्थिरतामलमूत्रादिपूर्णत्वेन परिसंख्यानं विवेचनं, स्वर्गाद्यर्थप्रवृत्तिष्वघदर्शनं जन्ममरणप्रबन्धरूपदोषदर्शनं, नीरजस्तमता क्रोधमोहहेतुस्वपरधीशून्यत्वं, सत्त्वस्य चित्तस्य प्राणायामादिभिः शुद्धिरकार्यवैमुख्यं, निःस्पृहता विषयाणामनुपादेयत्वबुद्धिः, अनया प्रागुक्तया बन्धहेतुताया निरासः, शम इन्द्रियसन्निकृष्टेऽपि विषयेऽनासङ्गः । एतैरुक्तैः प्रागुक्तममतादिविरोधिभिरुपायैः सम्यक् शुद्धो निःशेषतो-

---

(१) सत्वयोग्य०—इति मु० पु० पाठः ।

ऽपसारितममतादिः सन् स जीवात्मा योगी अध्यात्मनिरतोऽमृतो मोक्षभाग् भवति । चकारेण सुतादीनां समुच्चयः ॥ १५६-१५९ ॥

(मिता०) कथं पुनस्तस्य विसृम्भो भवतीत्यत आह—

आचार्येत्यादि । विद्यार्थमाचार्यसेवा । वेदान्तार्थेषु पातञ्जलादियोगशास्त्रार्थेषु च विवेकित्वम् । तत्प्रतिपादितध्यानकर्मणामनुष्ठानम् । सत्पुरुषसङ्गः । प्रियाहितवचनत्वम् । ललनालोकनालम्भयोः परित्यागः । सर्वभूतेष्वात्मवद्दर्शनं समत्वदर्शनम् । परिग्रहाणां च पुत्रक्षेत्रकलत्रादीनां त्यागः । जीर्णकाषायधारणम् । तथा शब्दस्पर्शादिविषयेषु श्रोत्रादीन्द्रियाणां प्रवृत्तिनिरोधः । तन्द्रा निद्रानुकारिणी, आलस्यमनुत्साहः, तयोर्विशेषेण त्यागः । शरीरस्य परिसंख्यानमस्थिराशुचित्वादिदोषानुसन्धानम् । तथा सकलगमनादिषु सूक्ष्मप्राणिवधादिदोषपरामर्शः । तथा रजस्तमोविधुरता । प्राणायामादिभिर्भावशुद्धिः । निःस्पृहता विषयेष्वनभिलाषः । शमो बाह्यान्तःकरणसंयमः । एतैराचार्योपासनादिभिरुपायैः सम्यक् शुद्धः केवलसत्त्वयुक्तो ब्रह्मोपासनेनाऽमृती भवेत् मुक्तो भवति ॥ १५६-१५९ ॥

(वी०मि०) न केवलं चित्तशुद्धिममतात्यागादिमात्रेणाऽमृतं निष्पद्यते, किन्तु तत्त्वज्ञानादिकमप्यपेक्ष्यत इत्याह—

तत्त्वस्मृतेरुपस्थानात्सत्त्वयोगात्परिक्षयात् ॥
कर्मणां सन्निकर्षाच्च सतां योगः प्रवर्तते ॥ १६० ॥

तत्त्वस्मृतेरात्मतत्त्वश्रवणात्, उपस्थानात् आत्ममननरूपध्यानरूपात्, सत्त्वगुणोद्रेकजनिताद्योगादात्मदर्शनात्, कर्मणां पापपुण्यानां परिक्षयात् सर्वतोभावेन क्षयात्, सन्निकर्षादविद्यारूपावरकाविगमात् सतां पुण्यवतां योगः परमात्मालयः प्रवर्तते जायते । चकारेण ज्ञानस्य कर्मसमुच्चयो दर्शितः । तदुक्तं योगसंहितायाम्—

ज्ञानकर्मसमायोगात्परमाप्नोति पूरुषम् ।

इति दिक् ॥ १६० ॥

(मिता०) कथममृतत्वप्राप्तिरित्यत आह—

तत्त्वेति । आत्माख्यतत्त्वस्मृतेरात्मनि निश्चलतयोपस्थानात् सत्त्वशुद्धियोगात्केवलसत्त्वगुणयोगात्कर्मबीजानां परिक्षयात् सत्पुरुषाणां च सम्बन्धात् आत्मयोगः प्रवर्तते ॥ १६० ॥

(वी० मि०) ननु वैराग्यान्ममतादिपरित्यागेऽपि ध्यानाभ्यासं कुर्वतो दैवात्मदर्शनोऽनुत्पन्न एव । मृतस्य न मोक्षो नाप्यैहिकसुखमित्युभयविधसंशयात्कथमत्यायाससाध्ये योगाभ्यासे प्रेक्षावतां प्रवृत्तिरत आह—

शरीरसंक्षये यस्य मनः सत्त्वस्थमीश्वरे(१) ॥
अविप्लुतमतेः सम्यक् स जातिस्मरतामियात् ॥ १६१ ॥

यस्याऽविप्लुतमतेरविपर्यस्तज्ञानस्य तत्त्वज्ञानिनो मनः सत्त्वस्थं कामक्रोधादिरहितं सम्यगेकाग्र्यध्यानेनेश्वरे आत्मनि स्थिरं सोऽन्तरा शरीरसंक्षये मरणे जाते जन्मान्तरे जातस्य जातिस्मरतामियात् । तथा च जन्मान्तरानुभूतकृमिकीटादिनानागर्भवाससमुद्भूतदुःखस्मरणाज्जातवैराग्यो मोक्षार्थं यतते । ततः क्रमेण साक्षात्कारे सति स मुच्यते इति भावः । तदुक्तं भगवद्गीतायाम्—

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥

इत्यादि ॥ १६१ ॥

(मिता०) किंच—

शरीरेति । यस्य पुनर्योगिनोऽविप्लुतमतेः शरीरसंक्षयसमये मनः सत्त्वयुक्तं सम्यगेकाग्रतयेश्वरं प्रति व्याप्रियते स यद्युपासनाप्रयोगाप्रवीणतयात्मानं नाधिगच्छति तर्हि विशिष्टसंस्कारपाठवशेन जात्यन्तरानुभूतकृमिकीटादिनानागर्भवासादिसमुद्भूतदुःखस्मरत्वं प्राप्नुयात् । तत्स्मरणेन च जातोद्वेगतस्तद्विच्छेदकारिणि मोक्षे प्रवर्तते ॥ १६१ ॥

(वी० मि०) न चाऽनारब्धफलानां कर्मणां तत्त्वसाक्षात्कारेण नाशोऽस्ति । अथ फलानां तेषां फलैकनाश्यतया बहुजन्मसंभृ(२)तानां बहुजन्मोपभोग्यानां च तेषां विद्यमानत्वे कथमुत्पन्नसाक्षात्कारस्याऽपि मोक्षः स्यादत आह—

यथा हि भरतो वर्णैर्वर्णयत्यात्मनस्तनुम् ॥
नानारूपाणि कुर्वाणस्तथात्मा कर्मजास्तनूः ॥ १६२ ॥

यथा भरतो नटः रामरावणादीनां नानारूपाणि कुर्वाणोऽनुकु-

---

(१) सत्त्वस्थमीश्वरम्—इति मु० पु० पाठः । (२) सञ्चितानां—इति ख० पु० पाठः ।

र्णैः सितादिभिर्वर्णैरात्मनस्तनुं वर्णयति रामाद्यनेकरूपां रचयति तथात्मा योगसिद्धिवशाद्विदित्वाऽखिलकर्मणां भोगार्थं तत्तत्कर्मजास्तनूर्नरशूकरादितनूर्युगपदेव वर्णयति रचयति । हिशब्देन सौरभिप्रभृतीनां कायव्यूहश्रवणेनावधारितत्वमस्यार्थस्याऽभिप्रैति ॥ १६२ ॥

(मिता०) यस्त्व(१)पटुसंस्कारतया पूर्वां जातिं न स्मरति तस्य का गतिरित्यत्राह—

यथेति । भरतो नटः स यथा रामरावणादिनानारूपाणि कुर्वाणः सितासितपीतादिभिर्वर्णैरात्मनस्तनुं वर्णयति तथैवात्मा तत्तत्कर्मफलोपभोगार्थं कुब्जवामनादिनानारूपाणि कर्मनिमित्तानि कलेवराण्यादत्ते ॥ १६२ ॥

(वी०मि०) नन्वनन्यगतिकत्वात् फलकालारब्धकर्मणां कथं कायव्यूहेनोपभोगसम्भवः, मातृ रजस्वलासमये नेत्राञ्जनादिकमङ्गहीनत्वादिहेतुमन्तरा अयोनिजशरीरे तदसम्भवादत आह—

कालकर्मात्मबीजानां दोषैर्मातुस्तथैव च ॥
गर्भस्य वैकृतं दृष्टमङ्गहीनादि जन्मतः ॥ १६३ ॥

तथा मातुर्दोषेण जन्मत आरभ्याऽङ्गहीनादि हीनाङ्गत्वादि गर्भस्य वैकृतं दृष्टं तथैव कालस्य वार्द्धकाद्यवस्थारूपस्य कर्मणो गर्भहननादेर्दुरदृष्टविशेषवतो गर्भस्थस्य बीजस्य जनशुक्रस्य वाताद्युपहतस्य दोषैरपि दृष्टम् । तथा चाऽप्यत्र दृष्टिविशेषादेव हीनाङ्गत्वादिकमुपपन्नमिति भावः । एवकारो लोकोक्तिविशेषे । चकारो मात्रादिगुणैर्गर्भोत्कृष्टो दृष्ट इत्येतत्समुच्चयार्थः ॥ १६३ ॥

(मिता०) किंच—

कालेति । न केवलं कर्मैव कुब्जवामनत्वादिनिमित्तं, किन्तु कालकर्मणी स्व(२)कारणपितृबीजदोषो मातृदोषश्चेति । सर्वमेतत्सहकारिकारणम् । एतेन दृष्टादृष्टस्वरूपेण कारणकलापेन गर्भस्याङ्गहीनत्वादिविकारो जन्मन आ(३)रभ्यानियतकालो दृष्टः ॥ १६३ ॥

---

(१) यन्स्वयं दुःसंस्कार ख. । (२) स्वपितृकारणबीज ख. । (३) आरभ्यनियत ङ. ।

(वी०मि०) ननु प्राक्तनेन कर्मादिना बध्यत इत्युक्तं, तन्न युक्तमाद्यशरीरस्य पूर्वकर्माद्यभावादत आह—

अहङ्कारेण मनसा गत्या कर्मफलेन च ॥
शरीरेण च नात्मायं मुक्तपूर्वः कदा (१)चन ॥ १६४ ॥

गतिः संसरणहेतुभूतो दोषसमूहः कर्मणो विहितनिषिद्धस्य फलं धर्माधर्मौ । शेषं प्रसिद्धम् । एतस्य जीवः कदाचन न मुक्तपूर्वः, किन्त्वनादिरेव संसार इति शरीरस्याद्यत्वमसिद्धमेवेत्याशयः । चकारेण इन्द्रियसङ्ग्रहः ॥१६४॥

(मिता०) ननु प्राकृतिकप्रलयावसरे महदाद्यखिलविकारविनाशे कर्मणो नाशात्कथं तन्निबन्धनः प्रथमपिण्डपरिग्रह इत्याशङ्क्याह—

अहङ्कारेणेति । मनोहंकारौ प्रसिद्धौ । गतिः संसरणहेतुभूतो दोषराशिः । कर्मफलं धर्माधर्मरूपम् । शरीरं लिङ्गात्मकम् । एतैरहंकारादिभिरयमात्मा कदाचिदपि न मुच्यते यावन्मोक्षः ॥ १६४ ॥

(वी०मि०) ननु कर्मणा बध्यत इत्यत्र बन्धो दुर्मरणरूपः, तत्र मरणं न कर्मसाध्यं दुर्भिक्षादावकाले युगपत्सहस्रसङ्ख्यानाशदर्शनात् कर्मणां च तज्जीवसमवेतानां प्रतिनियतसमयविपाकत्वादत आह—

वर्त्याधारस्नेहयोगाद्यथा दीपस्य संस्थितिः ॥
विक्रियाऽपि च दृष्टैवमकाले प्राणसंक्षयः ॥ १६५ ॥

वर्तिपात्रतैलानां युगपद्योगाद्दीपसमुदायस्य स्थितिर्यथा, यथा च युगपत्तैलाद्यपगमाद्विक्रियाविनाशः । एवं युगपदेव प्रारब्धकर्मवशाज्जीवसमुदायस्य स्थितिस्तत्क्षयाच्च युगपत्सम्पन्नान्मरणजनकादृष्टानां युगपत्परिपाकाद्वा अकाले प्राणसंक्षयः । चकारादेव जीवस्थितिसङ्ग्रहेण उक्तार्थलाभः ॥ १६५ ॥

(मिता०) ननु प्रतिनियतकर्मणां जीवानां प्रतिनियतकालमेवोपरतिर्युक्ता न पुनः संग्रामादौ युगपदकाले प्राणसंक्षय इत्याशङ्क्याह—

वर्तीति । यथा हि खलु तैलाक्लिन्नानेक(२)वर्तिनानां नानाज्वालानां युगपत्संस्थितिः तासां च स्थिता(३)नां तदुत्तरं दोधूयमान-

---

(१) कथंचन—इति मु० पु० पाठः । (२) नेकवर्तिनीनां ङ ।
(३) स्थितानां पटुतरदाधूयमान ङ ।

पवनाहतिरूपविपत्तिहेतूपनिपातयौगपद्याद्युगपदुपरतिर्यथा भवति तथैव रथिसारथिवाजिकुञ्जरादिजीवानां युद्धाख्योपरतिहेतुयौगपद्यादकालेऽपि प्राणपरिक्षयो नानुप्रपन्नः । एतदुक्तं भवति-प्रतिनियतकालविपत्तिहेतुभूतादृष्टस्य तद्विरुद्धकार्यकरदृष्टहेतूपनिपातेन प्रतिबन्ध इति ॥ १६५ ॥

(वी०मि०) 'स हि योग्यमृती भवेत्' इत्युक्तं, तत्र मोक्षस्य मार्गप्रापकमाह—

अनन्ता रश्मस्तस्य दीपवद्यः स्थितो हृदि ॥
सितासिताः (१)कर्बुनीलाः कपिलाः पीतलोहिताः ॥१६६॥
ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् ॥
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥ १६७ ॥

हृदि दीपवत्प्रकाशमानो यस्तिष्ठति जीवात्मा तस्य सितादिवर्णा अनन्ता रश्मयस्तेषां मध्ये य एको रश्मिः सूर्यमण्डलं भित्त्वा ब्रह्मलोकं चाऽतिक्रम्य ऊर्ध्वं स्थितस्तेन मार्गेण जीवः परां गतिं मोक्षपरमात्मालयरूपां याति प्राप्नोति ॥ १६६-१६७ ॥

(मिता०) मोक्षमार्गमाह—

अनन्ता इति । योऽसौ हृदि प्रदीपवत्स्थितो जीवस्तस्यानन्ता रश्मयो नाड्यः सुखदुःखहेतुभूताः द्वासप्ततिसहस्राणीत्यादिनोक्ताः सितासितकर्बुरादिरूपाः सर्वतः स्थितास्तेषामेको रश्मिरूर्ध्वं व्यवस्थितः, योऽसौ मार्तण्डमण्डलं निर्भिद्य हिरण्यगर्भनिलयं चातिक्रम्य वर्तते तेन जीवः परां गतिमपुनरावृत्तिलक्षणां प्राप्नोति ॥१६७॥

(वी०मि०) प्रसङ्गात्स्वर्गमर्त्ययोः संसरणमार्गमाह—

यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितम् ॥
तेन देवशरीराणि सधामानि प्रपद्यते ॥ १६८ ॥
येनैकरूपाश्चाधस्ताद्रश्मयोऽस्य मृदुप्रभाः ॥
इह कर्मोपभोगाय तै(२)स्तु संसरतेऽवशः ॥ १६९ ॥

अस्य जीवात्मनो मुक्तिमार्गादन्यद्रश्मिशतं यदूर्ध्वं व्यवस्थितं, ते-

---

(१) कटुनीलाः—इति क० पु० पाठः, कर्बुरूपाः कापिला नीललोहिताः—इति मु०पु०पाठः ।
(२) तैः संसरति सोऽवशः—इति मु०पु०पाठः ।

नैव सधामानि दिव्यस्थानोपहितानि देवशरीराणि जीवः प्रपद्यते । ये चाऽस्याधस्ताद्व्यवस्थिता रश्मयः सितासिताद्यनेकरूपाः मृदुप्रभाः तैस्त्विह मर्त्यलोके अवशः कर्मपरतन्त्रः सन् गर्भोपभोगाय संसरते जायते जीवः ॥ १६८-१६९ ॥

(मिता०) स्वर्गमार्गमाह—

यदिति । यदस्यात्मनो मुक्तिमार्गभूताद्रश्मेरन्यद्रश्मिशतमूर्ध्वाकारमेव व्यवस्थितं, तेन सुरशरीराणि तैजसानि सुखैकभोगाधिकरणानि सधामानि कनकरजतरत्नरचितामरपुरसहितानि प्रपद्यते ॥१६८॥

(मिता०) संसरणमार्गमाह—

येनेति । ये पुनस्तस्याधस्ताद्रश्मयो मृदुप्रभास्तैरिह फलोपभोगार्थं संसारे संसरति अवशः स्वकृतकर्मपरतन्त्रः ॥ १६९ ॥

(वी०मि०) दार्ढ्यार्थं पुनरपि युक्त्यन्तरैर्भूतव्यतिरिक्तं जीवात्मानमाधयति—

वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च ॥
आर्त्या गत्या तथाऽगत्या सत्येन ह्यनृतेन च ॥ १७० ॥
श्रेयसा सुखदुःखाभ्यां कर्मभिश्च शुभाशुभैः ॥
निमित्तशाकुनज्ञानग्रहसंयोगजैः फलैः ॥ १७१ ॥
तारानक्षत्रसंचारैर्जागरैः स्वप्नजैरपि ॥
आकाशपवनज्योतिर्जलभूतिमिरैस्तथा ॥ १७२ ॥
मन्वन्तरैर्युगप्राप्त्या मन्त्रौषधिफलैरपि ॥
वित्ताऽऽत्मानं वेद्यमानं कारणं जगतस्तथा ॥ १७३ ॥

वेदादिभिर्वेद्यमानं भूतव्यतिरिक्तत्वेन बोध्यमानं तथा प्रागुक्तप्रकारेण जगतः स्थावरजङ्गमात्मकस्य कारणं जीवात्मानं वित्त हेमुनयो ? यूयं जानीत । वेदः 'अनण्वह्रस्वमपाणिपाद' मित्यादि, शास्त्रं मन्वादिप्रणीतं धर्मशास्त्रं, विज्ञानं न्यायशास्त्रादि जन्मकालीनस्तन्यपानेष्टसाधनताज्ञानं, शतकुलादिशुभाद्दष्टप्रयोजनं जन्म, मरणं कस्याचिच्चिरेण कस्याचिच्छीघ्रम(१)द्दष्टविशेषप्रयोज्यम्, आर्तिः प्रार्थना, तथा वाद्यादिकारितविलक्षणे गत्यगती प्रवृत्तिनिवृत्तिकारितौ चेष्टाविशेषौ,

(१) शुभदृष्ट०-इति ख०पु० पाठः ।

सत्याऽनृते यथा(१)र्थाऽयथार्थबुद्धी, श्रेयो मोक्षः, सुखदुःखे स्वर्गनरकौ, शुभाऽशुभे कर्मणी पुण्यपापरूपे, निमित्तं भूकम्पादि, शाकुनज्ञानं पक्षिचेष्टाविशेषाद्यवलोकनं, ग्रहसंयोगः शुभाशुभसूचकं ग्रहस्य रक्षाविशेषाद्यवस्थानम्, एतेभ्यो जातं फलमैहिकसुखदुःखरूपम् । तारायाः सप्तर्षिप्रभृतेर्नक्षत्रस्याऽश्विन्यादेश्च सञ्चारस्तदधिष्ठातृजीवकारितः, जागरः चिन्ताकारितः, स्वप्नजं स्वामिशिरश्छेदादिराज्यादिजन्यं दुःखसुखरूपं फलम्, आकाशादीनि परोपभागार्थानि, मन्वन्तरैर्बहुभिः सम्बन्धः तत्तत्कर्मफलार्थवादे श्रुतः, मन्त्रौषधिजन्यं फलं दुःखध्वंसः। आद्येन चकारेण मूर्च्छाया, द्वितीयेन द्वेषस्य, तृतीयेन स्मृत्यनुकूलभावनाख्यसंस्कारस्य, अपिकारेण मनसोऽधिकसुखस्य, तथापदेनाऽऽकाशादिगुणानां शब्दादीनां विषयाणां सङ्ग्रहः । अपिशब्देन द्वितीयेन मणिजन्यदुःखध्वंसपरिग्रहः ॥ १७०-१७३ ॥

(मिता०) भूतचैतन्यवादिपक्षं परिजिहीर्षुराह—

वेदैरित्यादि । वेदैः 'स एष नेति नेत्यात्मे'ति, 'अस्थूलमनण्वह्रस्वमपाणिपादम्' इत्यादिभिः । शास्त्रैश्च मीमांसान्वीक्षिक्यादिभिः । विज्ञानैश्च ममेदं शरीरमित्यादिदेहव्यतिरिक्तात्मानुभवैः । तथा जन्ममरणाभ्यां जन्मान्तरानुष्ठितधर्माधर्मनियताभ्यां देहातिरिक्तात्मानुमानम् । आर्त्या जन्मान्तरगतकर्मानुष्ठातृनियतया । तथा गमनागमनाभ्यां ज्ञानेच्छाप्रयत्नाधारनियताभ्यामपि भौतिकदेहातिरिक्तात्मानुमानम् । न हि देहस्य चैतन्यादिसमवायः सम्भवति । यतः का(२)रणगुणप्रोक्तक्रमेण कार्यद्रव्ये वैशेषिकगुणारम्भो दृष्टः । न च तत्कारणभूतपार्थिवपरमाण्वादिषु चैतन्यादिसमवायः सम्भवति, तदारब्धस्तम्भकुम्भादिभौतिकेष्वनुपलम्भात् । न च मदशक्तिवदुदकादिद्रव्यान्तरसंयोगज इति वाच्यम्, शक्तेः साधारणगुणत्वात् । अतो भौतिकदेहातिरि(३)क्तश्चैतन्यादिसमवाय्यङ्गीकर्तव्यः । सत्यानृते प्रसिद्धे । श्रेयो हितप्राप्तिः । सुखदुःखे आमुष्मिके । तथा शुभकर्मानुष्ठानमशुभकर्मपरित्यागः । एतैश्च ज्ञाननियतैर्देहातिरिक्तात्मानुमानम् । निमित्तं भूकम्पादि । शाकुनज्ञानं पिङ्गलादिपतत्रिचेष्टालिङ्गकं ज्ञानम् । ग्रहाः सूर्यादयः तत्संयोगजैः फलैः । तारा अश्वि-

---

(१) सत्यानृते प्रासिद्धे—इति ख०पु०पाठः । (२) कारणगुणप्रक्रमेण ङ ।
(३) रिक्तचैतन्यादि ख ।

न्यादिव्यतिरिक्तानि ज्योतींषि, नक्षत्राण्यश्वयुक्प्रभृतीनि एतेषां संचारैः शुभाशुभफलद्योतनैः जागरैर्जागरावस्थाजन्यैश्च सच्छिद्राऽऽदिन्यादिदर्शनैः तथा स्वप्नैः खरवराहयुक्तरथारोहणादिज्ञानैः, तथा आकाशाद्यैश्च जीवोपभोगार्थतया सृष्टैः, तथा मन्वन्तरप्राप्त्या युगान्तरप्राप्त्या देहेऽनुपपद्यमानया, तथा मन्त्रौषधिफलैः प्रक्षापूर्वकैः क्षुद्रकर्माद्यैः साक्षात्परम्परया वा देहेऽनुपपद्यमानैर्वेद्यमानं हे मुनयः ! विद्ध जानीत ॥ १७०-१७३ ॥

(वी०मि०) अनुमानविधयाऽल्पज्ञापकत्वेनोक्तानां बुद्ध्यादीनामनुक्तानां च निमेषादीनां प्रत्यक्षसहकारितर्कविद्यया ज्ञापकत्वमधिदधान एव प्रत्यक्षं मानमात्मन्याह—

अहङ्कारः स्मृतिर्मेधा द्वेषो बुद्धिः सुखं धृतिः ॥
इन्द्रियान्तरसञ्चार इच्छा धारणजीविते ॥ १७४ ॥
स्वर्गः स्वप्नश्च भावानां प्रेरणं मनसो गतिः ॥
निमेषश्चेतना यत्न आदानं पाञ्चभौतिकम् ॥ १७५ ॥
यत एतानि लिङ्गानि दृश्यन्ते परमात्मनः ॥
तस्मादस्ति परो देहादात्मा सर्वग ईश्वरः ॥ १७६ ॥

अहं सुखीत्यादिप्रत्यक्षं स्मृतिः, संस्कारजन्यं ज्ञानं बुद्धिः, तन्मूलभूतोनुभवो जाग्रदवस्थाकालीनः, स्वप्नो निद्राकालीनं ज्ञानं, चेतना च उपेक्षात्यक्तं ज्ञानमिति भेदः, मेधा दृढतरसंस्कारः, सुखमैहिकं, स्वर्गस्य पृथगभिधानात् । धृतिः शरीरस्य यत्नः, धारणं भारस्य हस्तादिना तोलनं यत्नकार्यं, जीवितं प्राणसंयोगोऽदृष्टकारितः, भावानां चक्षुरादीनां प्रेरणं विषयेषु योजनं, मनसो बुभुत्साजन्येन्द्रियविशेषसंयोगानुकूला गतिः, निमेषो मुद्रितस्य चक्षुष्श्चालनं यत्नकार्यं, यत्नश्च कारणभूतो घटादिसम्पादकश्च, पाञ्चभौतिकं शरीरहस्तादिकृतमादानं जलाद्युपादानम्, आत्मन एतानि लिङ्गानि । यतो हेतोः परमतिशयेन पौनःपुन्यलक्षणेन दृश्यन्ते ज्ञायन्ते । यस्मात्सर्वगो विभुः देहात्परो भिन्न ईश्वरो देहस्य गत्यगत्यादिनियन्ता जीवात्माऽस्ति । चकारेण दुःखादिसङ्ग्रहः । अथवा जीवात्मनि मानमुक्तं परमात्मनि तदाह—अहङ्कार इत्यादि । कर्तृत्वेनाऽह

ङ्कारादीनामीश्वरोऽस्ति परं न हि जीवात्मनो बुद्ध्यादिसमवायिकारणत्वेऽपि तत्कर्तृत्वं सम्भवति बुद्ध्याद्यालम्बनस्य जीवात्मकृत्ययोग्यत्वात् । अत एव बुद्धिर्मयाकृतेत्यादिर्न व्यवहार इति । धारणं ब्रह्मधारणं, निमेषः साहजिकमाक्षिकर्म, पाञ्चभौतिकं शरीरसम्बन्धि आदानं गर्भकाले जीवानुप्रवेशनम् । आत्मा परमात्मा ईश्वरः सर्वेषां प्रभुः सर्वगः सर्वप्राणिनामन्तर्यामी । शेषं पूर्ववत् ॥१७४-१७६॥

(मिता०) किञ्च—

अहङ्कार इति । अहंकृतिरहङ्कारः । स्मृतिः प्राग्भवीयानुभवभावितसंस्कारोद्बोधनिबन्धना स्तन्यपानादिगोचरा । सुखमैहिकम् । धृतिर्धैर्यम् । इन्द्रियान्तरेण हि दृष्टेऽर्थे इन्द्रियान्तरस्य संचारो यमहमद्राक्षं तमहं स्पृशामीत्येवमनुसन्धानरूप इन्द्रियान्तरसञ्चारः । अत्रेच्छाप्रयत्नचैतन्यानां स्वरूपेण लिङ्गत्वम् । पूर्वश्लोके(१) तु गमनसत्यवचनादिहेतुतया आर्थिकं लिङ्गत्वमित्यपौनरुक्त्यम् । तथा धारणं शरीरस्य । जीवितं प्राणधारणम् । स्वर्गो नियतदेहान्तरोपभोग्यः सुखविशेषः । स्वप्नः प्रसिद्धः । 'पूर्वश्लोके तु स्वप्नस्य शुभफलद्यो(२)तनाय लिङ्गत्वम्, अत्र स्वरूपेणेत्यपौनरुक्त्यम् । तथा भावानामिन्द्रियादीनां प्रेरणम् । मनसो गतिश्चेतनाधिष्ठानव्याप्ता । निमेषः प्रसिद्धः । तथा पञ्चभूतानामुपादानम् । यस्मादेतानि लिङ्गानि भूतेष्वेनुपपन्नानि साक्षात्परम्परया वा परमात्मनो द्योतकानि दृश्यन्ते तस्मादस्ति देहातिरिक्त आत्मा सर्वग ईश्वर इति सिद्धम् ॥१७४-१७६॥

(वी० मि०) 'तेन याति परां गति'मित्यनेन जीवात्मनः परमात्मनि लयो मोक्ष इत्युक्तं, लघुश्च लिङ्गशरीरापगम इति दर्शितम् । लिङ्गशरीरं क्षेत्रलयात्मकं दर्शयन्नेव तस्य प्रकृतिरूपतयाऽवस्थानापगममाह—

बुद्धीन्द्रियाणि सार्थानि मनः कर्मेन्द्रियाणि च ॥
अहङ्कारश्च बुद्धिश्च पृथिव्यादीनि चैव हि ॥ १७७ ॥
अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्याऽस्य निगद्यते ॥
ईश्वरः सर्वभूतस्थः सन्नसन् सदसश्च यः ॥ १७८ ॥

---

(१) श्लोकेऽनुगमन ङ । (२) द्योतकतया क ।

बुद्धेरुत्पत्तिरव्यक्तात्ततोऽहङ्कारसम्भवः ॥
तन्मात्रादीन्यहङ्कारादेकोत्तरगुणानि च ॥ १७९ ॥
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणः ॥
यो यस्मान्निःसृतश्चैषां स तस्मिन्नेव लीयते ॥ १८० ॥

बुद्धीन्द्रियाणि श्रोत्रादीनि पञ्च सार्थानि शब्दादिवक्ष्यमाणगुणात्मकविषयसहितानि, मनोऽन्तःकरणं, कर्मेन्द्रियाणि रागादीनि पञ्च, अहङ्कारो महत्तत्त्वविकारः, बुद्धिर्महत्तत्त्वं, पृथिव्यादीनि पञ्च महाभूतानि । चकारैश्चतुर्भिरेतच्छ्लोकस्थैरग्रिमश्लोकस्थेन चकारेण च समुच्चितानि सूक्ष्माणि तन्मात्ररूपाणि पञ्च । अव्यक्तं प्रकृतिरित्यस्य विषयाणां विशेषणत्वेन क्षेत्रस्वरूपा प्रकृतिः, तया चतुर्विंशात्मकस्य क्षेत्रस्य य ईश्वरो व्यापाराणां नियन्ता सर्वभूतस्थः सकलमूर्तसंयोगजधर्माविद्धिर्विविच्य साक्षात्काराविषयीकृतः, असन् अयोगिभि(१)र्विविच्याऽप्रत्यक्षीक्रियमाणः, सदसन् धर्म्ये यशस्यपारमार्थिकत्वादविद्यात्मकजीवोपाधेरपारमार्थिकत्वात् स जीवात्मा क्षेत्रज्ञो निगद्यते बुधैः कथ्यते । तत्राऽव्यक्तं नित्यं, ततो बुद्धेरुत्पत्तिः, ततोऽहङ्कारस्य सम्भवः उत्पत्तिः, अहङ्काराच्च साक्षात्पञ्च तन्मात्राः, तद्वारा पञ्चभूतानि च एकोत्तरगुणानि आकाशवायुतेजोजलपृथिवीति क्रमेणैकैका(२)ऽधिकगुणवन्ति जायन्ते । चकारेणाऽहङ्काराद्बुद्धिकर्मेन्द्रियमनांसि जायन्ते इति समुच्चीयते । शब्दादयस्तु पञ्च तन्मात्राणां पञ्चभूतानां च गुणत एव जायन्ते । एषां च यो यस्मान्निःसृत उत्पन्नः स तस्मिन्नेव लीयते स्थूलरूपेण तिरोभवति सूक्ष्मरूपेण तिष्ठति, कारण एवाऽवतिष्ठत इति यावत् । तस्मात्प्रकृतिरूपतया अवस्थानं क्षेत्रस्य सिद्धम् । प्रकृतिश्च विद्यमानाऽपि वीतरजस्का योषिदपत्यमिव न संसारं प्रसूत इति न पुनः संसार इति रहस्यम् । आद्य एवकारश्चतुर्विंशतिव्यतिरिक्तत्वस्य क्षेत्रत्वव्यवच्छेदार्थः । चरमश्च विनाशव्यवच्छेदार्थः । हिशब्दः साङ्ख्यादिशास्त्रसिद्धत्वादस्मिन्नर्थेऽवधारणमभिप्रैति । चतुर्थश्लोकस्थैश्चतुर्भिश्चकारैर्वाय्वादीनां चतुर्णां शब्दादिगुणान्तरसमुच्चयः ॥ १७७-१८० ॥

---

(१) अयोगिनि विविच्या०-इति ख० पु० पाठः ।
(२) क्रमेण लौकिकाऽधिक०-इति ख० पु० पाठः ।

(मिता०) क्षेत्रक्षस्वरूपमाह —

बुद्धीति । बुद्धीन्द्रियाणि श्रोत्रादीनि सार्थानि शब्दादिविषयसहितानि, मनः, कर्मेन्द्रियाणि वागादीनि, तथाऽहङ्कारो, बुद्धिश्च निश्चयात्मिका, पृथिव्यादीनि पञ्चभूतानि, अव्यक्तं प्रकृतिरित्येतत् क्षेत्रमस्य योऽसावीश्वरः सर्वगतः अत एव सद्रूपः प्रमाणान्तराग्राह्यत्वात् । असन् अस्पष्टप्रतीतिकत्वात् । सदसद्रूपोऽसावात्मा क्षेत्रज्ञ इति निगद्यते ॥ १७७-१७८ ॥

(मिता०) बुद्ध्यादेरुत्पत्तिमाह—

बुद्धेरिति । सत्त्वादिगुणसाम्यव्यमक्तम । ततस्त्रिप्रकारायाः सत्त्वरजस्तमोमय्या बुद्धेरुत्पत्तिः । तस्याश्च वैकारिकस्तैजसो भूतादिरिति त्रिविधोऽहङ्कार उत्पद्यते । तत्र तामसाद् भूतादिसंज्ञकादहङ्कारात्तन्मात्राणि, आदिग्रहणाद्गगनादीनि तानि चैकोत्तरगुणान्युत्पद्यन्ते । चशब्दाद्वैकारिकतैजसाभ्यां बुद्धिकर्मेन्द्रियाणामुत्पत्तिः ॥१७९॥

(मिता०) गुणस्वरूपमाह—

शब्द इति । तेषां गगनादिपञ्चभूतानां एकोत्तरवृद्धौ पञ्च शब्दादयो गुणा वेदितव्याः । एषां च बुद्ध्यादिविकाराणां मध्ये यो यस्मात्प्रकृत्यादेरुत्पन्नः स तस्मिन्नेव सूक्ष्मरूपेण प्रलयसमये प्रलीयते ॥१८०॥

(वी०मि०) प्रकरणार्थमुपसंहरति—

यथाऽऽत्मानं सृजत्यात्मा तथा वः कथितो मया ॥
विपकात्त्रिप्रकाराणां कर्मणामीश्वरोऽपि सन् ॥ १८१ ॥
सत्त्वं रजस्तमश्चैव गुणास्तस्यैव कीर्तिताः ॥
रजस्तमोभ्यामाविष्टश्चक्रवद् भ्राम्यते ह्यसौ ॥ १८२ ॥
अनादिरादिमांश्चैव स एव पुरुषः परः ॥
लिङ्गेन्द्रियग्राह्यरूपः सविकार उदाहृतः ॥ १८३ ॥

ईश्वरोऽपि सन् परमात्मा जीवस्वरूपतया आत्मानं यथा त्रिप्रकाराणां कायिकवाचिकमानसानां कर्मणां विपाकात्सृजति तथा मया वः कथितः । सत्त्वादयस्तस्यैव जीवस्यैव गुणाः कीर्तिताः । तत्र रजस्तमोभ्यां गुणाभ्यामाविष्टो विषयेष्वासक्तो यो जीवात्मा असौ चक्रवत्संसारे कर्मभिर्भ्राम्यते पुनः पुनर्जन्यते । स एव जीवः पुरुषः

परमात्मा अनादिः शरीरग्रहणेन आदिमान् लिङ्गैः सुखदुःखादिभिः इन्द्रियेण ग्राह्यस्वरूपः सविकारो वामनत्वकुब्जत्वादिविकारसहितो मया उदाहृतः । आद्येन चकारेण परस्परसाहित्येन कार्यारम्भकत्वं त्रयाणामुक्तम् । द्वितीयचकारेण बन्धमोक्षोपाय उदाहृत इति समुच्चीयते । चकारसमभिव्याहृताववकारावधारणार्थौ ॥ १८१-१८३ ॥

(मिता०) प्रकरणार्थमुपसंहरन्नाह—

यथेति । मानसादित्रिप्रकारकर्मणां विपाकादीश्वरोऽपि सन्नात्मा यथात्मानं सृजति तथा युष्माकं कथितः । सत्त्वाद्याश्च गुणास्तस्यै(१)वाऽविद्याविशिष्टस्य कीर्तिताः । तथा स एव रजस्तमोभ्यामाविष्टश्चक्रवदिह संसारे भ्राम्यतीत्यपि कथितम् । स एवाऽनादिः परमपुरुषः शरीरग्रहणेनादिमान् कुब्जवामनादिविकारसहितस्तथा स्थूलाकारतया परिणतो लिङ्गैरिन्द्रियैश्च ग्राह्यस्वरूप उदाहृतः ॥१८१-१८३॥

(वी०मि०) रज्जुवद्रश्मिमवलम्ब्य स्वर्गादिकं गच्छतीत्युक्तं, स रश्मिर्यद्देशमध्येन गम्यस्थानं प्राप्नोति तद्देशमाह चतुर्भिः—

पितृयान्नोऽजवीथ्याश्च यदगस्त्यस्य चान्तरम् ॥
तेनाऽग्निहोत्रिणो यान्ति स्वर्गकामा दिवं प्रति ॥ १८४ ॥
ये च दानपराः सम्यगष्टाभिश्च गुणैर्युताः ॥
तेऽपि तेनैव मार्गेण सत्यव्रतपरायणाः ॥ १८५ ॥

चकाराभ्यामपिकारेण च बहुविधाऽश्रौतकर्मकारिणश्च दिवं प्रयान्ति, ये च सम्यक् यथाविधि दानपराः । चकाराभ्यां स्मार्तबहुविधकर्मान्तरपराः, तथा 'ये दया क्षमाऽनसूयाऽऽशौचोऽनायासो मङ्गलमकार्पण्यमस्पृहत्वं सर्वसाधारणानि चे'ति बृहस्पत्युक्तैरष्टाभिरात्मनो गुणैर्युताः, तथा ये सत्याऽभिधाननियमपरास्तेऽपि तेनैव पितृयानरूपेण मार्गेण दिवं यान्ति ॥ १८४-१८५ ॥

(मिता०) स्वर्गमार्गमाह—

पितृयान इति । अजवीथ्यमरमार्गः तस्यागस्त्यस्य च यदन्तरमसौ पितृयानस्तेनाग्निहोत्रिणः स्वर्गकामाः दिवं यान्ति स्वर्गं प्राप्नुवन्ति १८४

(मिता०) किञ्च—

ये चेति । ये च दानादिस्मार्तकर्मपराः सम्यग्दम्भरहिताः तथाष्टा-

---

(१) तस्यैवाविशिष्टस्य ख ।

भिरात्मगुणैः 'दया क्षान्तिरनसूयाऽऽशौचमनायासो मङ्गलमकार्पण्यमस्पृहे'ति गौतमादिप्रतिपादितैर्युक्ताः । तथा ये च (१)सत्यवदननिरतास्तेऽपि तेनैव पितृयानेनैव सुरसदनमाप्नुवन्ति ॥ १८५ ॥

(वी० मि०) नन्ववान्तरप्रलयेनाऽखिलोपदिष्टविलयात् कथमग्निहोत्रादिकर्मप्रवृत्तिः प्राथमिकी, यतः स्वर्ममार्गाधिरोहणं भवेदित्यत आह—

तत्राऽष्टाशीतिसाहस्रा मुनयो गृहमेधिनः ॥
पुनरावर्तिनो बीजभूता धर्मप्रवर्तकाः ॥ १८६ ॥

(वी० मि०) वेदोपदेशद्वारा धर्मप्रवर्तका गृहमेधिनो गृहस्थाश्रमिणो, मुनय आत्ममननशीलाः सर्वज्ञा इति यावत्, अष्टाशीतिसहस्रसङ्ख्याः पुनः सर्गान्ते आवर्तिनो गृहीतजन्मानस्तत्र पितृयाने बीजभूताः ॥ १८६ ॥

(मिता०) ननु नैमित्तिकादिप्रतिसंचरेऽखिलाध्यापकप्रलयाद्विदितवेदास्तस्योपरितना जनाः कथमग्निहोत्रादिकं कर्म करिष्यन्ति कथन्तरां चाऽकृतकर्माणः स्वर्गमार्गमधिरोक्ष्यन्तीत्यत आह—

तत्रेति । तत्र पितृयानेऽष्टाशीतिसहस्रसंख्या मुनयो गृहस्थाश्रमिणः पुनरावृत्तिधर्माणः सर्गादौ वेदस्योपदेशकतया धर्मतरुप्रादुर्भावे बीजभूताः सन्तोऽग्निहोत्रादिधर्मप्रवर्तकाः । अतो न प्रागुदितदो(२)षसमासङ्गः ॥ १८६ ॥

(वी० मि०) स्वर्गमार्गं तदुपदेष्टृसहितमुक्त्वा मोक्षमार्गं तदुपदेष्टृसहितमभिधत्ते—

सप्तर्षिनागवीथ्यन्तर्देवलोकं समाश्रिताः ॥
तावन्त एव मुनयः सर्वारम्भविवर्जिताः ॥ १८७ ॥
तपसा ब्रह्मचर्येण सङ्कल्पागेन मेधया ॥
तत्र गत्वाऽवतिष्ठन्ते यावदाभूतसम्प्लवम् ॥ १८८ ॥
यतो वेदाः पुराणानि विद्योपनिषदस्तथा ॥
श्लोकाः सूत्राणि भाष्याणि यच्च किञ्चन वाङ्मयम्॥१८९॥

---

(१) सत्यवचन ख । (२) समागमः ङ ।

वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः ॥
श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः ॥ १९० ॥
स ह्याश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु ॥
द्रष्टव्यस्त्वथ मन्तव्यः श्रोतव्यश्च द्विजातिभिः ॥ १९१ ॥
य एनमेवं विन्दन्ति ये चाऽऽरण्यकमाश्रिताः ॥
उपासते द्विजाः सत्यं श्रद्धया परया युताः ॥ १९२ ॥
क्रमात्ते सम्भवन्त्यर्चिरहः शुक्लं तथोत्तरम् ॥
अयनं देवलोकं च सवितारं स वैद्युतम् ॥ १९३ ॥
ततस्तान् पुरुषोऽभ्येत्य मानसो ब्रह्मलौकिकान् ॥
करोति पुनरावृत्तिस्तेषामिह न विद्यते ॥ १९४ ॥

सप्तर्षीणामुत्तरतो नागवीथ्या ऐरावतमार्गस्य दक्षिणतो मध्ये देवलोकमाश्रिता अष्टाशीतिसहस्रसङ्ख्या एते मुनयः सन्ति । कुतो हेतोरत आह सर्वैः काम्यकर्मारम्भैः वर्जिताः । तपोब्रह्मचर्यसङ्गत्यागमेधाभिस्तत्र देवलोके गत्वा यावदासमन्ताद्भावेन भूतसंप्लवः प्रलयस्तावत्कालमवतिष्ठन्ते । यतो देवलोकस्य मुनिवर्गात् वेदाः, पुराणानि, विद्या वेदान्तशास्त्राणि, उपनिषदो बृहदारण्यकादयः, श्लोका इतिहासरूपाः, सूत्राणि व्यासपाणिन्यादिप्रणीतानि, भाष्याणि तद्व्याख्यारूपाणि यदन्यत्किञ्चन वाङ्मयमायुर्वेदादि एतानि सर्वाणि प्रवर्तन्ते । तथा च सति वेदस्याऽनुवचनमध्ययनम् । ततो यज्ञब्रह्मचर्यतपोदमश्रद्धोपवासाः प्रवर्तन्ते । स्वातन्त्र्यं विषयाणां सङ्गलक्षणं च प्रवर्तते । एते चाऽत्मनो मोक्षहेतुतत्त्वज्ञानहेतवः । नन्वात्मनः साक्षात्कारो मोक्षहेतुरिति किं वेदजन्यशाब्दज्ञानेनेत्यत आह । आश्रमैः ब्रह्मचर्यादिभिः समस्तैरेवमेव वेदानुवचनाद्युपायेनैव श्रोतव्योऽथ मन्तव्योऽथ द्रष्टव्यो भवति द्विजातिभिः । अथाऽऽत्मज्ञानेऽपि कः पुरुषार्थ इत्यत आह । आरण्यकं बृहदारण्यकमाश्रिता ये द्विजा ये च परया श्रद्धया युक्ता द्विजा एवमेनमुपासते ते सत्यं परमार्थरूपं परमात्मानं विन्दन्ति । तत्र परमार्थलाभे मार्गमाह क्रमादिति । ते ब्रह्मोपासका अर्चिर्वन्ह्यभिमानिदेवतास्थानम्, अहर्दिनाभिमानिदेवतास्थानम्, शुक्लपक्षस्य उत्तरायणस्याऽभिमानिदेवतास्थानं, देव-

लोकं सवितारं सूर्यलोकं वैद्युतं विद्युदभिमानिदेवतास्थानं क्रमात् सम्भवन्ति प्राप्नुवन्ति । ततोऽर्चिरादिलोकप्राप्त्यनन्तरं मानसः पुरुषोऽभ्येत्य ब्रह्मलोकभाज उपासकान् करोति। तेषां चेह संसारे पुनरावृत्तिर्न विद्यते । तथापदेनोपनिषद्व्याख्यानग्रन्थस्य चकारेण वेदाङ्गानां समुच्चयः । हिशब्दो वेदानुवचनस्य ज्ञानहेतुत्वे श्रोतव्यत्वस्य हेतुतामभिप्रैति। आद्येन तुशब्देन मननपूर्वं द्रष्टव्यतां, द्वितीयेन श्रवणपूर्वं मन्तव्यतां व्यवच्छिनत्ति । चकारेण तृतीयेन निदिध्यासनसमुच्चयः। ये चेति चकारः छान्दोग्याद्युपनिषत्समुच्चयार्थः। तथेति ऊर्ध्वस्थितरश्मिभावितव्यतां व्यवच्छिनत्ति । चकारेण महर्लोकादिसमुच्चयः ॥ १८७-१९४॥

(मिता०) किञ्च—

सप्तर्षीत्यादि । सप्तर्षयः प्रसिद्धाः, नागवीथी ऐरावतपन्थाः तदन्तराले तावन्त एव अष्टाशीतिसहस्रसंख्या मुनयः सर्वारम्भविवर्जिताः केवलज्ञाननिष्ठाः तपोब्रह्मचर्ययुक्ताः तथा सङ्कल्पत्यागिनो देवलोकं समाश्रिताः आभूतसम्प्लवं प्राकृतप्रलयपर्यन्तमवतिष्ठन्ते । तत्र च स्थिताः सृष्ट्यादावाध्यात्मिकधर्माणां प्रवर्तकाः ॥ १८७-१८८ ॥

(मिता०) कथंभूतास्ते मुनय इत्यत आह—

यत इति । यतो द्विविधादपि मुनिसमूहाच्चत्वारो वेदाः पुराणाङ्गविद्योपनिषदश्च नित्यभूता एवाध्येतृपरम्परायाताः प्रवृत्तास्तथा श्लोका इतिहासात्मकाः सूत्राणि च शब्दानुशासनमीमांसागोचराणि भाष्याणि च सूत्रव्याख्यारूपाणि यदन्यदायुर्विद्यादिकं वाङ्मयं तदपि यत्सकाशात्प्रवृत्तं तथाविधास्ते मुनयो धर्मप्रवर्तकाः । एवंसति वेदस्यापि नाऽनित्यतादोषप्रसङ्गः ॥ १८९ ॥

(मिता०) ततः किमित्यत आह—

वेदेति । वेदस्य नित्यत्वे सति तत्प्रामाण्यबलाद्वेदानुवचनादयः सत्त्वशुद्ध्यापादनद्वारेणाऽऽत्मज्ञानस्य हेतव इत्युपपन्नं भवति ॥१९०॥

(मिता०) किञ्च—

स इति । यस्मान्नित्यतयात्मप्रमाणभूतो वेदस्तस्मादसावुक्तमार्गेण सकलाश्रमिभिर्नानाप्रकारं जिज्ञासितव्यः । तमेव प्रकारं दर्शयति । द्विजातिभिर्द्रष्टव्योऽपरोक्षीकर्तव्यः । तत्रोपायं दर्शयति-श्रोतव्यो मन्तव्य इति । प्रथमतो वेदान्तश्रवणेन निर्णेतव्यः । तदनन्तरं म-

न्तव्यः युक्तिभिर्विचारयितव्यः । ततोऽसौ ध्यानेनापरोक्षीभवति । ये द्विजातयोऽतिशयश्रद्धायुक्ताः सन्तो निर्जनप्रदेशमाश्रिताः सन्त एवमुक्तेन मार्गेण एनमात्मानं सत्यं परमार्थभूतमुपासते ते आत्मानं विन्दन्ति लभन्ते प्राप्नुवन्ति ॥ १९१-१९२ ॥

(मिता०) प्राप्तिमार्गदेवयानमाह—

क्रमादिति । ते विदितात्मानः क्रमादग्न्याद्यभिमानिदेवतास्थानेषु मुक्तिमार्गसूनेषु विश्रम्य तैः प्रस्थापिताः परमपदं प्राप्नुवन्ति । अर्चिर्यन्निः, अहर्दिनं, शुक्लपक्षः, तथोत्तरायणं, सुरसद्म, सविता सूर्यः, वैद्युतं च तेजः, तान् एवं क्रमादर्चिरादिस्थानगतान्मानसः पुरुषो *ब्रह्मलोकभाजः करोति । तेषामिह संसारे पुनरावृत्तिर्न विद्यते ।* किन्तु प्राकृतप्रतिसंचारावसरे त्यक्तलिङ्गशरीराः परमात्मन्येकीभवन्ति ॥ १९३-१९४ ॥

(वी०मि०) पूर्वोक्तपितृयाने गतिक्रममाह—

यज्ञेन तपसा दानैर्ये तु(१)स्वर्गजितो नराः ॥
धूमं निशां कृष्णपक्षं दक्षिणायनमेव च ॥ १९५ ॥
पितृलोकं चन्द्रमसं वायुं वृष्टिं जलं महीम् ॥
क्रमात्ते सम्भवन्तीह पुनरेव व्रजन्ति च ॥ १९६ ॥

ये तु नराः यज्ञादिभिः स्वर्गजितः स्वर्गफलभोक्तारस्ते धूमादिचन्द्रान्ता(२)भिमानिदेवाद्यादीन् त्रीन् महीं शुक्लरूपां क्रमात्सम्भवन्ति प्राप्नुवन्ति, ततः पुनः संसारमेव व्रजन्तीत्यर्थः । आद्येनैवकारेण पूर्वोक्तमार्गस्य, द्वितीयेन मोक्षस्य व्यवच्छेदः । चकारः पुनरर्थकः, तेन पुनः व्रजन्तीति लभ्यते ॥ १९५-१९६ ॥

(वी०मि०) अथयोनिसंसरणमाह—

एतद्यो न विजानाति मार्गद्वितयमा(३)त्मनः ॥
दन्दशूकः पतङ्गो वा भवेत्कीटोऽथवा कृमिः ॥ १९७ ॥

एतद्देवयानपितृयानरूपं मार्गद्वितयमात्मनोऽर्थं यो न जानाति तदनुसारि कर्म न करोति, स दन्दशूकः सर्पः, पतङ्गः शलभः, कीटः कृमिर्वा भवेत् ॥ १९७ ॥

---

(१) द्वि—इति मु० पु० पाठः । (२) चन्द्रपर्यन्तपदार्थाभि०—इति ख० पु० पाठः ।
(३) द्वितयमात्मवान्—इति मु० पु० पाठः ।

काशिसंस्कृतसीरिज़-ग्रन्थमाला ।

इयं काशी-संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते ।

१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १) रु० १—८
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीका-सहितम् । (वेदान्तं १) रु० ८—०
३ वैशेषिकदर्शनम् । पं० श्रीढुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यांसमन्वितम् (वैशेषिकं१)रु०२—०
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । (वैदिकं १) रु० ०—६
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः-प्रथम भाग अव्ययीभावान्तः । (व्याकरणं १) रु० ५—०
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादि-समाप्तिपर्यन्तः । द्वितीय भाग (व्याकरणं १) रु० ८—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुण-निरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रि-कृतव्याख्यासहिता । (न्यायं १) रु० ६—०
७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रि-कासमवेतविवरणेन च समन्वितम् । (वेदान्तं २)रु० ०—८
८ अलङ्कारप्रदीपः । श्रीविश्वेश्वरपाण्डेयनिर्मितः । (काव्यं १) रु० ०—८
९ अनङ्गरङ्गः । महाकविकल्याणमल्लविरचितः । (कामशास्त्रं१) रु० ०—१२
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १) रु० २—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । (कर्मकाण्डम् १) रु० ०—८
१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-नि-म्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २) रु० १—४
१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम । (वेदान्तं ३) रु० १—४
१४ कुमारसंभवं महाकाव्यम् । महाकवि श्रीकालिदासवि० । सञ्जीवनी शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं२) रु० १—८
१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०—६
१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटि-प्पणा । (न्यायं २) रु० १—०
१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे ह-रिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यस-हितस्नानत्रिकाण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवक-ण्डिकासूत्रैः यमलजननशान्ति-पृष्टोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्प-ण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०

College Section.

१८ संक्षेपशारीरकम्। मधूसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०

१९ लघुज्यूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः। (व्याकरणं २) रु० ०—८

२० कात्तीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः। (कर्मकाण्डं) रु० १—०

२१ सप्तपाठि श्रीशिवमाहिम्नस्तोत्रम्। श्रीगन्धर्वराज पुष्पदन्ताचार्य-विरचितम्। हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाविम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम्। (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः। भाषाटीका-सहितः। (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः। (व्याकरणं ३) रु० ४—०

२४ न्यायवार्त्तिकतात्पर्य्यटीका। श्रीवाचस्पतिमिश्रविरचिता। सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः। (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः । (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः। (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः। (कर्मकाण्डवि० ३) रु० ०—४

२७ लघुशब्देन्दुशेखरः। म० म० श्रीनागेशभट्टविरचितः अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः। (व्या०४) रु० ४— ८

२८ रघुवंशमहाकाव्यम्। श्रीकालिदासविरचितम् पञ्चसर्गात्मकम्। म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं०श्रीकनकलाल ठक्कुरकृतार्थप्रकाशिकाटीकया च समलङ्कृतम् । (काव्य३) रु० ०-१२

२९ कामसूत्रम्। श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नरासादितया पूर्णया-जयमङ्गलरचितया टीकया समेतम्। बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम्। (काम०२) यन्त्रस्थ

३० न्यायकुसुमाञ्जलीः। न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः। म० म० रुचिदत्तकृतमकरन्दोद्भासित म० म० वर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः। (न्याय ४) रु० ६—०

३१ परिभाषेन्दुशेखरः। म० म० श्रीनागेशभट्टरचितः। म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या-तत्त्वप्रकाशिकया टीकया च सहितः। (व्याकरणं ५) यन्त्रस्थ

३२ अर्थसंग्रहः। पूर्वमीमांसासारसंग्रहरूपः। श्रीलौगाक्षिभास्करविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षुविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः। (मीमां०२) रु०१—०

३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम्। परमर्षि-भारद्वाजाद्द्योतकरविरचितम्। महर्षि-गोतमादिचरितसम्वलितबृहत्भूमिकासहितम्। (न्यायं वि० ५) रु० ६—०

३४ शुक्लयजुर्वेदसंहिता। वाजसनेयिमाध्यन्दिनशाखीया। श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता। (भाग १-२-३-४)(वैदिकं ३) रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता। श्रीसायणाचार्यविरचितभाष्यसहिता। १ अध्यायादारभ्य २० अध्यायपर्यन्ता। (वैदिकं ४) रु० ६—०

३६ सिद्धान्तलेशसंग्रहः। श्रीमदप्पयदीक्षितविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः। (वेदान्तं ४) रु० ६—०

३७ काशिका। श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः विद्वद्वर-वामन-जयादित्यविनिर्मिता। (व्याकरणं ६) रु० ६—८

३८ प्राकृतप्रकाशः। भामहकृतः। श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः। टिप्पण्या च संयोजितः। (व्याकरणं ७) रु० १—४

३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः। भाषानुवादसमेतः। (वेदान्तं ६) रु० २—०

४० श्रीनारदीयसंहिता। ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः। (ज्योतिषं २) रु० ०—६

४१ मेदिनीकोशः मेदिनीकारविरचितः। (कोशं १) रु० १—८

४२ मीमांसादर्शनम्। श्रीशबरस्वामिविरचितभाष्यसहितम् सपूर्णम्। (भाग१—२) (मीमांसा ३) रु० १०—०

४३ न्यायदर्शनम्। श्रीगोतममुनीप्रणीतम्। श्रीवात्स्यायनमुनीप्रणीतभाष्यसहितम्। श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितन्यायसूत्रवृत्त्यनुगतम्। टिप्पण्यादिसहितम् (न्यायं ६) रु० ३—०

४४ दानमयूखः। विद्वद्वरश्रीनीलकण्ठभट्टविरचितः। (धर्मशास्त्रं १) रु० १—८

४५ कालमाधवः। विद्वद्वरश्रीमाधवाचार्यविरचितः। (धर्मशास्त्रं २) रु० १—८

४६ भास्वती। श्रीमच्छतानन्दविरचिता। श्रीमातृप्रसाद (दैवज्ञभूषण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहरण भाषाटीकाभ्यां सहिता। (ज्योतिषं ३। रु० २—०

४७ फक्किकाप्रकाशः। उपाध्यायोपाह्वयैयाकरणकेसरीविरुदाङ्कितमैथिलेन्द्रदत्तशर्मविरचितः। पं० सीतारामशर्मकृतटिप्पण्या विभूषितः। (व्याकरणं ८) रु० १—४

४८ मिताक्षरा। श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या--श्रीमत्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामिकृता। शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च। (वेदा०७) रु० १—४

४९ काव्यप्रकाशः। श्रीमम्मटाचार्यविरचितः। पं० श्रीहरिशङ्करशर्मणा मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः। (काव्य०४) रु० ४—०

५० अधिकरणकौमुदी। श्रीदेवनाथठक्कुरकृता। (मीमां० ४) रु० १—०

५१ रघुवंशमहाकाव्यम्। श्रीकालिदासविरचितम् म.म. श्रीमल्लिनाथकृतसञ्जीविनीटीकयोपेतम् पं० श्रीकनकलालठक्कुरेण कृता भावबोधिनी टिप्पण्या समलङ्कृतः संपूर्णम्। (काव्य ५) रु० १-४

५२ काथबोधः। साजनीकृत टीकोपेतः। दत्तात्रेय सम्प्रदायाऽनुगतः। रु०—८

५३ रसचन्द्रिका । श्रीविश्वेश्वरपाण्डेय निर्मिता । (काव्य० ६) रु०१—०
५४ अलङ्कारमुक्तावली। श्रीविश्वेश्वर पाण्डेयनिर्मिता। (काव्य०७)रु०-१२-०
५५ वृत्तरत्नाकरः-भट्टकेदारप्रणीतः । नारायणभट्टीयव्याख्यासहितः।
सम्पादकनिर्मितविषमस्थलटिप्पणोपेतः । श्रुतबोधच्छन्दो-
मञ्जरीसुवृत्ततिलकैश्च समेतः । (छंद वि० १) १—८
५६ अलङ्कारशेखरः।केशवमिश्रकृतः। साहित्योपाध्याय श्री अनन्तराम-
शास्त्रिणा भूमिकादिभिः संभूष्य संशोधितः । (अलं०वि०१)रु० १-४
५७ शक्तिवादः । श्रीगदाधरभट्टाचार्यप्रणीतः। टीकात्रयोपेतः। कृष्ण-
भट्टकृतया मञ्जूषया-माधवभट्टाचार्यनिर्मितया विवृत्या
श्रीमन्माध्वसंप्रदायाचार्य्यदार्शनिकसार्वभौमसाहित्यदर्शना-
द्याचार्यतर्करत्नन्यायरत्न गोस्वामिदामोदरशास्त्रिरचितया
विनोदिन्या च समेतः । (न्या० वि० ७) रु० २-०
५८ प्रौढमनोरमा । म. म. श्रीभट्टोजीदीक्षितविरचिता तत्पौत्र म. म.
श्रीहरिदीक्षितविरचितलघुशब्दरत्नाख्यव्याख्ययासमेता । म.
म. पण्डितश्रीभैरवमिश्रविरचितशब्दरत्नव्याख्यया युक्ता ।
श्रीयुतभाण्डारीत्युपाह्वमाधवशास्त्रिविरचित प्रभानामकटिप्प-
ण्या समलङ्कृता । श्रीयुतजगन्नाथशास्त्रिविरचितयाव्ययी-
भावस्य शब्दरत्नप्रदीपकनामकटीप्पण्याऽलङ्कृता (अव्ययी-
भावान्तः प्रथमो भागः । (व्याकरण वि० ९) रु० ५—०
५९ आपस्तम्बगृह्यसूत्रम्। श्रीहरदत्तप्रणीतयाऽनाकुलाख्यया व्याख्यया,
श्रीसुदर्शनाचार्यप्रणीतया तात्पर्यदर्शनाख्यया व्याख्यया च
समलङ्कृतम्, पृथक् सूत्रपाठेन,पाठभेदन, मीमांसापदार्थविव-
रणेन च संयोजितम् । (कर्म० वि० ५) रु० ४—०
६० नाट्यशास्त्रम् । भरतमुनिप्रणीतम् (सम्पूर्णम्) साहित्योपाध्याय
एम.ए. इत्यादिपदवीभाजा पण्डित बटुकनाथ शर्म्मणा तथा
साहित्यशास्त्रि एम.ए. पदवीभृता पण्डित बलदेवोपाध्यायेन
च सम्पादितम् । (नाट्यशास्त्र वि० १) रु० ५—०
६१ काव्यालङ्कारः । श्रीभामहाचार्येण विनिर्मितः । काशीविश्वविद्या-
लयाध्यापकाभ्यां पण्डित बटुकनाथ शर्मा एम० ए० सा-
हित्योपाध्यायः तथा पण्डित बलदेव उपाध्याय एम० ए०
साहित्यशास्त्री इत्येताभ्यां भूमिकादिभिः समलङ्कृत्य सम्पा-
दितः, काशी विश्वविद्यालयोपकुलपतिपदं विभूषयद्भिः श्री-
मदाचार्यप्रवरैः आनन्दशङ्कर ध्रुव महोदयैः लिखितेन प्राक्-
कथनेन सनाथीकृतः । (अलङ्कार वि० २) रु० १-८

जयकृष्णदास—हरिदासगुप्तः,

चौखम्बा संस्कृत सीरीज आफिस, विद्याविलास प्रेस,

गोपालमन्दिर के उत्तर फाटक बनारस सिटी ।